तन्त्रसमुच्चयविवरणे नवमः पटलः ।

Author :

Remarks—This Ms. covers the first 9 *paṭalas* and a portion of the next.

॥ तन्त्रसमुच्चयव्याख्या (भाषा) ॥

No. 957. TANTRASAMUCCAYA
(with Malayāḷam commentary.)

C. O. L. No. 581.

Substance—Palm leaf. Size—6" × 1½". Leaves—92. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—920.

Owner—Jayantan Bhāskaran Mūttatu, Vaṭṭappaḷḷi, Kumāranallūr.

Subject—Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

पादोनत्रिकरादिपञ्चदशहस्ताशाङ्गुलान्तोत्तरे-
ष्वष्टाष्टाङ्गुलवृद्धितोऽन्तरभवद्योनिप्रभेदेष्वपि ।
प्रत्यक्प्राग्वदनक्रमेण विहितेष्वल्पेषु वान्येषु वा
प्रासादेषु विशिष्टजातिषु निजेष्टं कारयेत् कारुभिः ॥

കാൽകുറെ മുക്കോലാടിയായി പതിനാഴ്ചാലെ പതിറ്റുവിരലോളമുള്ളവ അല്പപ്രാസാദങ്ങൾ എട്ടെട്ടംഗുലമേറി ഒന്നെടയിട്ട് പശ്ചിമദ്വാരങ്ങളായിയും പൂർവ്വദ്വാരങ്ങളായിയും ഏകയോനികളായിയും പഞ്ചമയോനികളായിയും വിധിക്കപ്പെട്ടും അല്പപ്രാസാദങ്ങൾ ഇവറ്റിൽ വച്ചുതാൻ ജാതികളുടെ വിശേ

ഷണ്ടളോടുകൂടിയിരിക്കുന്ന വലിയ പ്രാസാദത്തെ ശില്പികളെ കൊണ്ടു ചമപ്പിപ്പു.

End :

कुर्यात् किरीटं शिखरैस्समेतं
त्रिपञ्चसप्तप्रमितैर्यथार्हम् ।
अण्डोपमं वा कमलोपमं वा
छत्रोपमं वा कमठोपमं वा ॥ इति ॥

മൂന്നുതാൻ അഞ്ചുതാൻ ഏഴുതാൻ ശിഖരങ്ങളോടുകൂടിയിരിക്കണം കിരീടം. ഇതിന്റെ അഗ്രത്തെ മുട്ടപോലെ ഉരുണ്ടുതാൻ താമരപ്പൂപോലെതാൻ ആമപോലെതാൻ യോഗ്യതയ്ക്കു തക്കവണ്ണം ചമയ്ക്കണം.

Colophon :

इति द्वितीयः पटलः । शुभमस्तु ।

Author—Nārāyaṇa.

Remarks— Only the 2nd paṭala is extant herein. The covering leaf deals with medicine.

॥ तन्त्रसमुच्चयव्याख्या (भाषा) ॥

No. 958. TANTRASAMUCCAYA
with Malayāḷam commentary.

C. O. L. No. 447.

Substance—Palm leaf. Size—18″ × 2″. Leaves—209.
10—11 lines per page and 52 letters per line.
Script—Malayāḷam. No. of Granthas—6968.

Owner—C. O.

Subject—Tantra.

Beginning :

नागेऽलिन्दभुवि प्रकल्प्य निजकुण्डं मण्डपे देशिकः
कुर्यान्मण्डपसंस्क्रियामपि घटीभ्रान्त्यन्तिमां पूर्ववत् ॥

ഇതി ഒന്നു അപി സപ്തസമയേ അങ്കുരരോപണം കുവ്വീത തു ചതുരസ്രസ്ഥാനത്തിങ്കലും മറുള്ള കാര്യങ്ങൾ ചെയ്യുന്നേടത്തും കലശാധിവാസത്തിനു മുൻപിൽ മുളയിടുവാൻ വിധിച്ച ദിവസത്തിങ്കൽ മുളദ്രവ്യങ്ങളെ പൂജയും ചെയ്യവരണം. പൂർവ്വോക്ത നിഷ്കൃതിവക്ഷ്യമാണവിധിനാ തത്തപ്താന്തിമാൻ ഹോമാൻ ച പ്രായശ്ചിത്തവിധിയിങ്കൽ പറയുന്ന വിധിപോലെ പ്രായശ്ചിത്തം ശാന്തിതത്തപം ഇങ്ങനെയുള്ള ഹോമങ്ങളെ കലശം ആടുന്ന ദിവസത്തിന്റെ തലേദിവസം ചെയ്യണം. അപ്പോൾ തത്തപഹോമത്തിങ്കൽ സംഹാരസത്തപസമ്പാതം ഉണ്ടാക്കേണ്ടാഹ്നാവധി അവസാനം ഇല്ല. ചിലർ നാലാംദിവസം തത്തപഹോമത്തെ വിധിപോലെ ചെയ്യുന്നുപോൽ. മണ്ഡപേ അളിന്ദഭുവി നാഗേ നിജകുണ്ഡം. പ്രകല്പ്യ കലശമണ്ഡപത്തിങ്കൽ അളിന്ദഭൂമിയിങ്കൽ വായുകോണിൽ കിഴക്കു നാഗപദത്തുങ്കൽ ആചാര്യകുണ്ഡത്തെയും അധിവാസത്തിങ്കലെപോലെ ദിക്കുകുണ്ഡങ്ങളേയും ഉണ്ടാക്കി. ദേശികഃ ഘടീഭ്രാന്ത്യന്തിമാം മണ്ഡപസംസ്ക്രിയാം അപി കുര്യാൽ (ആചാര്യൻ?) ആചാര്യൻ കലശപൂജയുടെ ദിവസം നോക്കുന്നു തോരണധ്വജസ്ഥാപനം തുടങ്ങിക്കുംഭേശപൂജകഴിവോളമുള്ള മണ്ഡപസംസ്കാരത്തെ അധിവാസത്തിങ്കൽ പറഞ്ഞപോലെ ചെയ്വൂ.

End :

सेयं कृतिस्तन्त्ररहस्यदग्धा
रक्ष्या मुहुर्मूर्खमुखप्रपातात् ।

आचार्यवर्यैरियमेव शश्वद्
विश्वेश्वरेज्यासदनुष्ठितास्तु ॥

ഇതി. തന്ത്രരഹസ്യദുഗ്ധ്വാ സാ ഇയം കൃതിഃ തന്ത്രങ്ങളുടെ രഹസ്യങ്ങളായിരിക്കുന്ന അർത്ഥങ്ങളെക്കൊണ്ടു് സംപൂർണ്ണമായിരിക്കുന്ന എന്റെ ഈ ഗ്രന്ഥം ആചാര്യവര്യൈഃ മൂഢമുഖപ്രപാതാത് രക്ഷ്യാ ആചാര്യന്മാരാൽ മൂർഖന്മാരായ ദുർജ്ജനങ്ങളുടെ മുഖത്തിങ്കൽ പ്രവേശിക്കാതെ ഇരിക്കുന്നതിനാ് രക്ഷിക്കപ്പെടണം. അവർ താല്പര്യം വിചാരിക്കാതെ ഒന്നിനൊന്നായി പ്രവൃത്തിയിൽ ക്രിയാലോപവും ഭവിക്കും. ശശ്വദസ്മദനുഷ്ഠിതാ ഇയം വിശേശ്വരേജ്യാ അസ്തു. എല്ലായ്പോഴും എന്നാൽ ഉണ്ടാക്കിയിരിക്കുന്ന ഗ്രന്ഥനിർമ്മാണം സകലദേവന്മാരുടെ പൂജയായിട്ടു തന്നെ ഭവിക്കണം. ഗ്രന്ഥാരംഭത്തിങ്കലും ഭഗവാനെ പൂജിക്കുന്നതെന്നു് പറഞ്ഞിരിക്കകൊണ്ടു് ഈ ഗ്രന്ഥനിർമ്മാണം പൂജാനിമിത്തമെന്നു് താല്പര്യം.

Colophon :

इति तन्त्रसमुच्चये श्रुतार्चा-
क्रमगुप्तयै रविजन्मसम्प्रणीते ।
पटलः परिशिष्टकर्मवादी
दशमोऽभूद् द्विपुरस्सरः समाप्तः ॥

ഇതി ശ്രുതാർച്ചാക്രമഗുപ്തയ്യൈ രവിജന്മസംപ്രണീതേ തന്ത്രസമുച്ചയേ ഇപ്രകാരം രവിയുടെ പുത്രനായിരിക്കുന്ന എന്നാൽ പൂജാക്രമത്തെ രക്ഷിപ്പാനായി കൊണ്ടു് നിർമ്മിതമായ ഈ തന്ത്രസമുച്ചയത്തിങ്കൽ പരിശിഷ്ടകർമ്മവാദീ ദ്വിപുരസ്സരഃ ദശമഃ പടലഃ സമാപ്തഃ അർത്ഥൽ കർമ്മശേഷങ്ങളേയും മറ്റൊരാധാരമുദ്രാദികളും പറഞ്ഞിരിക്കുന്ന പത്തൊന്നാമത്തെ പടലം സമാപ്തമായി ഭവിച്ചു.

Author :

Remarks.—The work begins with the latter hemistich of a verse in the 8th *paṭala*.

॥ तन्त्रसिद्धिः ॥

No. 959. TANTRASIDDHI.

C. O. L. No. 330.

Substance—Paper. Size—13½″ × 8½″. Pages—28. 19 lines per page and 22 letters per line. Script—Devanāgarī. No. of Granthas—300. Complete.

Owner—C. O.

Subject—Commentary on Tantrasaṅgrahavākya.

Beginning :

श्रीः ।

तन्त्रसिद्धिः ।

श्रीमहागणपतये नमः । अविघ्नमस्तु ।

शिवाय नमः ।

अथ खलु शिवसंहिता एवमनुभूयते—

ज्ञानयोगक्रियायुक्ते युक्तचर्यः परापरम् ।
संस्कृतः साधको रुद्रं साङ्गं सावरणं यजेत् ॥

तदिदानीमीदृशं तन्त्रवाक्यं रुद्रयागविधिपरमुपन्यस्तम् । तत्र सन्देहः—किमिदमीदृशं तन्त्रवाक्यं वेदवाक्यवत् स्वतः प्रमाणम् ।

आहोस्वित् मन्वादिस्मृतिवाक्यवद् वेदमूलतया प्रमाणमुत लौकिकवाक्यवदाप्तवचनतया प्रमाणमिति ।

End :

एवमनेकार्थविषयत्वादनेकवाक्यगर्भमिदं तन्त्रसङ्ग्रहवाक्यं मया समासतो व्याख्यातम् । अस्य तु पुनस्तन्त्रवाक्यस्यार्थं व्याख्यातुमल्पेन कालेन न शक्यत इत्यस्माभिरुपेक्ष्यते ।

तदिदं तान्त्रिकग्रन्थैस्तत्त्वाध्वा ज्ञानसाधनम् ।
अस्मदुक्तमुपादेयमल्पं रात्रावलातवत् ॥ इति ॥

Colophon :

इति तन्त्रसिद्धिः समाप्तः ।

Author :

Remarks—The colophon at the end discloses the title of the work.

॥ तन्त्रानुष्ठानकलापसंग्रहः ॥

No. 960. TANTRĀNUṢṬHĀNAKALĀPA-SAṄGRAHA.

C. O. L. No. 2324.

Substance—Palm leaf. Size—$11\frac{3}{5}'' \times 1\frac{3}{4}''$. Leaves—178. 10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—4450.

Owner — Agniśarman Bhaṭṭatiri, Kuzhikkāṭṭu Illom, Tiruvalla.

Subject—An epitome of the religious practices laid down in Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नाच्छिदे तस्मै गणाधिपतये नमः ॥

अथ शिवैकवेरीमातृक्षेत्रपालानां यौगपद्येनैकस्मिन्नेवायतने स्थापनप्रदर्शनार्थं स्वतन्त्रादिभेदः कथ्यते । विष्णुशिवादिसर्वदेवानां केवलं स्वपरिपद्भिस्समन्वितम् अन्यदेवानपेक्षम् आदावेव प्रतिष्ठितं यत् तत् स्वतन्त्रसंज्ञं स्यात् । स्वतन्त्रस्याग्रतस्तदभिमुखतया निजपरिवारैस्सहितोऽन्यो देवः प्रतिष्ठाप्यते चेत् तत्साङ्गसंज्ञं स्यात् । अस्य मण्डपं स्वतन्त्रस्य पृष्ठभागे यदि तदा साङ्गस्य भिन्नसंज्ञं स्यात् ।

End :

यथा—ओं ह्रीं ह्रौं नमश्शिवाय ओं ह्रीं ह्रौं नं क्षं नमश्शिवाय ब्रह्मणे पृथिव्यधिपतये ह्रीं सदाशिवायाकाशाधिपतये ह्रौं शान्त्यतीतकलात्मने नमः । ईशानस्सर्वविद्यानामित्यादि सदाशिवोमित्यन्तम् । ओं ह्रीं ह्रैं नमश्शिवाय । एवं पञ्चतत्त्वान्ते सदाशिवस्य प्राणापानेत्यादि हंसः ह्रीं ओं इत्यन्तम् । एवं मूलाधारहृदयभ्रूमध्यात् पृथङ् मन्त्रमुक्त्वावाह्य जीवकुम्भे निषिच्य व्रणव्यापकादि कृत्वा स्वहृदयादावाह्य पूजयेत् ।

Author :

Remarks :

॥ तन्त्रानुष्ठानकलापसंग्रहः ॥

No. 961. TANTRĀNUṢṬHĀNAKRAMA.

C. O. L. No. 1722.

Substance—Palm leaf. Size—$7\frac{1}{4}'' \times 1\frac{1}{2}''$. Leaves—203. 6—8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Owner—Sūryan Tuḷpan Bhaṭṭatirippād, Kāladi, Manaykal.

Subject—Same as No. 965.

Beginning—Same as No. 965.

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यस्सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

End :

पुनरभिवाद्य प्रसादपुष्पं शिरसि न्यस्य गौरवादिमन्त्रेण शङ्खजलं भूमौ समर्प्य शङ्खमधोमुखं न्यस्य पुष्पमपि न्यस्य मूलमन्त्रेण प्राणायामं कृत्वा व्याप्याङ्गं कृत्वा मानसपूजां कृत्वा व्याप्य लयाङ्गं कृत्वात्मानं संरक्ष्य सदा देवं संस्मृत्य सर्वव्यापारं कुर्यात् ।

Colophon :

इति पूजाप्रकारः ।
श्रीमहादेवाय सदाशिवमूर्तये नमः ।
गुरवे नमः ।

Author :

Remarks—Most of the leaves are worn out. The methods of worship are described at the end.

॥ तन्त्रानुष्ठानक्रमः ॥

No. 962. TANTRĀNUṢṬHĀNAKRAMA.

C. O. L. No. 1511.

Substance—Palm leaf. Size—$14\frac{1}{2}'' \times 1\frac{7}{8}''$. Leaves—160. 10—12 lines per page and 42 letters per line. Script—Malayāḷam. No of Granthas—460.

Owner—Govindan Āryāntharjanam, Vaikom.

Subject—Religious rites and principles connected therewith.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ अनुष्ठानक्रमो लिख्यते : तत्रादौ वरणक्रिया सुदिने यजमानः स्वयं स्नात्वा गुरून् मूर्तिपांश्च स्नापयित्वा देवालये गुरुगृहे स्वगृहे वा क्वचित्प्रदेशे मार्जनादिभिः स्थलशुद्धिं कृत्वा तत्र पश्चिमभागे दक्षिणादिक्रमेण आसनानि न्यस्य तदुपरि पृथगुदगग्रे द्वे वस्त्रे दर्भविष्टरं च न्यस्य तेषु दक्षिणत आरभ्य आचार्यं च मूर्तिपालानपि पाणिं गृहीत्वा प्राङ्मुख उपवेश्य स्वयं च तत्राग्रत उपविश्य देहशुद्धिं शङ्खपूरणमात्माराधनं च कृत्वा स्वस्तिके गणपतिं सम्पूज्य निवेद्य प्रसाद्य (प्रणवेन श्रीबीजेन) दीपं चाराध्य गणपतिं गुरुं मूर्तिपांश्च संवन्द्य ईशकोणे उपलिप्य पूर्वाग्रान् दर्भान् विन्यस्य तेषु पश्चिमादिषु क्रमेण प्रोक्षणीपात्रं पुनः त्रीणि पात्राणि अधोमुखं न्यस्य तत्पूर्वभागे वस्त्राणि स्वर्णपवित्राणि कुण्डलानि यज्ञसूत्राणि चन्दनादींश्च न्यस्य सादयित्वा प्रोक्षणीपात्रमग्रतः न्यस्य

पवित्रं बध्वा न्यस्य जलैः सम्पूर्य उत्पूयाद्भिः संप्रोक्ष्य सवमुत्तानीकृत्य त्रिः प्रो(क्षे?क्षयेत्)।

End :

ओं ह्रीं वां हौं नमश्शिवायै शान्त्यतीतार्यायै एकवीयै शान्तात्मने तुरीयातीतस्वरूपिण्यै चामुण्डायै नमः। ओं ह्रीं चां हौं नमश्शिवायै शान्त्यै रक्तायै शक्त्यात्मने तुरीयस्वरूपिण्यै चामुण्डायै नमः। ओं ह्रीं वां नमश्शिवायै विद्यायै करालिकायै नादात्मने सुषुप्तिस्वरूपिण्यै चामुण्डायै नमः। ओं ह्रीं ह्रीं नमश्शिवायै।

Colophon :

इति जीर्णोद्धारणप्रकारः।

इति श्रीरङ्गनाथविरचितं पुरुषसूक्तभाष्यं समाप्तम्।

Author :

Remarks—The Ms. deals with the pantheistic form of worship.

॥ तन्त्रानुष्ठानक्रमः ॥

No. 963. TANTRĀNUṢṬHĀNAKRAMA.

C. O. L. No. 1731.

Substance—Palm leaf. Size—8″ × 2″. Leaves—186.

10—13 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—3700.

Owner—Kṛṣṇaru Nārāyaṇaru, Muṭṭuviḷa Maṭhom.

Subject—Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

പൂതിയെടത്ത ഭഗവതി ശരണം.

अथानुष्ठानक्रमो लिख्यते । तत्रादौ वरणक्रिया । ....

End :

इति क्रमेण सम्पातसहितं स्विष्टकृदादिहोमं समाप्य सम्पातं कलशे समर्प्य अग्निमुद्वास्य अग्निं विसर्जयेत् । कलशे किञ्चित्सम्पूज्य पूजां समाप्य रक्षेत् । इति शङ्करप्रोक्तप्रकारः ।

अथ रेवन्तं कुर्यात् । प्रासाददक्षिणस्थार्धचन्द्रकुण्डे मृष्ट्यादि संशोध्य अष्टक्रियासहितं यथोक्तमग्निं जनयित्वा पुनः कुण्डमुपलिख्य अग्निः सोमः आ... ... ...

Colophon :

इति सुब्रह्मण्यमहाकुम्भप्रोक्षणप्रकारः ।

Author :

Remarks—The treatise comes to an end with Subrahmonyābhiṣeka.

॥ तन्त्रानुष्ठानक्रमः ॥

No. 964. TANTRĀNUṢṬHĀNAKRAMA.

C. O. L. No. 659.

Substance—Palm leaf. Size—15$\frac{1}{8}$" × 2". Leaves—153. 8—10 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—4100.

Owner—Dāmodaran Parameśvaran Potti, Kārtigappally.

Subject—Same as No. 962.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

Same—as No. 962.

End :

अल्पबिम्बेऽपि तदुचितकाले प्रासादशुद्ध्याद्येकवेरोक्तन्यायेन जीवकलशे उद्वास्याधिवासमण्डपस्थशय्यायां बिम्बेन सह जीवकलशं न्यसेत् । बहुवेरोक्तन्यायेन बिम्बे जीवकलशे च ध्यानाधिवासादि सकलं कर्म कृत्वा प्रतिष्ठायां जीवावाहनकाले जीवकलशेन कर्मबिम्बे अभिषिच्य स्थूलावाहनादि सकलमुक्तवत्कुर्यात् ।

Colophon :

इति जीर्णोद्धारप्रकारः ।

मन्दस्मितातिशयनिन्दितकुन्दवृन्दं
चन्द्रारविन्दगणवन्दितसुन्दरास्यम् ।

वृन्दारकेन्द्रमुखवन्दिवृतं हि वन्दे
स्कन्दं दयानिकरमन्दिरमिन्दुकान्तिम् ॥

चिरलुप्ते खलु यजने
सुमहति दोषे च दुःस्थिते बिम्बे ।
पीठे पादाधारे
पतिते चलितेऽथवा नवीकरणम् ॥

इति । दुःस्थितत्वमङ्गभङ्गादिकमङ्गुल्यायुधबाह्वादिभङ्गम् । पूजालोपे महति दोषे च बाह्वायुधादिभङ्गे पीठादिकेष्वर्वाग्गते चलिते चालितेऽपि दाहादिदोषेष्वपि अन्येषु महादोषेषु नवीकर्तव्यः॥

Author :

Remarks—The statement "ഫഫ്വമാണ്ടു തുലാം ഫഫ-ന്ധ, ഇതിൽ ഏട ഫ്ണ്ണം ഫിന, സമുച്ചയത്തിന്റെ പരമേശ്വരനനുഷ്ഠാനം മുഴുവനും ഒണ്ടു" occurring in one of the leaves discloses that the rules of observance of the religious rituals embodying the Tantrasamuccaya are explained by one Parameśvaran.

॥ तन्त्रानुष्ठानक्रमः ॥

No. 965 A. TANTRĀNUṢṬHĀNAKRAMA.

C. O. L. No. 2545 A.

Substance—Palm leaf. Size—15" x 2". Leaves—152.

8—11 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—400.

Owner—Manayattāṭṭu Vāsudevan Nambūri, Vaikom.

Subject and Beginning—Same as No. 962.

End :

शिवे उद्घातवृत्त्यान्येष्वष्टाष्टवारमाज्यं पूर्णाहुतिसहितं ससम्पातं हुत्वा स्विष्टकृदादिहोमं समाप्याग्निं कलशे उद्वास्य महाबलिपीठादौ पीठं संपूज्यावाह्य पञ्चतत्त्वैः संहारव्यापकपूर्वकम् उक्तन्यायेन संहारतत्त्वकलशाभिषेकादि कृत्वा ध्यानसंकोचं कृत्वा तत्तत् परिवारादिकं संहृत्य तत्रत्यहृदयचैतन्ये सर्वं संयोज्य स्वस्वाग्रतः स्वस्तिके कलशं संपूज्य सर्वत्र शाय...

Colophon :

Author :

Remarks :

॥ द्वादश्याराधनाक्रिया (भाषा) ॥

No. 965 B. DVĀDAŚYĀRĀDHANAKRIYĀ. (Malayāḷam)

C. O. L. No. 2545 B.

Substance—Palm leaf. Size—25″ × 2″. Leaves—5. 9 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—100.

Owner—Same as No. 965 A.

Subject—Rites of worship days on *Dvādaśi.*

Beginning :

ദ്വാദശ്യാരാധനയുടെ ക്രിയ എഴുതുന്നു. ഫരിഃ. ദേഹശുദ്ധി ശംഖപൂരണം ആത്മാരാധന സ്ഥലശുദ്ധി കഴിഞ്ഞാൽ അഗ്നിജ നനം ഗണപതി നിവേദിച്ചു അസ്ത്രംകൊണ്ടു കുത്തിക്കുഴിച്ചു വാ യുബീജംകൊണ്ടു മണ്ണെടുത്ത നിരൎത്തികോണിൽ കളഞ്ഞ അഗ്നി തബീജം കൊണ്ടു തളിച്ചു മെഴുകി ശകലം വച്ചു പ്രണവം 8 ഉരു ജപിച്ചു തളിച്ചു രോഷ്ണാദി അഞ്ചും ദഹനം ഒരിക്കൽകൂടിയും ചെയ്ത പ്രണവംകൊണ്ടു കീറി പ്രണവംകൊണ്ടു തളിച്ചു ശകലം തളിച്ചു കളഞ്ഞ കൈകഴുകി ശകലം വച്ചു വിഷ്ണുവും കുശപ്പുല്ലും ചന്ദനവും പൂവും അക്ഷതവും കൂടി വച്ചുപൂവാരാധിച്ചു രക്ഷി ച്ചു ഷഡംപീഠം പൂജിച്ചു ശക്ത്യാവാഹിച്ചു പൂജിച്ചു അൎഘ്യപു ഷ്പാഞ്ജലിയും മാനസപൂജയും ചെയ്ത തിരുമ്പി കൊണ്ടുവന്ന നാഭീകൽ കൂൎച്ചത്തിന്മേൽ വച്ചു ... ...

End :

അവിടെനിന്നും ആദിത്യനെ ശംഖിൽ ആവാഹിച്ചു കിഴക്കു പുറത്ത ചെന്ന ഗണപതി നിവേദിച്ചു പത്മത്തിൽ മൂൎത്തി കല്പി ച്ചാൽ ആദിത്യന്റെ പുനരുപചാരം(?) ചെല്ലി അങ്ങോടാ ക്കി ആവാഹനമുദ്രവ്യാപകാംഗം. പിന്നെ സാമാന്യംപോലെ ആവാഹിച്ചു പൂജിച്ചു ത്രിമധുരം നിവേദിച്ചു പ്രസന്നപൂജവ്യാപ കാംഗംചെയ്ത അവിടെനിന്നും ആദിത്യമണ്ഡലത്തിങ്കലേയ്ക്കു ഉദ്വ സിച്ചു അൎച്ചിച്ചു അൎഘ്യപുഷ്പാഞ്ജലി മാനസപൂജയെ ചെയ്ത മുമ്പിൽ ചെയ്തുപോലെ ഉടനി ഉദ്വയമാദ്യുപസ്ഥാനപൂൎവ്വമാ രാധിച്ചുരക്ഷിച്ചു അകത്ത ചെന്ന ഭദ്രദീപത്തിങ്കൽ നിന്നും വിഷ്ണു വിനെ പ്രതിമങ്കലാക്കി ഉദ്വസിച്ചു അവിടെനിന്നും തങ്കലേയ്ക്കു ഉദ്വസിച്ചു അവിടെനിന്നും രുദ്രലേയ്ക്കു ഉദ്വസിക്കയോ സാള ഗ്രാമത്തിങ്കലവയ്ക്കോ ഉദ്വസിച്ചുകൊള്ളു.

ഫലം മിഥുനം ഫ.ഫ-ാംനു കിഴക്കു മണമത്തിട്ടെ വകു ശ്രീമതം വാസുദേവൻ എഴുതിനതു.

Colophon :

Author :

Remarks—The last ten leaves are devoted to the explanation of Sanghaṭakrama, Pūrvānuśāsanakrama and a portion of Kalaśacandrika.

॥ द्वादश्याराधना ॥

No. 965 C. DVĀDAŚYĀRĀDHANĀ.

C. O. L. No. 2545 C.

Substance—Palm leaf. Size—15″ × 2″. Leaves—37 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—36.

Owner—Same as No. 965 A.

Subject—Same as No. 965 B.

Beginning :

नमस्कृत्य गणाधीशं वागीशं देशिकं तथा ।
द्वादश्याराधना विष्णोस्संक्षिप्यास्माभिरुच्यते ॥

एकादश्यान्तु मन्त्री नववसनधरश्शोधिते मण्डपान्ते
दीपार्थं होमकर्म प्रचरतु जनिते स्वोक्तमन्त्रैः कृशानौ ।
तस्य प्राचीनभागेऽष्टदलसुमहिते स्वासनेज्यादि सर्वं
कृत्वा तद्वैष्णवोक्तं कलशविहितवत् स्वस्तिकेऽस्योत्तरे च ॥

सामान्योक्तविधानतो हुतवहे कृत्वा निजोक्तक्रमा-
दन्वाधानपुरस्सरेण विधिनात्रात्मार्चनान्तं सुधीः ।
आधायासनपूजनां स्वमनुना चावाह्य साङ्गं पुन-
स्संपूज्येध्ममुखाः स्वमूलमनुपर्यन्ताश्चरेदाहुतीः ॥

End :

हुतान्नशेषेण बलिं प्रकीर्य प्रसन्नपूजां प्रविधाय मन्त्री ।
अपूपताम्बूलनिवेदनाद्यैः प्रसादयेद्देवमनन्यचेताः ॥

प्रथमविहितकल्पत्वा चात्र मध्याह्नकाले
मनुविदथ सपर्यां नामभिः केशवाद्यैः ।
इति विचरतु देवे विप्रवर्यान् तथैतै-
र्यजतु तपनसंख्यैः प्रोक्तमन्त्रैः क्रमेण ॥

प्रोक्तक्रमाद् द्विजवरान् परिपूज्य सम्यक्
संभोज्य वित्तनिचयैः परितोष्य शक्त्या ।
देवं प्रसाद्य कुसुमैर्यजमानयुक्तः
संयोजयेत् दिनकरे निखिलं महस्तत् ॥

इत्थं कर्माणि कल्मषक्षयकरे सम्यक् समाप्तिं गते
कर्ता वै गुरुदक्षिणां वितनुयादर्थैर्मनस्तर्पणैः ।
सोऽयं मानुषपुङ्गवान्निजहिताँल्लब्ध्वात्र कामान् पुनः
स्वान्ते मानुषलोकतो मुरारिपोः पादाम्बुजं प्राप्नुयात् ॥

Author :

Remarks :

Colophon :

॥ तान्त्रिकक्रिया ॥

No. 966. TĀNTRIKAKRIYĀ.

C. O. L. No. 652.

Substance—Palm leaf. Size—12¼″ × 2½″. Leaves—199. 11—13 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—6000.

Owner—Dāmodaran Parameśvaran Potti, Kārtikappally.

Subject—Same as No. 962.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ध्यात्वा गुरुपदाम्भोजं नत्वा च परदैवतम् ।
कृष्णपाषाणविप्रेण लिख्यन्ते तान्त्रिकाः क्रियाः ॥

अथ बीजाङ्कुरार्पणं कुर्यात् । तद्यथा—ध्यानाधिवासादिवसात् प्राग्द्वादशे वा नवमे वा सप्तमे वा पञ्चमे वा दिवसे रात्रौ शुभे मुहूर्ते यामे अतीते सति गुरुः स्नात्वा यजमानाद्वस्त्रपवित्राणि गृहीत्वा नववस्त्रधर आचम्य देहशुद्ध्यादि कृत्वा प्रासादस्योत्तरभागे पश्चिमद्वारि कृते मण्डपे सम्यगाच्छादिते अधिवासमण्डपसंस्कारवक्ष्यमाणरीत्या सूत्रमालादिविकिरविकरणान्तं संस्कारं कृत्वा अङ्कुरारोपणं कुर्यात् ।

End :

यावज्जुगुप्सा गच्छति तावच्छुद्धिः कार्येत्यर्थः । एवमुक्तेष्व-

नुक्तेषु च गुरुः श्रुतिस्मृतिन्यायपरैः तज्ज्ञैः विद्वद्भिस्सह विचार्य वित्तं कुर्यात् । तथैव परिपूर्णता स्यात् ।

Colophon :

इति प्रायश्चित्तप्रकरणे दशमः पटलः ।

Author—Kṛṣṇapāṣāṇa Vipra.

Remarks—*Paṭalas* 3—15 alone are embodied in this Ms. The leaves containing the *Paṭalas* 3 to 5 and 6 to 10 are separately numbered. The Upanishads, Īśa and Kena are quoted in the last two leaves.

॥ तान्त्रिकक्रिया ॥

No. 967. TĀNTRIKAKRIYĀ.

C. O. L. No. 1508.

Substance—Palm leaf. Size—14″ × 2″. Leaves—158 10—15 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—4900.

Owner—Kṛṣṇaru A. Muṭṭuviḷa Maṭhom.

Subject and Beginning—Same as No. 966.

End :

अथ षण्णां होतॄणां संज्ञाः दशहोता चतुर्होता पञ्चहोता षड्ढोता सप्तहोताष्टहोता इति क्रमेण षड्ढोतारः । पुनः तेषामाग्रयणं चित्तिस्रुक् पृथिवी होताग्निर्होता । ततश्च सूर्यं ते । तदनु महाहविराद्यो वागादि स्युः

दशादिहोतारः। तेषु चित्तिस्रुक् पृथिवी सूर्यन्ते महाहविरिति चत्वारः विष्णौ महाकुम्भे लिखिताः। शिष्टौ लिख्येते । अग्निर्होताश्विना ध्वर्युत्वष्टाग्निमित्र उपपक्ता सोमः सोमस्य पुरोगश्शुक्रः शुक्रस्य पुरोगाः श्रातास्त इन्द्रसोमा वातापेर्हवनश्रुतः स्वाहा।

Colophon :

इत्यष्टमः पटलः।

Author :

Remarks—The first 119 leaves have regular page numbers. After 119 the numbers are again resumed.

॥ दिव्यसारस्वतगुह्यतन्त्रम् ॥

No. 968 A. DIVYASĀRASVATAGUHYATANTRA.

C. O. L. No. 1939 A.

Substance—Palm leaf. Size—12″ x 2″. Leaves—53. 7 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—800. Incomplete.

Owner—Māṇṇār Śaṅkaran Nambūri Avl., Kottayam.

Subject—The worship of Sarasvati.

Beginning :

... ...वश्यकुशपुष्पपरिष्कृते ।
उदङ्मुखः समाराध्य स्वस्तिकासनसंस्थितम् ।
आचार्यः प्राङ्मुखस्तिष्ठन्नभिषिञ्चेद्घटोदकैः ॥

शङ्खभेर्यादिनिर्घोषैर्वेदघोषपुरस्सरम् ।
घृतं कषायदधि च क्वाथक्षीरकषायकौ ॥

तैलं कषायं च मधु क्वाथं विप्रतरूद्भवम् ।
अभिषिञ्चेत् क्रमादित्थं कलशान्नव देशिकः ॥

End :

अश्विनीभरणीकृत्तिकानक्षत्रशुक्लप्रतिपदात्मने अमृते अमृतोद्भवे अमृते अमृतवर्षिणि अमृतं स्रावय स्रावय । अमृतवर्षधारिणि हं सं ठं वं ओं स्वाहा। एः ऐः ओः औः अं अः रोहिणीमृगशीर्षनक्षत्रशुक्लद्वितीयात्मने अमृते अमृतोद्भवे अमृतदायिके स्वाहा अः ङः कः खः घः गः आ

Colophon :

इति दिव्यसारस्वते गुह्यतन्त्रे चतुर्विंशतिः पटलः ।

Author :

Remarks—The Ms. ends with a fragment of the 21st Paṭala. The first four leaves contain a portion from the work Śaṅkaranārāyaṇa. The next two point out the Lipi Bīja. The present work commences thereafter.

॥ प्रयोगमाला ॥

No. 968 B. PRAYOGAMĀLĀ.

C. O. L. No. 1939 B.

Substance—Palm leaf. Size—12″ × 2″. Leaves—19. 7 lines per page and 35 letters per line. Script—Malayāḷam. No. of Granthas — 300. Incomplete.

Owner—Same as No. 968 A.

Subject—Tantra.

Beginning :

गणपतये नमः ।

विनायकं कुमारं च शिवनारायणं प्रभुम् ।
दुर्गामार्यं प्रणम्याहं प्रवक्ष्ये ... बाधिकाम् ॥

प्रयोगमालामेतेषां श्रीमत्पादपरायणः ।
रक्ष्यन्ते प्रतिमास्तेषां निमित्तं ... नुपात् ॥

स्थापितस्य गणेशस्य निमित्तं सम्भवेद्यदि ।
प्रायश्चित्तं प्रकुर्वीत सर्वदोष... ... ॥

खण्डेन्दुसदृशं कुण्डं दक्षिणस्यां प्रकल्पयेत् ।

End :

ध्यायेत्कुङ्कुमपङ्काभं द्विभुजं वा चतुर्भुजम् ।
चम्पकस्रक्परिनद्धाङ्गमीषद्धालाननं विभुम् ॥

चूडारत्नविहीनेन मकुटेन विराजितम् ।

ध्यात्वा जप्त्वा ततः स्तुत्वा प्रणिपत्य प्रसाद्य च ॥
पूजाकर्म समाप्याथ दत्त्वार्घ्यं हृदये न्यसेत् ।

मूलमन्त्रादिकान् वक्ष्ये पूजायां ये ....

Colophon :

इति कौमारे प्रथमः पटलः ।

Author :

Remarks—The invocations of Ganapati and Kumāra are embodied in this Ms.

॥ दौर्गानुष्ठानकलापसंग्रहः ॥

No. 969. DAURGĀNUṢṬHĀNAKALĀPA-SAṄGRAHA.

C. O. L. No. 728.

Substance—Palm leaf. Size—11″ × 2″. Leaves—248. 9 lines per page and 35—45 letters per line. Script—Malayāḷam. No. of Granthas—5500.

Owner—C. O.

Subject—Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

वन्दे देवीं जगद्धात्रीं दुर्गां दुर्गार्तिनाशिनीम् ।
इष्टार्थदायिनीं मायां महिषासुरसूदिनीम् ॥

दोशिकं गणनाथञ्च प्रणम्य विधिवल्लभाम् ।
बीजांकुरादिकं वक्ष्ये दुर्गायास्सर्वसिद्धिदम् ॥

आलोड्य दुर्गागमसारसागरं
मदेशिकोक्तानि वचांसि संस्मरन् ।
क्रियाकलापं सकलं प्रवक्ष्ये
वापादितीर्थाप्लवनान्तमत्र ॥

वैष्णवादिकमार्गेण प्रायशो निखिलाः क्रियाः ।
अत्र भेदोऽयमस्माभिर्यथावदभिधीयते ॥

अथात्र दुर्गानुष्ठानकलापसंग्रहोऽस्मत्सम्प्रदायरीत्या प्रोच्यते—

End :

चतुर्थेऽहनि प्रातः अभिषिच्य सर्वं यथापूर्वं विधाय सम्पूज्य रात्रौ श्रीभूतबलिं च कुर्यात् इति । द्रव्यालाभे अवस्थावशाच्च केचिदाचरन्ति तदसमीचीनः पक्षः ।

Colophon :

इत्यष्टबन्धनिक्षेपविधिः ।
शङ्खसर्जाभयालाक्षाः षट्चतुर्द्वैकभागिकाः ।
एकैकं लाक्षया तुल्याः कार्पासोपलवालुकाः ॥

लाक्षाभागमिता धात्री सर्वं तैलेन पेपयेत् ।
इति ।

ശംഖപൊടി ആറുക്കുറു്. ചെഞ്ചല്യം നാലുക്കുറു്. കടുക്കാരണ്ടുക്കുറു്. കോലരക്കു് ഇരുക്കുറു്. പരുത്തിപ്പഞ്ഞി ഒടുക്കത്ത ഒരുക്കുറു്. കൊഴിപ്പശൽ ഒരുക്കുറു്. ആറിലെ വെള്ളാരൻപാറപ്പൊടി ഒരുക്കുറു്. നെല്ലിക്കാ പൂത്തൻ വില്ലാറിലും പാതി. ഇവ ഒക്കെ

വെവ്വേറെ പൊടിച്ചു ചീലപ്പൊടി കട്ടിത്തുക്കി ഒരൊന്നേറ കൂട്ടി എണ്ണയിൽ കുഴച്ചു് അഴവാളം കുത്തുക. ഒരാട്ടു മുട്ടാതെ രണ്ടുനെരവും കുത്തുകിൽ മുപ്പതിറവാണ്ടെത്തു ചെല്ലും. ഇടം പൊരേ പഞ്ഞി കൂട്ടാവു. എത്രകാലം കുത്തി കുത്തുവെൻറു അത്രയും കാലം ചെല്ലുമെന്നറിക.

इत्यष्टबन्धप्रयोगः । शिवमस्तु ।

Author :

Remarks—Durgāsaṅkoca and Aṣṭabandhanavidhi are dealt with, after the completion of the work, on the 24th leaf. An horoscope and a few isolated verses occur at the end.

॥ ध्वजप्रतिष्ठादि ॥

No. 970. DHVAJAPRATIṢṬHADI.

C. O. L. No. 264.

Substance—Paper. Size—11″ × 9″. Pages—173. 20 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—1730. Complete.

Owner—C. O.

Subject—Tantra.

Beginning :

अथ ध्वजप्रतिष्ठाया विधानमुपदिश्यते ।
सुमुहूर्ते शुक्लपक्षे कुर्यात् तामुत्तरायणे ॥

ध्वजसंस्थापनात् पूर्वमष्टमे ह्यङ्कुरार्पणम् ।
कृत्वा प्रासादशुद्धिं च सप्तशुद्धिं च शार्ङ्गिणः ॥

कृत्वानुज्ञां कुम्भमेकं लोहकलशं तु वाहनम् ।
स्थापनात् प्राक् तृतीयेऽह्नि बिम्बवत् परिगृह्य च ॥

घृतेनाभ्यर्च्य मृत्त्वग्भिः परिघृष्ट्याभिषिच्य च ।
गन्धादिभिरलंकृत्य संछाद्य नववाससा ॥

नीत्वा नद्यादिनिकटं धारणाभिः स्तुतं जलम् ।
संशोध्य वरुणं चेष्ट्वा संस्थाप्य फलकामपि ॥

End :

ओँ नमो भूतेभ्यो भूतकृज्य इति ।
गृह्णन्तु बलिमेतत्तु बाह्यस्था विहगानना: ॥

इति मन्त्राभ्यामष्टदिक्षु बलिं दत्त्वा अन्तः प्रविश्य ईशकोणे क्षेत्रपालाय नमः इति मूले जलाप्लुतबलिं दत्त्वा तत्र सर्वं समर्पयेत् ।

अथवा प्राकारस्य बहिरष्टदिक्षु शर्वस्कन्दादीनां बलिं दत्त्वा अन्तः प्रविश्य क्षेत्रपाले सर्वं समर्पयेत् । पुनरन्तः प्रविश्य प्रदक्षिणं कृत्वा नमस्कृत्य समापयेत् । उद्वास्य निर्माल्यं त्यक्त्वा देवीं विधिवत् सम्पूजयेत् ।

Colophon :

इति शक्तिदण्डबलिप्रकारः ।

Author :

Remarks—On pages 9, 100 and 121 some portions are written in Malayāḷam language. Verses on pages 101 and 120 glorify Benarese and are seen in Skāndapurāṇa also.

॥ नारदीयपद्धतिः ॥

No. 971 A. NĀRADĪYAPADDHATI.

C. O. L. No. 2415 A.

Substance—Palm leaf. Size—20¾″ × 2″. Leaves - 45. 10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—1800.

Owner—Cirakkal Koccu Nārāyaṇan.

Subject—Tantra.

Beginning :

श्रीगणपतये नमः ।

नमः संहृतिसम्भूतिस्थितिभेदैरनेकधा ।
विभक्ताय विभक्तात्मज्योतिषे ज्ञानमूर्तये ॥

वासुदेवमुखाम्भोजविकासोद्भासिताखिलम् ।
तन्त्रमाविष्कृतं येन नारदं तं नमाम्यहम् ॥

यन्मतं निखिलाज्ञानतमोविध्वंस्युपार्जितम् ।
येभ्यस्तं शिरसा वन्दे गुरून् लोकोपकारिणः ॥

नारदीयस्य सारस्य यागयोगविधिक्रमम् ।
संक्षेपतः प्रवक्ष्यामि सुविभक्तमनाकुलम् ॥

स्नानादिकाः क्रियाः सर्वाः फलसंसिद्धिहेतवः ।
अतस्तत् प्रथमं वक्ष्ये साधकानां हिताय वै ॥

End :

ब्रह्मचर्यव्रता नित्यं वर्णाचारसमन्विताः ।
पञ्चरात्रविदस्सम्यक् तत्कर्मनिरतास्सदा ॥

वर्णाचारगुणोपेता विप्रा भागवताः स्मृताः ।
एतान् सम्पूज्य विधिवन्नृत्तगेयादि कारयेत् ॥

इति सम्यक् समाख्यातं वैष्णवं स्नपनं परम् ।
एतत् कृत्वा तु विधिवत् सर्वान् कामानवाप्नुयात् ॥

नारदीयस्य रचिता दुर्गमार्थस्य पद्धतिः ।
परमानन्दयतिभिर्ब्रह्मवित्प्रवरैरियम् ॥

क्रमेण यातं गुरुसम्प्रयातः
प्रसाद्य लक्ष्मीसुखसंज्ञसद्गुरून् ।
परम्पराज्ञानमवाप्य संहृता
समस्तमन्त्रार्थगुणा हि पद्धतिः ॥

Colophon :

इति नारदीयपद्धतौ महास्नानपटलः सप्तदशः । समाप्ता च पद्धतिः । गणपतये नमः । सरस्वत्यै नमः । सर्वगुरुभ्यो नमः । विष्णवे नमः ।

Author—Paramānandayati.

Remarks—The name of the author's preceptor is Lakṣmīsukha as indicated by the closing verse. The Ms. is very old and decayed.

॥ समुच्चयानुष्ठानक्रमः ॥

No. 971 B. SAMUCCAYĀNUṢṬHĀNAKRAMA.

C. O. L. No. 2415 B.

Substance—Palm leaf. Size—21¾″ × 2″. Leaves—9. 12—13 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—450. Incomplete.

Owner—Same as No. 971 A.

Subject—Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमदसद्गुरुभ्यो नमः ।

येभ्यः प्रणामविधिभिः सकृदप्युपात्तैः
संसारसागरतरङ्गनिमज्जमानाः ।
ध्वस्तान्धकारमनसो मनुजास्तरन्ति
तेभ्यो नमोऽस्तु नियतं गुरुपादुकेभ्यः ॥

विष्णुशम्भुहरिशम्भुसम्भजिच्छक्तिधृग्गणवशास्तृमूर्त्तिभिः ।
यज्वनामभिमतार्थदायिने नन्दजाय परमात्मने नमः ॥

अथ समुच्चयानुष्ठानक्रमो लिख्यते—

तत्रादौ वरणक्रिया—

ब्राह्मणक्षत्रिययोरेको यजमानश्चेत् स्वयमेव, वैश्याद्यश्चेद् ब्राह्मणेन वरणक्रियां कारयित्वा स्वयं तस्य दक्षिणां दद्यात् ।

End :

तत्पूर्वभागेऽष्टाङ्गुलावसाने ऐशपददक्षिणरेखागतमूलां चतुरश्रोत्तरभागान्तां द्वादशाङ्गुलमिताम् उदगग्रां रेखां विलिखेत् । इष्टकानुरूपेण इति विलिख्य तत्र कवचमन्त्रेण प्रोक्ष्य पीठमिष्ट्वा प्रासादान्तः प्रतिमाप्रतिष्ठास्थानसमीपं प्राप्य कृताञ्जलिः सन् स्वं देवं मनसि स्मरेत् ।

Colophon :

इति विष्णोर्होमप्रकारः ।

Author :

Remarks—A leaf in the middle embodies certain verses from Bhāgavata.

॥ नारदीयपद्धतिः ॥

No. 972. NĀRADĪYAPADDHATI.

C. O. L. No. 376.

Substance—Paper. Size—13½″ × 8½″. Pages—19.

19 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1675.

Owner—C. O.

Subject etc.—Same as No. 971 A.

॥ नारायणात्मकम् ।

No. 973 A. NĀRĀYAṆĀTMAKAM.

C. O. L. No. 320 A.

Substance—Palm leaf. Size—$11\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—150. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—3000.

Owner—Kumārasvāmin Nambūripād, Cennāssu Manakkal, Vāzhakkuḷam, Kunnattunād.

Subject—Tantra connected with Viṣṇu.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

जगज्जन्मस्थितिध्वंसहेतवे शक्तिचोदनात् ।
सद्भावभावनामात्रवपुषे विष्णवे नमः ॥

ओतं प्रोतं यथा सर्वं दृश्यते सचराचरम् ।
तां नमामि रमां शक्तिमादिक्षान्तार्णविग्रहाम् ॥

हिरण्यगर्भाङ्गभुवं मुनिं पप्रच्छ पुष्करः ।
यजनं देवदेवस्य भुक्तिमुक्तिफलप्रदम् ॥

श्रीनारद उवाच—

यदाह भगवान् विष्णुर्मया पृष्टो रमापतिः ।
तदिदानीं शृणु ब्रह्मन् गदतो मे द्विजैस्सह ॥

नमस्कृत्वाप्रमेयाय विष्णवे प्रभविष्णवे ।
प्रवक्ष्यामि समासेन तन्त्रं नारायणात्मकम् ॥

वास्तुसंग्रहमारभ्य तीर्थस्नानावसानिकम् ।
कर्मकाण्डे तु निर्दिष्टं तदिदानीमिहोच्यते ॥

End :

पूर्वेद्युस्तीर्थयात्राया निशि ग्रामबलिं हरेत् ।
तीर्थयात्रां कुरुष्वेति विज्ञाप्यावध्य कौतुकम् ॥

शाययित्वा नियोज्येशं चूर्णैरुन्मृज्य पूजयेत् ।
षण्मन्त्रैः पूर्ववद्धुत्वा यात्राघोषण तं नयेत् ॥

तीर्थतीरं प्रदायार्घ्यं निमज्ज्योत्तीर्य वैदिकैः ।
तान्त्रिकैः सलिलैः प्रोक्ष्य पुनर्मज्जेन्महाजनैः ॥

उत्तार्यावेष्टय वस्त्राभ्यां यथाविधि समर्चयेत् ।
षण्मन्त्रैर्जुहुयादाज्यं मूलेन समिदादिकम् ॥

बलिञ्च विकिरेद् दिक्षु विज्ञाप्यादाय पूर्ववत् ।
नयेत् प्रासादमीशानं मूले संयोज्य पूजयेत् ॥

शोभूते कलशैश्शक्त्या श्रीमांस्तमभिषेचयेत् ।

Colophon :

इति नारायणात्मके विद्याभागे प्रथमः पटलः ।

Author :

Remarks—The Ms. is much damaged. It ends with the 1st paṭala in Vighnabhāga.

॥ षडक्षरनिर्णयः ॥

No. 973 B. ṢAḌAKṢARANIRṆAYA.

C. O. L. No. 320 B.

Substance –Palm leaf. Size—14¾″ × 1¾″. Leaves—3. 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 55. Incomplete.

Owner—Same as No. 973 A.

Subject—Invocation of Śiva.

Beginning :

श्रीगणपतये नमः ।

आनन्दामृतसन्दोहपरमानन्दरूपिणम् ।
नत्वा शिवमिदं वक्ष्ये षडक्षरविनिर्णयम् ॥

ओं ह्रीं ह्रौं नित्यबुद्धाय शिवाय परमात्मने नमः इति प्रबोधसमये जपन् स्वात्मानमनुसन्धाय ओं ह्रीं ह्रौं मायाशक्तये शिवाय परमात्मने नम इति मायी सन् ओं ह्रीं ह्रौं सर्वज्ञाय शिवाय परमात्मने नम इति सर्वज्ञो भवन् ।

End :

पुनर्मूलेन व्यापय्याङ्गष्ठ्यादिकं विन्यस्यायुधमुद्रां प्रदर्श्य लिङ्ग-

योनिमहासुरभ्यञ्जलिवन्दनीप्रसादिनीमुद्राः प्रदर्श्य ध्यात्वा ओन्नमः शिवायार्घ्यमिदं पाद्यमिदमाचमनीयमिदं मधुपर्कमिदं पुनराचमनीयमिदं वस्त्रमिदमुपवीतमिदं भूषणानीमानीत्यर्घ्यादिभूषणान्तं दत्त्वा ओन्नमश्शिवायेत्यादिमन्त्रचतुष्टयेन स्थूलसूक्ष्मकारणसामान्यदेहेषु नाभिहृदयभ्रूमध्यद्वादशान्तगतमूर्तिषु चामृतमयं जलादिनैवेद्यान्तमास्रावयन् क्रमेण सम्पूज्य पुनरपि जलादिभिस्सम्पूज्य नृत्तादिभिश्च सन्तोष्य मूलमेकादशवारमावर्तयन् शिवीभूय वर्णन्यासं कलान्यासं च कुर्यात् ।

Colophon :

Author :

Remarks—The leaves are somewhat worn out.

॥ कौमारबलिः ॥

No. 973 C. KAUMĀRABALI.

C. O. L. No. 320 C.

Substance—Palm leaf. Size—$11\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—9. 4—7 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—120.

Owner—Same as No. 976 A.

Subject—Rites of worshipping Kumāra.

Beginning :

शम् ।

कुमारस्य बलिं वक्ष्ये संक्षेपात् तव सुव्रत! ।
पुष्टिदं जयदं नित्यं सर्वरक्षाकरं परम् ॥

कार्त्तिके मासि षष्ठ्यां वा कृत्तिकायां यथाविधि ।
पूजयेद्देवदेवेशं सर्वज्ञं क्रौञ्चघातिनम् ॥

बलिदानादिनात् पूर्वरात्रौ देवं प्रपूजयेत् ।
स्नात्वा विधिवदाचम्य देवागारं प्रविश्य च ॥

मूलेन पूजयेद्देवं सोपदेशक्रमेण तु ।
पाद्यपूजां विधायाथ पाणिताडनमारभेत् ॥

ध्वजस्य पुरतः स्वस्तिकद्वयमालिख्य तस्मिन् व्रीहिभिः पीठिकां कृत्वा ध्वजाभिमुखं कर्मार्चां संस्थाप्य कर्मार्चाध्वजयोर्मध्ये भेर्यादि-महावाद्यानि संस्थाप्य तत्र कर्मार्चायां मूलेनावाह्य सम्पूज्य ओन्न-मः पराय शब्दतत्त्वात्मने नमः ।

End :

पुनरन्तः प्रविश्याथ बलिमुद्वास्य देशिकः ।
स्नात्वा यथावद्देवस्य निर्माल्यमपकृष्य च ॥

मूलेन पूजयेद्देवं परिवारैस्समन्वितम् ।
तेनैव च समाप्याथ पुनर्देवं क्षमापयेत् ॥

कौमारबलिमेवं यः कुरुते स पुमानपि ।
कीर्तिं श्रियं च लभते मोदतेह परत्र च ॥

Colophon :

कौमारबलिस्समाप्तः ।

Author :

Remarks—The script is illegible. 15 leaves at the close contain certain topics on Tantra. The

leaves are not numbered. A leaf in the middle embodies the following marginal note "भूतसंहार-सृष्टिप्रकारः ।"

॥ नारायणात्मकम् ॥

No. 974 A. NĀRĀYAṆĀTMAKAM.

C. O. L. No. 2414 A.

Substance—Palm leaf. Size—21¼″ × 2″. Leaves—56. 10—12 lines per page and 76 letters per line. Script—Malayāḷam. No of Granthas—3000.

Owner—Padmanābhar Subramonyar, Kūpakkara Maṭhom.

Subject—Same as No. 973 A.

Beginning—Same as No. 973 A.

End :

एवमेव तु संस्थाप्य मध्यमे नवकेन तु ।
हिरण्यगर्भमन्त्रेण ब्रह्मसूक्तेन मध्यमम् ॥

मन्त्राणामवसाने तु मूलमन्त्रं नियोजयेत् ।
ओं चतुर्मुखाय विद्महे नारायणाय धीमहे तन्नो रुद्रः प्रचोद-
यात् ।
मूर्त्तियोगेन या सर्वं कर्म कुर्याद्विचक्षणः ॥
नाभिहृन्मस्तके ध्येया मूर्तयो मण्डलत्रये ।

पुनर्ज्योतिर्मयं ध्यात्वा परे व्योम्नि विचिन्तयेत् ।
संक्षेपाद् ब्रह्मणस्तत्र कथितं परमात्मनः ॥

भक्तलोकहितार्थाय नमस्सर्वात्मने सदा ।

Colophon :

इति नारायणात्मके शङ्करनारायणतन्त्रे द्वितीयः पटलः ।

सकलदुरितनाशे विष्णुसम्पद्यतां मे (?)
प्रतिदिनमनुसेव्ये वैष्णवे पुस्तकेऽस्मिन् ।
गुणगणनिलयास्ते लेखितुः कृष्णनाम्नः
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

ओन्नमो नारायणाय ।

समाप्तश्चायं पुस्तकः? ।

Author :

Remarks—After the close of Śaṅkara Nārāyaṇa Tantra is written a paṭala of Brahmatantra. Though there is no colophon indicating the same, the last verse denotes that it is Brahmatantra.

॥ आर्यस्तवः ॥

No. 974 B. ĀRYASTAVA.

C. O. L. No. 2414 B.

Substance—Palm leaf. Size—$21\frac{1}{4}'' \times 2''$. Leaves—3.

10 lines per page and 84 letters per line. Script—Malayāḷam. No. of Granthas—30.

Owner—Same as No. 974 A.

Subject—Eulogy of Śāsta.

Beginning:

गणपतये नमः ।

ऋषयश्च ऊचुः—

सर्ववेदेषु यत् पुण्यं सर्वतीर्थेषु यत् फलम् ।
सर्वयज्ञफलं यच्च कं स्तुत्वा लभते नरः! ॥

तीर्थदानमखान् कर्तुमशक्तानां कलौ युगे ।
एतदाचक्ष्व नस्सर्वं भक्तानां नन्दिकेश्वर ॥

श्रीनन्दिकेश्वर उवाच—

शास्तारं सर्वभूतेशं शिवभक्तं शिवात्मकम् ।
स्तुत्वा तत्फलमाप्नोति सत्यमेवं कलौ युगे ॥

ऋषय ऊचुः—

तस्य देवस्य माहात्म्यं स्तोत्रं चापि महामते ।
त्वत्तः कमलपत्राक्ष श्रोतुमिच्छामहे वयम् ॥

श्रीनन्दिकेश्वरः—

श्रूयतामभिधास्यामि सुखोपायं महत्फलम् ।
शास्तुः स्तवं महापुण्यं श्रीप्रदं कुलवर्धनम् ॥

आर्यः शास्ता गुहासन्नः सेनानीर्भूतवल्लभः ।
रुद्रजो रूपवान् कामी परमो लोकपूजितः ॥

End :

यस्य शिष्याः सगन्धर्वाः सिद्धाश्चैव महोरगाः ।
यस्मिंस्तिष्ठति लोकोऽयं तस्मै लोकात्मने नमः ॥

भूतनाथ सदानन्द सर्वभूतदयापर ! ।
रक्ष रक्ष महाबाहो शास्त्रे तुभ्यं नमो नमः ॥

कोदण्डी क्षुरिकाखड्गी शरी कामी बली सुखी ।
नीलनीरदनीलाङ्गः शास्ता रक्षतु मां चिरम् ॥

रक्तां रक्तोत्पलाकल्पां सुरूपां कान्तयौवनाम् ।
धृतवीणां प्रभां वन्दे देवीं रक्तान्तलोचनाम् ॥
तमालश्यामलं भद्रं पिशङ्गाभरणोज्ज्वलम् ।
अधिज्यकार्मुकं वन्दे सत्यकं व्यक्तयौवनम् ॥
इदं स्तोत्रं पठेद् यस्तु शृणुयाद्वा समाहितः ।
महतीं श्रियमाप्नोति सत्यमेव कलौ युगे ॥

Colophon :

Author :

Remarks—The work is cast in the from of a dialogue between Ṛṣi and Nandikeśvara.

॥ सावित्रीकल्पः ॥

No. 974 C. SĀVITRĪKALPA.

C. O. L. No. 2414 C.

Substance—Palm leaf. Size—21¼" × 2". Leaves—2.

11 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—125.

Owner—Same as No. 974 A.

Subject—The rites at Sandhya, the chanting of Gāyatri and the devatas of Gāyatri.

Beginning:

सनत्कुमारः पप्रच्छ भगवन्तं पितामहम् ।
मेरुमूर्ध्नि सुखासीनं प्रणम्य चतुराननम् ॥

कथं सन्ध्यामुपासेऽहमस्ति चेन्मय्यनुग्रहः ।
इति तथ्येन मे ब्रूहि यथाविधि यथाक्रमम् ॥

पितामह उवाच—

शृणु वत्स महाप्राज्ञ! सन्ध्यायाः समुपासने ।
विधिं कृत्स्नं प्रवक्ष्यामि विस्तरेण महामुने ॥

नक्षत्रज्योतिरारभ्य आसूर्योदयदर्शनात् ।
प्रातःसन्ध्येति तां प्राहुः श्रुतयो मुनिसत्तम ! ॥

End:

सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः ।
सायं प्रातः सदा सन्ध्यां ये न विप्रा उपासते ॥

कामं तान् धार्मिको राजा शूद्रकर्मसु योजयेत् ।
एवं सन्ध्यामुपास्य त्वं धारयस्व विधिं शुभम् ॥

शिष्येभ्यो देहि वत्सेभ्यो ब्रह्म ब्राह्मणगुप्तये ।
सनत्कुमारं योगीन्द्रं प्रोवाच भुवनेश्वरः ॥

नम आद्याय देवाय ब्रह्मणे ब्रह्मसूतये ।
नमः सनत्कुमाराय योगीन्द्रेभ्यो नमो नमः ॥

Colophon :

इति ब्रह्मप्रोक्तः सावित्रीकल्पः समाप्तः ।

Author :

Remarks—This Sāvitrīkalpa is used by Brahmins for daily recitals.

॥ कालीतन्त्रम् ॥

No. 974 D. KĀLĪTANTRA.

C. O. L. No. 2414 D.

Substance—Palm leaf. Size—21¼″ × 2″. Leaves—8. 10—12 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—415. Complete.

Owner—Same as No. 977 A.

Subject—Worship of Goddess in the aspect of Kālī.

Beginning :

हरिः । श्रीगणपतये नमः ।

प्रह्वप्राचीनबर्हिःप्रमुखसुरवरानेककोटीरकोटि-
श्लिष्टस्पष्टेन्द्रनीलामलमणिमधुपश्रेणिजुष्टं कृपीष्ट ।
श्रीपादाम्भोजयुग्मं नखमणिविलसद्रश्मिकिञ्जल्कपुञ्जं
शिञ्जन्मञ्जीरहंसीमुखरितमनिशं मङ्गलं वो भगान्याः ॥

अथ प्रवक्ष्यामि शिवात्मिकायाः
श्रीमूलशक्तेर्यजनं समन्त्रम् ।
अस्याः प्रतिष्ठामपि निष्कृतिञ्च
भूयोऽभिषेकं स्नपनं समासात् ॥

एओमध्यगतं वर्णं विन्द्वन्तं वाग्भवं विदुः ।
भूमेर्मध्यगतो ब्रह्मा महामायाविभूषितम् ॥

End :

सर्वोपहारैः सम्पूज्य निवेद्यान्तं चतुर्विधम् ।
अग्नौ हुत्वा च (तीतं) नत्वा देवीं सम्यक् क्षमापयेत् ॥

अनिवारितमन्नाद्यं सर्वमन्यत् प्रदाय च ।
दक्षिणां गुरवे दद्यान्मूर्तिपेभ्यश्च सर्वशः ॥

सदस्येभ्यश्च भक्तेभ्यः प्रीतिदानं प्रदाय च ।
कर्तासौ प्रणमेद्भूमौ तमुत्थाप्यतु देशिकः ॥

सिद्धिरस्तु तवेदानीमिति वाचा वदन् गुरुः ।
ततः प्रभृति देवेशीं यथाविभवविस्तरम् ॥

पूजयेत्कारयेद्वाथ गुरुणा कल्पवेदिना ॥

Colophon :

इति कालीतन्त्रं समाप्तम् । नमश्शिवाय ।

Author :

Remarks—The Ms. contains four paṭalas. The leaf at the end contains four lines more which deal with the preparation of the altar and some details of worship.

॥ नारायणात्मकम् ॥

No. 975. NĀRĀYAṆĀTMAKAM.

C. O. L. No. 321.

Substance—Palm leaf. Size—10½″ × 1½″. Leaves—199. 6 lines per page and 6—7 letters per line. Script—Malayāḷam. No. of Granthas—2300.

Owner—Kumārasvāmin Namburi, Chennas Manakkal.

Subject—The worship of Viṣṇu, Durga, Śāsta etc.

Beginning—Same as No. 1981 A.

End :

प्लावनं मार्जनं यागं होम ... ... ।
... . गृहं नयेत् ॥

पूजयेत् कलशैः सार्धं रात्रौ च विकिरेद्बलिम् ।
सु.... ... ... ॥

....नादुम्बरेण वा ।
स्रुचं पञ्चाङ्गुलं दण्डं पुष्करं चतुरङ्गुलम् ।

ललाटं त्र्यङ्गुलं ... ... ।
... ... वेत्र .... ॥
आयामसदृशं तारं ... ... ।
... ... यामद्विगुणं गले ॥

विस्तारायामतस्तुल्यं... ... . ।
अंशाभ्यां मेखलागर्तं तत्त्र्यंशैर्निम्नमर्धतः ॥

Colophon :

Author :

Remarks—This Ms. deals with Tantrik worship The first 12 paṭalas dwell upon the worship of Viṣṇu, the next three on that of Durgā and the last two on that of Śāsta. The leaves are almost worn out.

॥ नर्तनरङ्गनवीकृतिव्याख्या ॥

No. 976 A. NARTANARAṄGANAVĪKṚTI-VYĀKHYĀ.

C. O. L. No. 2351 A.

Substance—Palm leaf. Size—12" x 2". Laaves—11. 11 lines per page and 45 letters per line. Script—Malayāḷam. No. of Granthas—45.

Owner—Harihara Iyer Nārāyaṇa Iyer, Veccūr.

Subject—Renovation of stage.

Beginning :

हरिः—

नर्तनरङ्गनवीकृतिकृत्यविधाव्यास्त्रयोदशश्लोकपाः ।
अर्थव्यक्तिं कथमपि कर्तुं किमपि प्रवर्तते कश्चित् ॥

जीर्णोद्धारे नृत्तरङ्गस्येति । शुद्धिं प्रासाद शुद्ध्यादिपञ्चकान्तं कलशाभिषेकं च अर्चनान्ते बलिञ्च । देवं संपूज्य श्रीभूतबलिं कृत्वा तद्विधिञ्च इत्यनेन नृत्तरङ्गस्य जीर्णोद्धारं करिष्ये इत्यादिप्रार्थनाप्रकारः सूचितः ।

End :

उक्ताः संक्षेपतः प्रतिपादिताः । गुरुप्रसादादिति विनयशालित्वव्यक्तिः । अनेन डाम्भिकत्वादिदोषाभावो व्यज्यते । मङ्गलान्तत्वात् सुप्रसिद्धता सिद्धा इति सर्वं शिवम् ।

नृत्तरङ्गनवीकर्मप्रतिपादकताजुषाम् ॥
पद्यानामतिसंक्षिप्ता वृत्तिरेषा व्यरच्यत ।
सदसद्विवेकचतुराः सन्तः संशोधयन्तु कृतिमेताम् ।
जलमिलितदुग्धमुग्धीकृतवेदग्धी हि राजहंसीनाम् ॥

Colophon :

शुभम् ।

Author :

Remarks—13 verses which deal with the renovation of stage are explained in this Ms.

॥ नृत्तरङ्गजीर्णोद्धारक्रमः ॥

No. 976 B. NṚTTARAṄGA-JĪRṆODDHĀRAKRAMA.

C. O. L. No. 2354 B.

Substance—Palm leaf. Size—12″ × 2″. Leaves—2. 11 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—55.

Owner—Same as No. 979 A.

Subject—Renovation of stage.

Beginning:

अथ नृत्तरङ्गस्य जीर्णोद्धारक्रमो लिख्यते—तत्रादौ गुरुदैवस्य प्रासादशुद्ध्यादिपञ्चकान्तं कृत्वा यथोचितं पञ्चविंशतिकलैर्वा द्रव्यकलशैर्वा देवमभिषिच्य तत्कलशावस्रुतजलैस्तं रङ्गं सम्प्रोक्ष्य देवं सम्पूज्य श्रीभूतबलिं कृत्वा नृत्तरङ्गस्य जीर्णोद्धारं करिष्ये इति संप्रार्थ्य अनुज्ञां लब्ध्वा रङ्गक्रियामारभेत् ।

End:

अस्मिन् पक्षत्रये यथामतम् उपदेशानुसारेण कार्यम् । एते त्रयः पक्षाः उत्तमाधममध्यमतया कल्पनीयाः इति प्रतीमः ।

Colophon:

इत्युक्तो नृत्तरङ्गस्य जीर्णोद्धारक्रियाक्रमः ।
यथामति समालोच्य सम्यक् संशोध्यतां बुधैः ॥

आसम्मतेरभिज्ञानां बोधं साधु न मन्महे ।
सुशिक्षि(ताम?तोऽहम)प्यात्मन्यविश्वासो हि चेतसः ॥

Author:

Remarks—The renovation of theatres is depicted in this Ms. in prose.

॥ नृत्तरङ्गजीर्णोद्धारक्रमः ॥

No. 976 C. NṚTTARAṄGA-JĪRṆODDHĀRAKRAMA.

C. O. L. No. 2354 C.

Substance—Palm leaf. Size—12″ × 2″. Leaves—2.

11 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—50.

Owner—Same as No. 979 A.

Subject—Same as No. 979 A.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमद्गजेन्द्रवदनं वचनाधिनाथां
भक्त्या गुरोश्चरणपद्ममपि प्रणम्य ।
संक्षिप्य संश्रितचिरन्तनतान्त्रिकोक्तिं
जीर्णोद्धृतिं नटनरङ्गगृहस्य वक्ष्ये ॥

तत्रादितो गुरुवरः परिकल्पदेव-
प्रासादशुद्धिमुखपञ्चकनिष्ठकर्मा ।
औचित्यतो विहिततत्कलशाभिषेकः
प्रोक्षेदवस्रुतजलैरपि जीर्णरङ्गम् ॥

End :

नृत्तार्थरङ्गनिलयस्य नवीक्रियेयं
गर्ताटवीनिलयविप्रकिशोरकेण ।
उक्ता मया गुरुकृपापरमावलम्बात्
तत्तादृशैर्बुधवरैः परिशोधनीया ॥

श्रीवैदिकोपवननामकधामनाथा
श्रीनीलकण्ठनिटिलाक्षिहुताशभूता ।
श्रीपादपङ्कजनमज्जनकल्पवल्ली
श्रीभद्रकाल्यतुलमङ्गलमातनोतु ॥

Colophon :

Author —A member of Kuzhikkāṭṭu family, Tiruvella.

Remarks—The two adjoining leaves after the completion of the work contain a copy of the original.

॥ रामविंशतिः ॥

No. 976 D. RĀMAVIMŚATI.

C. O. L. No. 2354 D.

Substance—Palm leaf. Size—8″ × 1¼″. Leaves—6. 7 lines per page and 20 letters per line. Script—Malayaḷam. No. of Granthas—55.

Owner—Same as No. 979 A.

Subject—The story of Rāma.

Beginning :

श्रीगणपतये नमः ।

रक्षोराजबलावलेपपरिभूतामर्त्यसार्थार्थना-
माकर्ण्याखिललोकपालनकलाचातुर्यधुर्यो हरिः ।
मेदिन्यामरविन्दिनीप्रणयिनो वंशेऽवतीर्यानुजैः
कुर्वन् पूर्णमनोरथं दशरथं रामोऽनिशं पातु माम् ॥

विश्वामित्रमनुव्रजन् पथि मुनेराकर्ण्य मन्त्रद्वयं
नीत्वा तामथ ताटकां यमपुरीं गत्वाश्रमं वामनम् ।
लब्ध्वास्त्राणि दिवौकसां प्रमुदितः संप्राप्य सिद्धाश्रमं
हत्वा राक्षसपुङ्गवान् क्रतुमवन् रामोऽनिशं पातु माम् ।

End :

श्रीमद्रामाङ्घ्रिपद्मस्मृतिसमयगळच्चारुसारस्वताढ्यै-
र्विंशत्या साधु पद्यैर्विरचितमखिलं तस्य संक्षिप्य वृत्तम् ।
नित्यं भक्त्यावनम्रः स्मरति च पठति श्रावयन् यः शृणोति
प्रत्यग्ज्योतिःस्वरूपं व्रजति स परमानन्दसान्द्राभिरामम् ॥

Colophon :

Author :

Remarks—The story of Rāma is condensed in this Ms. in 20 ślokās. The four further verses tell a legend in Bhārata.

॥ न्यासशास्त्रम् ॥

No. 977. NYĀSAŚĀSTRAM.

C. O. L. No. 911.

Substance — Paper. Size—11″ × 9″. Pages — 58. 20 lines per page and 16—24 letters per line. Script—Devanāgarī. No. of Granthas—725.

Owner—C. O.

Subject—The rites of worshipping Veṇu Gopāla and the performance of Nyāsa.

Beginning :

(गंओं) श्रीकृष्णाय नमः । ब्राह्मे मुहूर्त उत्थाय निमीलिताक्ष
एव षोडशान्तःस्थितस्य भगवतो वेणुनादेन स्वप्रबोधं भावयन्

मन्त्रस्याद्यपदं मनसा स्मृत्वा तत उन्मीलयन् पुरतो भगवद्दर्शनभावनया मन्त्रस्य मध्यमभागमनुस्मृत्य तमेव भगवन्तं स्वात्मतया भावयन् मन्त्रस्यान्त्यभागं वल्लभोऽहमित्यन्तं स्मृत्वा भगवदा... वसन् नामामृतानि स्तोत्रादीनि वा कीर्तयन् गत्वा कर्तव्यानि कुर्यात्।

जपादन्यत्र सर्वत्र मूलं तारादिकं विदुः।
ओं सहस्रारहुं फट् स्यादस्त्रं सप्ताक्षरं हरेः॥

End :

अत्र च विवरणे षड्भिः षोडशभिर्वोपचारैर्मानसो योगोऽभिप्रेतः। जलगन्धादिसमर्पणं च तत्तन्मुद्राभिः कार्यमिति ग्रन्थेन जलादेरेव मुद्राद्युक्तेरर्घ्यादीनां स्मरणमेवेति गम्यते। ओं ह्रीमिति द्रव्याण्यादाय दर्शितमन्त्रैस्तर्पणोक्तपदक्रमेणार्घ्यादिभूपान्तं साञ्जलिर्मनसा स्मृत्वा वसवात्मनेत्यादिभिः सम्यक् प्रतिपत्तियुक्तानुचरान् दत्त्वा प्राग्वत् समर्पणत्रयान्ते प्रणवपुटितमूलेन पूजकस्य स्वस्य भगवल्लयमापाद्य तदात्मको भवन्नहङ्ग्रहोपासनात्मकसगुणोपासनेपूत्तमोत्तमरूपामिदं जपयुतोपास(नं)कुर्यात्। तदाह सनत्कुमारः—

कृत्वा ब्रह्मार्पणं चात्मार्पणं च मनुना तयोः।
ऐक्यमापाद्य मूलेन तदात्मा प्रजपेन्मनुम्॥

Colophon :

इति न्यासविधिः।

श्रीभर्ता सुखं सेव्यो न इत्यस्मिन् कलिवासरे।
नारायणो हरेर्दासो न्यासशास्त्रमिदं व्यधात्॥

Author—Nārāyaṇa.

Remarks—The chronogram assigns the work to the year 804. Haridāsa, is another appellation of the author. He may be a staunch devotee of Śrī Kṛṣṇa as evidenced from the main trend of the theme and "हरेः दासः" at the end.

॥ पद्धतिविवरणम् ॥

No. 978. PADDHATIVIVARAṆAM.

C. O. L. No. 692.

Substance—Palm leaf. Size—9″ × 1½″. Leaves—161. 6—8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—2250.

Owner—C. O.

Subject—Exposition of the principles relating to the consecration and worship of different deities.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीशं नमामि सर्गादिभेदैर्भिन्नमनेकधा ।
अभिन्नं परमात्मार्चिर्ज्ञानाभं ज्ञानचक्षुषाम् ॥

प्रचेतोविश्वसत्यादीन् वासुदेवञ्च नारदम् ।
(श्यावि?स्वा)नन्दं परमानन्दं क्रमाद्वन्दे गुरूंश्च नः ॥

नारदीयादितन्त्रार्थसारैर्या पद्धतिः कृता ।
तैरेवास्या यथाशक्ति व्यज्यतेऽर्थो मुरारिणा ॥

ब्राह्मणानामिवाकात्स्न्यात् तन्त्राणां विविधात्मनाम् ।
कल्पादिवदनूनाङ्गप्रयोगार्थेयमिष्यते ॥

सेयमङ्गेन केनापि यद्यूनैव भवेत्पुनः ।
अनूनाङ्गेषु तन्त्रेषु किमिहारब्धयानया ॥

विद्याविनयवान् दक्षो भिक्षुः परहितोद्यतः ।
चक्रे मङ्गलपूर्वं यां सा निरर्थेत्यसाम्प्रतम् ॥

तस्या दिष्टयुपसंख्यानैर्वचोऽर्थानस्फुटानहम् ।
पूर्वतन्त्रानुसारेण विवृणोमि यथातथम् ॥

नम इत्यादितो विष्णुर्वन्द्यतेऽभीष्टसिद्धये ।

End :

मूलानामष्टकेनापि शुभेन स्नापयेदिति ॥

कथञ्चिच्छान्दसत्वेन ... ...तिष्ठन्त्विन्तु? ति किञ्चन ।
अनन्तरक्रियामुक्त्वा नेत्रे चोन्मीलयेदिति ॥

आज्य... ...मध्वाज्ययोजना यदिहेष्यते ।
मधुपानेति हेमादिपात्रे शक्त्यनुरूपतः ॥

मिश्रं हिरण्यगर्भेति घृतं हेमशलाकया ।
संस्पृश्य मित्रं देवानामिति चोन्मीलयेद् दृशौ ॥

उन्मीलमान इत्याह धेनुं दद्यात् . . . . ।
वियुज्यते.... .... ॥

Colophon :

एकादशमाह्निकम् ।

Author—Murāri.

Remarks—The Ms. comprises 12 Āhnikas. The last leaf is missing.

॥ पद्धतिविवरणम् ॥

No. 979. PADDHATIVIVARAṆAM.

C. O. L. No. 1328.

Substance—Palm leaf. Size—13″ × 2″. Leaves—102. 8—9 lines per page and 42 letters per line. Script—Malayāḷam. No. of Granthas—2520.

Owner—C. O.

Subject—Beginning : Same as No. 981.

End :

... ... पूरणे प.... ... ष्ठाया ।
मूर्धानमिति .... क्रेयं समुद्रज्येष्ठ्यादितः ॥

यज्ञयज्ञ... .... ।
पृथिव्यां ... ...गव्येन फलैर्याः फलिनीरिति ॥

या दिव्या इति मूलाभिः पञ्चोक्ता मध्यादिग्गत ... ...
.... मो हरिः ।

शुभन्तामिति विज्ञेया स्नापने तस्य कर्मता ।
मूलैरष्टकमित्यन्यैर्मूलाष्टकमिहोच्यते ॥

व्यत्ययात् तस्य षष्ठ्यायास्तृतीया यदि कल्प्यते ।
तृतीयाया द्वितीया च तथार्थस्य... ... ॥

१. इति मुरारिकृते पद्धतिविवरणे प्रथममाह्निकम् ।

Colophon :

२. इति... ... ... एकादशः पटलः ।

Author—Murāri.

Remarks—The Ms. stretches over 12 paṭalas and the last paṭala lacks the end. The 'Āhnika' seen at the beginning is evidently a scribal error.

॥ परमसंहिता ॥

No. 980 A. PARAMASAMHITĀ.

C. O. L. No. 2321 A.

Substance—Palm leaf. Size—22″ × 2″. Leaves—9. 9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—350. Incomplete.

Owner :

Subject—Worship of the Devas.

Beginning :

गणपतये नमः । नमो नारायण ... .

... . रमज्ञानगोचरम् ।
अधीता भगवन् वेदाः साङ्गा ... . ॥

... ... न भविष्यति ।

आगमेऽपि न चैकस्मिन् पश्यामि परमं हितम् ।
तत्र मे भगवन् ब्रूहि संशयच्छेदकारणम् ॥

त्वदन्यं नहि पश्यामि श्रेयोमार्गविशारदम् ।
देवलेनैवमुक्तस्तु मार्कण्डेयो महातपाः ॥

देवलं प्रत्युवा... .... तः ।

मार्कण्डेयः—

दीर्घमायुर्मया लब्धं नच विप्रोषिता स्मृतिः ।
प्रलया बहवो दृष्टाः सर्गा मन्वन्तराणि च ॥

End:

अमृतोदकसम्पूर्णैः कल .... ते ।
दिङ्नारीणां करधृतैरात्मानमभिषेचयेत् ।
सञ्चिन्त्य हृदये सूर्यं भास्वरं मण्डलाकृतिम् ॥

तस्मिन् सञ्चिन्त्य सोमं तु तथा सोमेऽग्निमण्डलम् ।
एवमन्तर्बहिश्चापि शरीरं मन्त्रनिर्मितम् ॥

कल्पयित्वाह ... ... ।

न तदैव स्वयं भूत्वा देवदेवं समर्चयेत् ।
समानव्यवहारेऽपि न पूज्यः पूजको भवेत् ॥

शरीरं प्राकृतं तस्मात् संहृत्य प्रलयक्रमात् ।
विशुद्धमन्यमुत्पाद्य यजेत पुरुषोत्तमम् ॥

... वा यजेद्देवं हृदाकाशेऽथ मण्डले ।
सूर्यमण्डलमध्ये वा यथासम्भवमर्चयेत् ॥

द्रव्याणि पूर्वमुद्भृ... ... ... ।

Colophon :

इति परमसंहितायां विनयपटलस्तृतीयः ।

Author :

Remarks :

॥ प्रपञ्चसारव्याख्या (विज्ञानोद्योतिनी) ॥

No. 980 B. PRAPAÑCASĀRAVYĀKHYĀ
(Vijñānodyotinī.)

C. O. L. No. 2321 B.

Substance—Palm leaf. Size—22″ × 2″. Leaves—112. 11—12 lines per page and 80—90 letters per line. Script—Malayāḷam. No. of Granthas—6800. Incomplete.

Owner—Agniśarman Bhaṭṭatiri, Tukalaśśeri.

Subject—Beginning : Same as No. 879.

End :

यन्त्रं सुकल्पं च मनुत्रयेणेति वक्ष्यमाणं यन्त्रम् ।

अष्टाक्षरान्तरितपादचतुष्ककोष्ठं
कोष्ठत्रयालिखितसाध्यसुदर्शनं च ।
रेखाभिरप्युभयतश्श्रुतिशः प्रबद्धं
तत्सप्तकोष्ठमिति यन्त्रमिदं प्रशस्तम् ॥

दक्षिणोत्तरायता अष्टरेखा लिखित्वा तदग्रद्वयमेकैकान्तरितं सम्बध्यात् । तेषां बाह्यपङ्क्त्योरष्टाक्षरविरुद्धौ त्रिष्टुप्पादौ विलिख्य तथैव तदन्तःपङ्क्त्योश्चोत्तरार्धस्य पादद्वयं विलिखेत् । ततस्तदन्तःपङ्क्त्योस्सुदर्शनं ..... ।

Colophon :

इति विज्ञानोद्द्योतिन्यां विंशतिः पटलः ।

Author—Trivikrama.

Remarks—The leaves are much damaged.

॥ प्रपञ्चसारविवरणम् ॥

No. 980 C. PRAPAÑCASĀRAVIVARAṆAM.

C. O. L. No. 2321 C.

Substance—Palm leaf. Size—22″ × 2″. Leaves—52.
11—12 lines per page and 80 letters per line.
Script—Malayāḷam. No. of Granthas—3000.

Owner—Same as No. 980 A.

Subject—Mantra.

Beginning :

गणपतये नमः । अविघ्नमस्तु ।
गजाननाय महसे प्रत्यूहतिमिरच्छिदे ।
अपारकरुणापूरतरङ्गितदृशे नमः ॥
उद्धरत्यन्धतमसा विश्वमानन्ददायिनी ।
परिपूर्णा जयत्येका देवी चिच्चन्द्रचन्द्रिका ॥

अवर्णविग्रहं देवं वर्णविग्रहवर्जितम् ।
वर्णविग्रहवेत्तारं नमामि स्तौमि संश्रये ।

इह खलु लोकानुग्रहैकरसतया कृतशरीरपरिग्रहो भगवान् शङ्कराचार्यः अपरोक्षीकृतपरदेवतात्मतत्त्वः परमां विभूतिकाष्ठां प्राप्तः स्वयमेकाकी... सम्पदा लज्जमानो दुःखितजनकारुण्याक्रान्तमानसश्च संस्तदनुग्रहाय समस्तागमसारसङ्ग्रहप्रपञ्चागमसारसङ्ग्रहरूपग्रन्थं चिकीर्षुरभिमतसकलप्रयोजनसिद्धये ग्रथमतः परदेवतातत्त्वानुस्मरणलक्षणमाशीर्लक्षणं च मङ्गलमाचरन् ग्रन्थारम्भौपयिकं विषयादिकमप्यर्थात् सूचयति — अकचटतपयाद्यैरित्यादिना ।

End :

आमलकप्रमाणं हविरादाय मिश्रीकृत्यावदानद्वयं स्त्रीपुंसयोर्विभागेन करोत्वित्यर्थः । भूतात्मनामभिरिति । भूतशब्देन बीजैरात्मशब्देन नामभिः चतुर्भूतमनवः स्युरित्यर्थः । पृथिव्यात्मने इत्यादयो भूतमन्त्राः — ओं नमश्शिवाभ्याम् । श्रीमहागणपतये नमः । श्रीगुरुभ्यो नमः । ओं नमो नारायणाय नमः । नमः शिवाय । शिवायै नमः । हरिः । नमः शिवाय । हरिः ।

Colophon :

इति प्रपञ्चसारविवरणे त्रिंशः पटलः ।
विवरणं समाप्तम् ।

Author—Vijñāneśvara.

Remarks — The manuscript is much worn out. Many leaves are missing here and there.

॥ परमसंहिता ॥

No. 981 A. PARAMASAMHITĀ.

C. O. L. No. 688 A.

Substance—Palm leaf. Size—17″ × 2½″. Leaves—58. 11—13 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—2500. Complete.

Owner—Padmanābhan Bhaṭṭatiri, Kuzhikkāṭṭillam, Tiruvalla.

Subject—Exposition of the ways and means for the attainment of Salvation.

Beginning :

हरिः । श्रीगणपतये नमः ।

आसीनमाश्रमे रम्ये नानाद्रुम... ... ।
... ... ॥

... ... ।
... प्रचक्रमे विद्वान् परमं ज्ञानगोचरम् ॥

अधीता भगवन् वेदास्साङ्गोपाङ्ग... ... ।
श्रुतानि च मयाङ्गानि वाक्यावाक्ययुतानि च ॥

न चैतेषु समस्तेषु संशयेन विना क्वचित् ।
श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति ॥

आगमेऽपि न चै(क्स्मि)न् पश्यामि परमं हितम् ।

End :

यथाज्ञानमिदं लब्धं पावनानां सुपावनम् ॥
एवमेव करिष्यामि स्थितोऽस्मि वचने तव ॥

इत्येवं देवलः प्राप्य वैष्णवं ज्ञानमुत्तमम् ।
मार्कण्डेयं समामन्त्र्य निर्जगाम यथेप्सितम् ॥

य इदं शृणुयात्तन्त्रं वैष्णवं शुद्धमानसः ।
तस्य पापानि नश्यन्ति जन्मान्तरकृतान्यपि ॥

ज्ञात्वा तु य इदं तन्त्रमुपास्ते पुरुषोत्तमम् ।
अचिरेणैव कालेन तस्य देवः प्रसीदति ॥

यः पठेदादरादेतद्यः प्रार्थयति वा नरः ।
तस्यापि पापं क्षरति विष्णौ भक्तिश्च वर्धते ॥

तस्मादनेन मार्गेण पूजयेन्मधुसूदनम् ।
स्वर्गं वाप्यपवर्गं वा निर्व्याजमधिगच्छति ॥

Colophon :

इति पञ्चरात्रे परमसंहितायां सारसंग्रहे उपसंहारपटलः एकत्रिंशोऽध्यायः । परमसंहिता समाप्ता । हरिः । विष्णवे नमः।

Author :

Remarks—The leaves are much damaged. The work is in the form of a dialogue between Mārkaṇḍaya and Devala.

॥ चिन्तामणिः ॥

No. 981 B. CINTĀMAṆI.

C. O. L. No. 685 B.

Substance—Palm leaf. Size—17″ × 2½″. Leaves—9. 11—13 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—375. Complete.

Owner—Same as No. 981 A.

Subject—The worship of Bhūtanātha.

Beginning:

हरिः । श्रीगणपतये नमः ।

कैलासशिखरे भूतैः कदाचिद्विहरन् हरः ॥
पृष्टो देव्यात्रवीत्प्रीतो भूतनाथार्चनं प्रति ॥

साधु पृष्टं त्वया देवि! लोकानां हितकाम्यया ।
मन्त्रा ... करान्वक्ष्ये प्रतिष्ठाराधनादिषु ॥

ध्रूंनमः पराय गोप्त्रे नमः । मूलमन्त्रः
नमः परायेति विज्ञेयः रेवन्तायेति चापरम् ।

तव पुत्राय धीमहे तन्नः शास्ता प्रचोदयादन्ते पूर्णाहुत्यादिषु स्मृता ।

रेवन्ताय तथा शास्त्रे गोप्त्रे च प्रभवे तथा ।
दीप्त्रे चैव प्रशास्त्रे च षण्मन्त्रास्सर्वसिद्धिदाः ॥

End :

देवमाघोष्य सम्प्रीत्या तीर्थस्नानं समाचरेत् ।
पश्चान्मण्डलमासाद्य पञ्चगव्यैश्शकृद्विना ॥

कुशोदतिलसंयुक्तैः षण्मन्त्रैः स्नापयेद् गुरुः ।
अर्चयित्वा हरिद्रेण पुनः स्नाप्य निवेदयेत् ॥

आघोष्य गजमारुह्य ततो देवालयं व्रजेत् ।
पूर्ववत्स्नपनं कुर्यान्मूले चावाह्य देवताः ॥

Colophon :

इति चिन्तामणौ नवमोऽध्यायः ।
चिन्तामणिस्समाप्तः ।

Author :

Remarks —The Ms. is very old and much damaged.

॥ ललितम् ॥

No. 981 C. LALITAM.

C. O. L. No. 688 C.

Substance—Palm leaf. Size—17″ × 2½″. Leaves—5. 11 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas — 160. Complete.

Owner—Same as No. 981 A.

Subject—Rites relating to Śāstā.

Beginning :

हरिः ।

अथातस्सम्प्रवक्ष्यामि स्नपनस्य विधिं परम् ।
भूतिदं सर्वभूतानां भूतनाथस्य धीमतः ॥

पूर्वमाचार्यमाहूय शास्तृयागाय पूजयेत् ।
दत्त्वा तु दक्षिणां तत्र यथाविभवविस्तरम् ॥

परं यत्कार्यमुक्त्वा तु शास्त्रवत्प्रणिधाय च ।
ततो राक्षोघ्नकर्माणि कारयेद्विधिवद् गुरुः ॥

तक्ष्णां बलिसमाप्तौ च गोमयेनानुलेपयेत् ।
प्रविशेत गृहं विद्वानग्निकार्यविशारदः ॥

अग्निस्थानं विभज्यैतत् कुर्याद्राक्षोघ्नकर्मकम् ।
परिस्तीर्याग्निसंस्कारं कृत्वा लक्षणवद् बुधः ॥

समिधस्तत्र होतव्या अपामार्गमयास्तथा ।
शतमष्टोत्तरं हुत्वा हुम्मन्त्रेण(?) होमयेत् ॥

End :

कल्पयित्वा विधानेन आचार्यो मूर्तिपैस्सह ।
पूर्वं गुरुं च सम्पूज्य यजमानं च पूर्ववत् ॥

एतत्ते सर्वमाख्यातं यन्मया पृच्छितं मुने ।
शास्तृकल्पविशेषोऽयं न देयो यस्य कस्यचित् ॥

पूर्वं तु ब्रह्मणा प्रोक्तमीशानेन ततः परम् ।
तस्यापि परतः पूर्वमादिमूर्तिक्रमेण तु ॥

शास्तृयागविशेषोऽयमपूर्वं परमेष्ठिना ।
प्रणीतं सर्वकाम्याय भूतानां रक्षणाय च ॥

Colophon :

इति ललिते सप्तमः पटलः ।

ललितं समाप्तम् ।

Author :

Remarks—The above title is based on the colophon, occurring in various places.

॥ ज्ञानोदयः

No. 981 D. GÑĀNODAYA.

C. O. L. No. 688 D.

Substance—Palm leaf. Size—17″ × 2½″. Leaves—16. 9—11 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas — 500.

Owner—Same as No. 981 A.

Subject etc.—Same as No. 914 A.

Author :

Remarks—The Ms. comprises 8 paṭalas only. The whole work is composed in the form of a dialogue between Vināyaka and Maheśvara.

॥ प्रतिष्ठासंग्रहः ॥

No. 981 E. PRATIṢṬHĀSAṄGRAHA.

C. O. L. No. 688 E.

Substance—Palm leaf. Size—17″ × 2½″. Leaves—21.
10—12 lines per page and 48 letters per line.
Script—Malayāḷam. No. of Granthas—668.

Subject—The rites of consecrating different deities.

Beginning:

हरिः । श्रीगणपतये नमः ।

अन्तःस्फुरद्वादिसमस्तवर्ण-
व्याप्ताखिलोद्भासितसम्पदात्मा ।
सम्पूर्णशब्दार्थविचित्रवृत्त-
प्रदीप्तदेहा मम वागधीशात् ॥

यस्य प्रसादेन समस्तकर्मा-
ण्यविघ्नतस्सर्वजना लभन्ते ।
वन्दे तमीड्यं वरदं गणेशं
सुरासुराद्यैर्नमिताङ्घ्रिपद्मम् ॥

वन्दे शिवं शान्तमनादिमीश-
मव्यक्तमेकं परमद्वितीयम् ।
मायातिगं शाश्वतमप्रमेयं
गुह्यातिगुह्यं वरदं वरेण्यम् ॥

हरिं हरं स्कन्दगणेशशास्तॄन्
मार्ताण्डमर्द्धेशहरिं च कृष्णम् ।
दुर्गां च गौर्याद्यखिलां च नत्वा
तत्स्थापनासंग्रहमारभेऽहम् ॥

सर्वप्रतिष्ठास्वपि सर्वकर्मा-
ण्युक्तानि शास्त्रेष्वतिविस्तरेण ।
एकत्र सूत्रं त्वधिकृत्य चान्य-
स्योक्तिर्विशिष्टा क्रियतेऽत्र साधुः ॥

End :

इत्थं संस्थाप्य सम्पूज्य भुवनेशीं विधानतः ।
उत्सवं तीर्थयात्राश्च कुर्याद्विधिपुरस्सरम् ॥

अनुक्तमत्र यत्कर्म तत्सर्वं शैववत्स्मृतम् ।
इत्युक्तं स्थापनं गौर्याः संक्षेपात्सकलार्थदम् ॥

Colophon :

इति प्रतिष्ठासंग्रहे द्वादशः पटलः ।

Author :

Remarks—12 chapters are embodied in this Ms.

॥ विश्वामित्रसंहिता ॥

No. 981 F. VIŚVĀMITRASAMHITĀ.

C. O. L. No. 688 F.

Substance—Palm leaf. Size—17" × 2½". Leaves—69. 9—11 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—1900.

Owner—Same as No. 981 A.

Subject—An account of the festivals and sacrifices relating to the consecration of Gods.

Beginning :

ओं कश्यपः—

होमं कृत्वेति भगवन् भवताभिहितं मम ।
तत्प्रकारो न सन्दिष्टस्संक्षेपेणापि तं वद ॥

... ...ग्निकार्यस्य शृणुष्वावहितो मुने ।
दीक्षाविधौ प्रोक्षणे च प्रतिष्ठोत्सवयोरपि ॥

प्रायश्चित्तेषु सर्वेषु स्नपने च विशेषतः ।
एवमादिषु चान्येषु सर्वेष्वपि च कर्मसु ॥

सामान्येन वदाम्यद्य हवनं शृणु सुव्रत! ।
पचनालयमासाद्य प्रक्षाल्य चरणावुभौ ॥

आचान्तस्तस्य याम्यांशे कुर्वन् कुर्याच्च लक्षणम् ।

End :

द्वादश्यां कर्म निर्माय सन्ध्योपासनपूर्वकम् ॥

फलानि तानि सर्वाणि पृथक् सङ्कल्प्य राशयः ।
... ...धनार्हाणि शोधयेत् ॥

महाभिजनसंयुक्तो विप्रैश्शुद्धैर्जितेन्द्रियैः ।
उष्णीषपिहितास्यैश्च जिह्वाचापलवर्जितैः ॥

निस्त्वक्करणयोग्यानि निःस्वञ्च परिकल्प्य च ।
यथा च स्थितरूपेण शोधनार्हाणि शोधयेत् ॥

क्षालनार्हाणि संक्षाल्य कदलीदलसञ्चये ।
महाहविःप्रकारेण भगवन्तं निवेद्य च ॥

Colophon :

इति श्रीपञ्चरात्रे महोपनिषदि विश्वामित्रसंहितायां कल्हारोपणं नाम पञ्चविंशोऽध्यायः ।

Author :

Remarks—Chapters between 11 and 26 are alone extant in this Ms. Further details about consecratory rites such as Homa, Svapana, etc., also form a part of this work. The leaves are much worn out. No. colophon is seen at the end of the last chapter.

॥ पाञ्चरात्रसम्बन्धादिविचारः ॥

No. 982. PĀÑCARĀTRASAMBANDHĀDI-VICĀRA.

C. O. L. No. 344.

Substance—Paper. Size—14″ × 8½″. Pages — 36. 19 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas — 400. Incomplete.

Owner—C. O.

Subject—An account of the greatness of the work Pāñcarātra and the fourfold unions.

Beginning :

नमोऽशेषसुरारातिदैत्यनाथप्रमाथिने ।
वियदादिजगत्सर्गस्थितिनाशैकहेतवे ॥

जगत् कृत्स्नं सदा व्याप्या युगपद्यस्य संस्थितिः ।
निरञ्जनाय सूक्ष्माय तस्मै ज्ञानात्मने नमः ॥

नारदः सुमहद्भूतमित्यादिपञ्चरात्रशास्त्रस्य कानि संबन्धाभिधेयप्रयोजनानि । तदुच्यते—

महानवान्तरश्चैव दिव्योऽदिव्यश्च मानुषः ।

कोलश्च इति पोढा संबन्धः भगवता वासुदेवेन सकलावस्थेन समस्तं पञ्चरात्रशास्त्रमभिहितमिति महान् संबन्धः ।

End :

दृष्टदुःखप्रशमनं सर्वबाधाविनाशनम् ।
पुण्यं पवित्रं मङ्गल्यं सर्वपापहरं शुभम् ॥

शिरसा मानवश्रेष्ठ! काल्यमुत्थाय धारयेत् ।
रुक्ममाषकदानस्य फलं विप्राः पदे पदे ॥

पुरुषस्तु समाप्नोति यः करोति प्रदक्षिणम् ।
इति ।
तस्माद्वैष्णवपा... ... ... ॥

Colophon :

Author :

Remarks—The Ms. does not possess any colophon informative of the author's personal identity.

॥ पाशुपततन्त्रम् ॥

No. 983. PĀŚUPATATANTRAM.

C. O. L. No. 323.

Substance—Palm leaf. Size—9″ × 2″. Leaves—86. 10 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1700.

Owner—C. O.

Subject—The Tantrik worship of Śiva, Skanda, Devi and other Gods.

Beginning :

हरिः । श्रीगणपतये नमः ।

अजस्य बुद्धौ यत्तत्त्वमगोचरमवाङ्मयम् ।
विश्वव्यापि सदानन्दमेश्वरं तदुपास्महे ॥

एकापि या विभाति व्यापाराकारनामभिरनेकेव ।
तामेकां शिवशक्तिं नौमि सदानन्दविग्रहां... ॥

ओं त्र्यम्बकं सुखासीनं दधीचो नन्दिकेश्वरम् ।
पप्रच्छ सर्वतन्त्राणामुत्पत्तिं मुनिपुङ्गव ॥

स्मृत्वा हृदि शिवं शान्तमणीयांसमणोरपि ।
प्रोवाच भगवान्नन्दी तन्त्रोत्पत्तिं सदागमाम् ॥

End :

... ...श्रीसूक्तेन गृहं नयेत् ।
स्थापयेन्मूलबीजेन भूर्भुवःसुवरोमिति ॥

बन्धयित्वाष्टबन्धेन जीवं बिम्बे नियोजयेत् ।
अध्वन्यासं क्रमात्कृत्वा देवीं यथाविभवविस्तरम् ॥

द्वाःस्थादिदेवताः स्थाप्यास्ताभ्यो.... ... . ।
... ...त्रीण्यहानि बहिर्यजेत् ॥

Colophon :

इति पाशुपते तन्त्रे नन्दिप्रोक्ते द्वादशः पटलः ।
इति पाशुपते गुह्यतन्त्रे प्रथमः पटलः ।

Author :

Remarks—The Ms. opens with a dialogue between Dadhīca and Nandikeśvara. The leaves are much decayed. The invocation of each deity is expounded in separate paṭalas as evident from "यथा...इति स्कन्दभागे द्वितीयः पटलः"

॥ पुष्पाञ्जलिविधानम् ॥

No. 984 A. PUṢPĀÑJALIVIDHĀNAM.

C. O. L. No. 969 A.

Substance—Palm leaf. Size—14" × 1¼". Leaves—22. 6 lines per page and 56 letters per line. Script — Malayāḷam. No. of Granthas — 50. Complete.

Owner—Śrī Nārāyaṇan Govindan Nambūripād, Cheṅganāśśeri.

Subject—Invocation of deities by offering flowers.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ पुष्पाञ्जलिविधानं यथोपदेशमुच्यते—

श्रीनारदादिसिद्धगुरुभ्यो नमः । परमभागवतेभ्यो विष्णुभक्तेभ्यो नमः । अस्मत्परमगुरुभ्यो नमः । अस्मत्परापरगुरुभ्यो नमः । गुं गुरुभ्यो नमः । गं गणपतये नमः । (मं?) पं परमात्मने नमः । सुदर्शनेन त... ...लत्रया(दि)दिग्बन्धनं कृत्वा विंशतिमनुना प्राणायामं कृत्वा पुनः पीठन्यासप्रकारस्तु गुं गुरुभ्यो नमः इति मूर्ध्नि । गं गणपतये नमः इति मूलाधारे । आधारशक्त्यै नमः इति गुह्ये । अनन्ताय नमः इति स्वाधिष्ठाने । पृथिव्यै नमः इति नाभौ । शेषं धर्मादिस्थानेषु न्यसेत् ॥

पुनर्वैष्णवविधानवत् सर्वम् ॥

End :

अथ गुरुगणपतिवन्दनपूर्वकं तालत्रयादिकं कृत्वा तारेण त्रीन् प्राणायामान् विधाय रेचकादिकं मकाराकारोकारैः कृत्वा × ×
× × × × ×
× × × × ×
अमात्मने नमः । उमन्तरात्मने नमः । मं परमात्मने नमः । इति हृदये सम्पूज्य मूध्नर्यष्टाक्षरेण सम्पूज्य किरीटमन्त्रेण पुष्पाञ्जलिं त्रिधा कृत्वा गन्धेनानुलेपनं कृत्वा मानसैरुपहारैरात्मानमर्चयेत् ॥

Colophon :

Author :

Remarks—The Ms. describes the offering of flowers to various gods. It gives the Ṛṣis and metres of some mantras.

॥ त्रिष्टुब्विनियोगक्रमः ॥

No. 934 B. TRIṢṬUBVINIYOGAKRAMA.

C. O. L. No. 969 B.

Substance—Palm leaf. Size—14" × 1¾". Leaves—41. 6 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—400. Complete.

Owner—Same as No. 984 A.

Subject—Application of Triṣṭup mantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नमो निरङ्कुशैश्वर्यगुणायागण्यशक्तये ।
हेरम्बायाम्बिकेयाय विघ्नसङ्घातघातिने ॥

अथ सकलकल्याणकल्पलतिकायास्समस्ताभिलषितचिन्तामणिरेखाया निखिलसुखविधानकामधेनोरशेषरिपुकुलदुरितकुलराशिनिश्शेषीकरणप्रलयानलकोलाहलज्वालामालायाः कृत्स्ननिगमसारविद्यायास्त्रिष्टुभो विनियोगक्रमो गुह्यतमः सङ्गृह्य लिख्यते ।

End :

दह्यमान इति ध्यात्वा दशाग्निं प्रजपेत् सुधीः ।
तालानेकादशमितान् मध्यतालास्थितं रिपुम् ॥

प्रद(ग्नंग्धं) तैर्निपतितैः परितश्चण्डवायुना ।
ध्यात्वा प्रजपतः शत्रुविनाशादिसुखं भवेत ॥

समाप्तमिदम् ।

Colophon :

श्रीसरस्वत्यै नमः । श्रीमहागुरुभ्यो नमः । श्रीदुर्गायै नमः । शिवमस्तु । शिवमस्तु ।

Author :

Remarks—Several sacrificial rites are set forth herein along with certain hymns for destruction of enemies.

॥ पूजाकलशोत्सवप्रकारः ॥

No. 935. PŪJĀKALAŚOTSAVAPRAKĀRA.

C. O. L. No. 733.

Substance—Paper. Size—11″ × 9″. Pages—183. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—2300. Complete.

Owner—C. O.

Subject—Explication of the religious rites regarding worship, and purification of different divinities.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमद्गुरून् गणेशं वाणीं विष्ण्वादिसर्वदेवांश्च ।
नत्वा लिखामि पूजाविशुद्धिकलशोत्सवक्रियाभेदान् ॥

आचार्यो यथाविधि स्नात्वाचम्य वर्धनीकरः प्रासादद्वारा द्वाःस्थाभ्यामर्घ्यं दत्त्वानुज्ञां गृहीत्वा वायुबीजेन द्वारमुद्घाट्याग्रसूत्रमनाक्रमन् दक्षिणाङ्घ्रिपुरःसरं ततः प्रविश्य पुष्पमाराध्य संवन्द्य तद्दक्षिणे सुखासीनो भूत्वा गुरुवन्दनादिकं कुर्यात् ।

End :

भूयः श्रीभूतबलिकरणे भौतिदूरं भवेद्वा
त्रानीयेऽभः सपदि विकिरेत् पूतभूते बलिं तु ।
अत्राप्येते दरगवयसा कौतुके सप्तशुद्धिं
कृत्वा श्रीभूतबलिमखिलं बिम्बशुद्धिर्विधेया ॥ (?)

तीर्थारूपाराचितावस्त्वपूता-
वेते पुण्याहःक्षणं(?) सप्तशुद्धिम् ।
कृत्वा कर्मीकम्बुकेनाब्धिमिष्ट्वा
स्नात्वेष्ट्वोद्वास्यानयेदालयान्तः ॥

Colophon :

इति सामान्यविधिः ।

Author :

Remarks—The Ms. explains the rites of invoking Śāsta, Śiva and other deities. Again purification, consecration and other rituals pertaining to gods form the main contents of the work.

॥ प्रतिष्ठातन्त्रम् ॥

No. 986. PRATIṢṬHĀTANTRAM.

C. O. L. No. 321.

Substance—Paper. Size—11″ × 9″. Pages—132. 20 lines per page and about 16 letters per line. Script—Devanāgarī. No. of Granthas—1320.

Owner—C. O.

Subject—The rites of consecrating idols.

Beginning :

अतः परं प्रवक्ष्यामि विमानस्थापनमुत्तमम् ।
सर्वपापहरं पुण्यं सर्वसिद्धिकरं शुभम् ॥

हैमेन वाथ तारेण ताम्रेण शिलया तथा ।
इष्टिकादारुभिर्वाथ हर्म्यं कृत्वा तु लक्षणम् ॥

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने ।
शुभवारादिभिर्युक्ते प्रतिष्ठां सम्यगाचरेत् ॥

विमानस्थापनाहीने तेन हर्म्येण निष्फलम् ।
तस्मात् सर्वप्रयत्नेन प्रासादस्थापनं कुरु ॥

End :

प्रासादोत्तुङ्गशिखरैश्चन्द्रातपसमप्रभैः ।
कोकिलारावमधुरैः शिखिषट्पदसेवितैः ॥

हंसकारण्डवाकीर्णैश्चक्रवाकोपशोभितैः ।
सारसारवसंघुष्टैः पद्मिनीषण्डमण्डितैः ॥

तटाकैः स्वच्छतोयैश्च दीर्घिकाभिश्च मोहितैः ।
पुरुषैश्च महाकान्तैर्महाबलपराक्रमैः ॥

सर्वैश्वर्यस्वरूपाद्यैः सर्वलक्षणसंयुतैः ।
दिव्यवस्त्रसुताम्बूलैर्दिव्यगन्धानुलेपनैः ॥

Colophon :

इति रसार्णवे रसदीक्षाविधानं नाम द्वितीयः पटलः ।

इति कारणे प्रतिष्ठातन्त्रे अष्टमीयजनविधिपटलः ।
इत्यन्योगजे(?) प्रतिष्ठातन्त्रे क्षेत्रपालार्चनविधिपटलः ।

इति सुप्रभेदागमे महेश्वरमहागणपतिसंवादे योगपादादिनाडी-चक्रपटलः ।

इति कारणे प्रतिष्ठातन्त्रे यागमण्डपलक्षणविधिपटलः ।

Author :

Remarks—The Ms. sets forth the principles as to how idols have to be moulded and the religious rites therefor. The subject-matter of the work is only a summary of the details contained in several Tantra treatises.

॥ प्रतिष्ठातन्त्रम् ॥

No. 987. PRATIṢṬHĀTANTRAM.

C. O. L. No. 689.

Substance—Palm leaf. Size—25″ × 2″. Leaves—268. 8—9 lines per page and 96 letters per line. Script—Malayāḷam. No. of Granthas—13700. Complete.

Owner—Parameśvaran Namb̄ūri Avl., Vaikom.

Subject—Tantram.

Beginning :

श्रीमहागणपतये नमः । अनन्तरायमस्तु ।

आसीद् ग्रन्थो महानत्र धर्मका(मा)र्थकारणात् ।
वर्णानां च हितार्थं तु देवाद् विष्णोस्सनातनात् ॥

क्षीरार्णवे महारम्ये नानारत्नसमावृते ।
देवदेवं नमस्कृत्वा प्रणम्येदं तथैव च ॥

... ...

देवदेव नमस्तेऽस्तु लोकनाथ नमोऽस्तु ते ।
तन्त्रं तु श्रो(तुमिच्छामि) देवदेव सनातन ॥

तन्त्रोत्पत्तिः कथं देव कथं तन्त्रं तु लक्षणम् ।
कस्मादुत्पद्यते तन्त्रं कति तन्त्राणि सन्ति च ॥

शिष्याश्चैव कति प्रोक्तास्तेषां नामानि नो वद ।

End :

तस्मादेवोत्तमं ज्ञात्वा तन्त्रमार्गं समाचरेत् ॥

नानायोगपरं ना.... ....देहि यो वरं... ....त ।
नानादेवैः स्तुतं ग्रन्थं नानाऋषिभिरार्चितम् ॥

तस्मात् सततमभ्यर्च्य सततं प्रणमेदिदम् ।
सततं संस्मरेदेनं यथा देवं यथा गुरुम् ॥

प्रथमं शिवभागं तु विष्णुभागमनन्तरम् ।
तृतीयमुभयं ज्ञेयं ब्रह्मभागं चतुर्थकम् ॥

पञ्चमं विष्णुभागं स्याच्छास्तृभागं तु षष्ठकम् ।
सप्तमं स्कन्दभागं तु रविभागं तथाष्टमम् ॥

नवमं कन्यकाभागं दशमं मातृसंज्ञितम् ।
शेषभागमतः प्रोक्तं पूजाभागमनन्तरम् ॥

प्रोक्तं ते द्वादशं भागं द्वादशाश्वाससंयुतम ।
पृथक् पृथक् सुविज्ञेयं प्रमाणं च सुपठ्यते ॥

यस्सर्वं स सदा वेत्ति देवेन सह मोदते ।

Colophon:

इत्यादिपुराणे प्रतिष्ठातन्त्रे देवोद्भवे पूजाभागः समाप्तः ।

श्रीदुर्गायै नमः ।

पूजांशोदयतारनाहसदृशं वाष्टद्वयांशं भजेत्
तद्भागेन गुणेषुधातुनवकं रुद्राधिकांशोदयम् ।
हीनं वापि समानमानमुदितं संख्यास्त्रयस्त्रिंशति-
र्वेराणां हि शिवांशमानवगताः स्वायम्भुवे मानवे? ॥

Author:

Remarks—The work is borrowed from Ādipurāṇa. The following is also embodied in this Ms.

शिवभागे	१२	आश्वासाः	रविभागे	१२	आश्वासाः
विष्णुभागे	१२	,,	दुर्गाभागे	१२	,,
उभयभागे	१२	,,	मातृभागे	१२	,,
ब्रह्मभागे	१२	,,	शेषभागे	१२	,,
विघ्नभागे	१२	,,	पूजाभागे	१२	,,
शास्तृभागे	१२	,,	एवं ११४ आश्वासास्सन्ति ।		
स्कन्दभागे	१२	,,			

।। प्रतिष्ठातन्त्रम् ॥

No. 988. PRATIṢṬHĀTANTRAM.

C. O. L. No. 1892.

Substance—Palm leaf. Size—14½" × 1½". Leaves—75. 6—7 lines per page and 28—34 letters per line. Script—Malayāḷam. No. of Granthas—1500.

Owner—Vaṭṭappaḷḷi Sthānikar, Śucīndram.

Subject—Beginning—End : Same as No. 986.

Colophon :

इति रस....यां रसार्णवे मन्त्रन्यासपटलः ।

कूश्माण्डविधानम् ।

Author—Vāsudeva Śarma.

Remarks—The following colophons show that the work is a compendium of the details contained in Rasārṇava Samhita etc.

'इात कारणे प्रतिष्ठातन्त्रे विमानस्थापनपटलः' 'इति सुप्रभेदागमे नाडीचक्रविधिपटलः' 'इत्यागजे प्रतिष्ठातन्त्रे क्षेत्रपालार्चनविधिपटलः' 'अष्टम्युद्भवपटलः' यन्त्रविधानं कूश्माण्डविधानम्' इति 'इति रस...यां रसार्णवे यन्त्रन्यासपटलः' ।

॥ प्रतिष्ठाविधिदर्पणः ॥

No. 989. PRATIṢṬHĀVIDHIDARPAṆA.

C. O. L. No. 233.

Substance—Paper. Size—13½" × 9". Pages—272. 20 lines per page and 11 letters per line. Script—Devanāgarī. No. of Granthas—1870. Complete.

Owner—C. O.

Subject—The rites for worshipping Viṣṇu according to the School of Vaikhānasa.

Beginning :

यः सर्वलोकैरपि वन्दनीयः

स्मृतिं शुभां यच्छति यो नराणाम् ।

तस्मै नमो यः कुलदेवता नो
वराहदेवो हृदि सन्निधत्ताम् ॥

लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया ।
रक्षकः सर्वसिद्धान्ते वेदान्तेषु च गीयते ॥

नारायणः पिता यस्य माता चापि हरिप्रिया ।
भृग्वादिमुनयः पुत्रास्तस्मै विखनसे नमः ॥

प्रणम्य विष्णुं परमेष्ठिनं च
वैखानसं तं भृगुकाश्यपादीन् ।
मरीचिमत्रिद्गुरुमागमज्ञान्
श्रीवाजपेयान्वयमाधवार्यान् ॥

तेषां प्रसादान्नरसिंहयज्वा-
हमग्निचित् ...कृतवाजपेयः ।
विष्णुप्रतिष्ठाद्यखिलं च कर्म
वक्ष्ये यथाबुद्धि यथागमोक्तम् ॥

End :

कुर्यात् प्रयत्नेन कृतिं सचित्ति-
र्नो चेत् स पापी नरकातिथिः स्यात् ।
भक्त्यार्चयेत् तस्य हरिः प्रसन्नः
सर्वं ददातीह परं पदं च ॥

भृग्वादिग्रन्थेषु विशेषतोक्तं
यत्नात् सुसङ्गृह्य मयात्र चोक्तम् ।
सुसूक्ष्मदृष्ट्यात्र मयोदितानि
विचार्य कुर्यादखिलानि विष्णोः ॥

Colophon :

श्रीवाजपेयक्रतुदर्पणं स्यात्
कालान्तरत्वात् स्फुटिताक्षरं हि ।
तद्वासुदेवाख्यबुधेन शोधितं
तत्क्षम्यतां श्रीरमणश्च सन्तः ॥

श्रीमत्प्रतिष्ठाविधिदर्पणेऽस्मिन्
श्लोका नृसिंहेन कृतास्सुगूढाः ।
साशीतिपद्याधिकशतत्रयाढ्या
साहस्रसंख्याः प्रकरेषु मुख्याः ॥

श्रीवाजपेयक्रतुदीक्षितेन
नृसिंहनाम्नाग्निचिता प्रणीते ।
विष्णुप्रतिष्ठाविधिदर्पणेऽस्मिन्
कृत्वोत्सवे(?) चित्तिविशेषकोऽत्र ॥

श्रीमाधवाचार्यसूनुश्रीवाजपेययाजिनरसिंहयज्वना कृते प्रतिष्ठाविधिदर्पणे वैखानसे सकलागमसारसंग्रहे भूपरीक्षादिप्रायश्चित्तान्तं विंशतिप्रकरणं समाप्तम् ।

Author—Nṛsimhayajva, son of Mādhavācārya.

Remarks—The whole work is composed in verse. The statement "वासुदेवाख्यबुधेन शोधितम्" proves that one Vāsudeva must have corrected mistakes that occurred in the work. The author himself says that the subject-matter comprises several topics dealt with in similar other treatises. Twenty prakaraṇas are included herein.

॥ प्रतिष्ठासंग्रहः ॥

No. 990. PRATIṢṬHĀSAṄGRAHA.

C. O. L. No. 400.

Substance—Palm leaf. Size—14″ × 9″. Leaves—81. 17 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas — 680. Complete.

Owner—C. O.

Subject etc.—Same as No. 981 E.

Author :

Remarks—The Ms. comprises 12 paṭalas only.

॥ प्रयोगमञ्जरी ॥

No. 991. PRAYOGAMAÑJARĪ.

C. O. L. No. 20.

Substance—Paper. Size—12½″ × 8½″. Pages—196. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1950.

Owner—C. O.

Subject—Exposition of the rites of renovating damaged temples and consecrating the idols of Śiva and other gods.

Beginning :

श्रीः ।

रविकृता ।

बुद्धेरात्मभुवोऽप्यभूमिममलं यत् तत्त्वमाहुर्बुधा
भेदो यस्य जगन्मयस्य बहुधाप्यौपाधिको लक्ष्यते ।
देहैः स्वापचितिक्रमानभिदधे मन्त्रात्मभिः श्रेयसे
यो वा देहभृतां हिमालयसुतानाथाय तस्मै नमः ॥

End :

भक्त्या पदाम्बुजसमर्पितया स्मरारे-
स्त्रैलोक्यसृष्टिविलयस्थितिकारणस्य ।
आराधितस्य सुचिरेण गुरोः प्रसाद-
लाभेन च क्षपितविश्वमनोमलेन ॥

शिवपुरसद्ग्रामभुवा विध्यर्पितसोमपाशुदधेः ।
काश्यपगोत्रप्रभुणा मारकुलाब्जवनहंसेनम्? ॥

चम्पतटाकमनोतीरारामस्थशास्त्रगुप्तेन (?) ।
प्रथितभवत्रातकुलध्वजभूतेनाष्टमूर्तिभुवा ॥

रविणा हरपादाब्जभृङ्गेण रचिता कृतिः ।
प्रयोगमञ्जरी नाम सङ्क्षेपकुसुमोज्ज्वला ॥

विचित्रवृत्तच्छदसम्प्रदीप्ता
प्रयोगमञ्जर्यवतंसभूमौ ।
... ...
सतां नवेयं पदमादधातु ॥

Colophon :

इति प्रयोगमञ्जर्यां जर्णोद्धारविधिरेकविंशतिः पटलः ।

समाप्ता चेयं प्रयोगमञ्जरी ।

Author—Ravi.

Remarks—The concluding lines show that the author, a native of Śivapurarāma, was the son of Aṣṭamūrti of Kāśyapa gotra.

॥ प्रयोगमञ्जरी ॥

No. 992 A. PRAYOGAMAÑJARĪ.

C. O. L. No. 1796 A.

Substance—Palm leaf. Size—14½" × 1½". Leaves—71. 4 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—425. Incomplete.

Owner—C. O.

Subject and Beginning—Same as No. 991.

End :

शैवांशस्य विभज्य सप्तदशधा दीर्घेण संवर्तयेद्
द्वाभ्याञ्च त्रपुषञ्च पञ्चदशधा छत्रामकेन च ।
द्वाभ्यां वालशशाङ्कसन्निभमतो विंशद्भिरेकान्वितै-
रेकोनैरथ कुक्कुटाण्डसदृशं विंशद्भिरङ्गं त्रिभिः ॥

छत्राकारशिरश्चतुर्विधमभूद्विप्रादिवर्णक्रमात्
पूजाभागमथाष्टधा विभजिते भङ्क्त्वा चतुर्थान्वितम् ।
एकैकं परिवर्तयेत्क्रमवशादंशं यथावर्णतः
कर्तव्यश्च विभूतिदं परमिदं स्थानस्य कर्तुस्सदा ॥

एषां च लिङ्गं परिकल्प्य चै.... .... ।
.... ॥

Colophon:

इति प्रयोगमञ्जर्यां शिलालक्षणपटलस्समाप्तः ।

Author:

Remarks—The Ms. includes 7 paṭalas and 50 verses in the 8th. The leaves are much worn out.

॥ रेखाप्रश्नः ॥

No. 992 B. REKHĀPRAŚNA.

C. O. L. No. 1796 B.

Substance--Palm leaf. Size—12½" × 1¼" Leaves—8. 5 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—60.

Owner--Same as No. 992 A.

Subject—Palmistry.

Beginning :

മണ്ഡലത്താനന്തിക്കുമനഷ്ട്ടു കെല്പാം മാക്കണ്ഡനാൽപ്പ
ണ്ടു പ്രമക്കുപ്പെറപുനാശം വസിക്കുമേടം(?)
ബ്രാഹ്മണക്ഷത്രിയവൈശ്യശൂദ്രർമി നിറംകൊണ്ടും സ്വാദു
കൊണ്ടും ഗ(ന്ധം)കൊണ്ടും ചെല്ലുപ്പെട്ടുൻറു.

End :

ബ്രാഹ്മണൻ വരുകിൽ ബ്രഹ്മരാക്ഷസനുണ്ടെൻറു. ഒരു
സ്ത്രീ വരികിൽ ദേവതയുണ്ടെൻറു, ചെറുടീ... ... ...
... ...കക്ക് ഒരു പെയാണ്ടെൻറു. അല
ക്ഷകൻ വരുകിൽ കള്ളനു... ... ...മെൻറു.

Colophon :

ദേവപ്രശ്നം സമാപ്തം.

Author :

Remarks—In spite of the title the work runs on the lines of Ārūdhapraśna.

॥ प्रयोगमञ्जरीव्याख्या (प्रद्योतः) ॥

No. 993. PRAYOGAMAÑJARĪVYĀKHYĀ (Pradyota).

C. O. L. No. 693.

Substance—Palm leaf. Size—19″ × 2″. Leaves—162. 8—9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—4100. Complete.

Owner — Padmanābhan Nārāyaṇan Bhaṭṭatiri, Tukalaśśeri, Tiruvalla.

Subject—Tantra.

Beginning :

गणपतये नमः ।

बुद्धेरित्यादि—यत्तत्त्वं यस्य तत्त्वं वास्तवम् आत्मन इव ब्रह्मणो बुद्धेरभूमिमविषयमाहुः बुधाः पण्डिताः । तर्हि कथं स गृह्यते, (तत्र)आह—भेदो यस्येति । यस्य शिवस्य भेदो वास्तव इ(त्याह?व) बहुधा लक्ष्यते इन्द्रचन्द्रादि...घटपटादिरूपेण वा । न च स भेदो वास्तव इत्याह—औपाधिक इति । उपाधिभेदाद् भेदः, न स्वाभाविक इत्यर्थः ।

End :

पुनरपि कीदृग्भूतेन । भवत्रातपुत्रस्याष्टमूर्तेः सूनुना रविनाम्ना कृता प्रयोगमञ्जरीति सम्बन्धः ।

Colophon :

हुताशनादित्यमुखेन्दुभारती-
मयूखसम्बोधितबोधकैरवैः ।
संस्थापनं ज्ञानकृपोपस्कर-
प्रयोगमञ्जर्यमलार्थकं सुरः (?) ॥

इति प्रद्योते प्रयोगमञ्जरीविवरणे एकसप्ततिः पटलः । प्रयोगमञ्जरीविवरणं समाप्तम् ।

नमः शिवाय देव्यै च यदनुग्रहमन्तरा ।
भोगमोक्षौ न जगतस्ताभ्यां नित्यं नमो नमः ॥

Author—Trivikrama.

Remarks :

॥ प्रयोगमञ्जरीव्याख्या (प्रद्योतः) ॥

No. 994. PRAYOGAMAÑJARĪVYĀKHYĀ (Pradyota).

C. O. L. No. 730.

Substance—Palm leaf. Size—20$\frac{5}{2}$" × 2". Leaves—130. 7 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3700.

Owner—C. O.

Subject—Exposition of tenets of Śakta cult.

Beginning :

हरिः श्रीगणपतये नमः । अविघ्नमस्तु ।

नमः शिवाय चित्तात्मदुर्विकासविकासिने ।

... ...

... ...

त्रिविक्रमोऽहं मञ्जर्या व्याख्यां कुर्वे यथाश्रुतम् ।
तिरोहितार्थवाक्यानां पदानां वा यथामति ॥

स्वार्थ... ... ...

... ... रणचर्याज्ञानक्रियायोगानुष्ठानफलसिद्ध्युपायप्रतिष्ठाकर्मप्रकरणमारिप्सुः सर्वे ... .

...स्य सम्बन्धाभिधेयप्रयोजनान्यपि बुद्धेरात्मभुव इत्याद्येनाद्यश्लोकेन सूच... ....केयमीश्वर इति ।

End—Same as No. 993.

Colophon :

इति प्रद्योते प्रयोगमञ्जरीविवरणे एकविंशतिः पटलः ।

निखिलागमार्थसारप्रयोगमञ्जर्यगाधकमलिन्याः ।
प्रसृता त्रिविक्रमाख्याद् व्याख्या प्रद्योत एष बोधाय ॥

इति मञ्जरीविवरणं समाप्तम् ।

Author—Trivikrama.

Remarks—The commentary is elaborate. Much information on the history of Kerala is also furnished herein.

॥ प्रयोगरत्नाकरः ॥

No. 995. PRAYOGARATNĀKARA.

C. O. L. No. 857.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—192. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—3450.

Owner—Sūryan Bhaṭṭatiri.

Subject—Exposition of Tantras.

Beginning :

हरिः । श्रीगणपतये नमः ।

लक्ष्मीचरणयोर्द्वन्द्वं दि(त्याश्रया)दस्मन्मनीषितम् ।
वक्षो यन्मुद्रितं श्लाघ्यं धत्ते स पुरुषोत्तमः ॥

पुस्तकाक्षगुणज्ञानमुद्रावरदमुद्रिता ।
भारती मन्मनोरङ्गं गाहतां हंसवाहना ॥

पाशाङ्कुशकपालेन्दुनेत्रत्रयविभूषिताम् ।
विश्वस्य जननीं शक्तिं शैवीं वन्दामहे वयम् ॥

ईशानं सर्वविद्यानां गुरूणां परमं गुरुम् ।
प्रणम्य शङ्करं वन्दे गुरून् विश्वहितैषिणः ॥

उद्धृत्य सर्वतन्त्रेभ्यो नृपाणां प्रथमं बलम् ।
चतुर्वर्गफलावाप्त्यै मन्त्रयोगान् प्रचक्ष्महे ॥

सम्मोहनादितन्त्रेषु दृष्ट्वा भूयोऽनुभूय च ।
दश कर्माणि वक्ष्यामि देशिकानां विभूतये ॥

End :

मरिचं कपिनिर्यासरोगयुङ्मधुसंप्लुतम् ।
कदलीफलतोयेन युक्तं द्रावणवश्यकृत् ॥

कर्णिकारस्य निर्यासं कर्पूरं कैतकं रजः ।
रसं मधुविलं पिष्ट्वा पिप्पल्या शिवलेपतः ॥

आजीवितस्य सम्पातभुक्तस्त्री वशगा भवेत् ।
कर्पूरं सैन्धवं क्षौद्रं टङ्कणं बृहतीफलम् ॥
माहिषश्रोत्रमलवल्लेपो द्रावणवश्यदः ।

Colophon :

श्रीमद्गौतमगोत्रजः श्रुतिनिधिर्वेदग्द्यवाराकरो
वेदाभ्यासपवित्रमन्थरसुखः सौजन्यदीक्षागुरुः ।
लीलोद्यानभुवश्चतुर्दशविधं विद्याकुलं यस्य वा
यं चारावमुतार्यधीरमतयो(?) जानन्ति नाम्ना भुवि ॥

आहुर्यं परमेश्वरेण सदृशं मन्त्रेषु तन्त्रोत्तरे-
ष्वामुष्यायणमार्यमिश्रमचतुर्वक्त्रं प्रजानां पतिम् ।
किञ्चान्यत् कवितास्वयंवरपतिःश्रीकाठकान्याभिधः
सोऽयं पुत्रमजीजनत् स्वगुणितं श्रीवासुदेवाभिधम् ॥

सोऽयं चात्मपितुः प्रसादसुमुखादासाद्य पुण्यैर्निजै-
र्मन्त्रग्राममनेकमद्भुतमहाशक्तिं सकर्मक्रमम् ।
नैकैस्तीर्थकविग्रलाभविभवैर्दूरीकृतप्रक्रमः
सिद्धिं प्राप च देशिकेन्द्रमहितां तन्त्रेषु मन्त्रेषु च ॥

आलोच्यागमसागरेषु बहुधा संकीर्णकल्पान् मनून्
क्वापि क्वापि वियुक्ततः स्थितवतस्तात्पर्यपर्याकुलान् ।
तन्त्रानप्यसमग्रविग्रहयुतान् पूर्वैर्नरेन्द्रैः कृतान्
तत्खेदालसदेशिकप्रणयिना तेनेति तन्त्रं कृतम् ॥

नानारागजसङ्चया परिमितैः श्लोकैर्निबद्धं महा-
मन्त्रैस्तन्त्रविभूषणैः क्रमयुतैः स्वाङ्गैः स्वकर्मक्रमैः ।
तन्त्रं यन्त्रविमुद्रितं चिरमिदं स्थेयान्नरेन्द्रार्चितं
भूयो भूपतिवैभवप्रणयिनां सत्प्राभृतामन्त्रणम् ॥

इति श्रीवासुदेवीये मन्त्रपादे प्रयोगरत्नाकरापरनामधेये संवननविधिर्नाम द्वादशः पटलः । प्रयोगरत्नाकरं समाप्तम् । नारायणभूसुरेण लिखितमिदम् ।

Author—Vāsudeva.

Remarks—The colophon indicates that the author owed his knowledge of Sanskrit to his father and that he belonged to Gautamagotra.

॥ प्रयोगसारः ॥

No. 996. PRAYOGASĀRA.

C. O. L. No. 850.

Substance—Palm leaf. Size—19½" × 2". Leaves—9. 8 lines per page and 105 letters per line. Script—Malayāḷam. No. of Granthas—3750.

Owner—Sūryan Bhaṭṭatiri, Kāḷaḍi Mana, Kottayam.

Subject—Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
स्वस्ति ।

End—Same as No. 1111, DCSMMPL.

Colophon :

इति प्रयोगसारे शकुनपटलः सप्तविंशः ।
प्रयोगसारस्समाप्तः ।

शिवमस्तु ।

नाम्ना प्रयोगसारं प्रयोगसारं तथार्थतश्चापि ।
व्यलिखत् काश्यपगोत्रे जातो रामाख्यभूसुरो ग्रन्थम् ॥

बिन्दुसञ्छिपिविचित्रवीथिका-
शृङ्गभङ्गपदपङ्क्तिदूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं
क्षन्तुमर्हति समीक्ष्य सज्जनः ॥

Author—Govinda.

Remarks—The Ms. covers only two sections, the former dealing with dreams and the latter with omens.

॥ प्रयोगसारः ॥

No. 997. PRAYOGASĀRA.

C. O. L. No. 376.

Substance—Palm leaf. Size—24" × 2". Leaves—99. 9 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—4000.

Owner—Citran Nambūri, Paravūr.

Subject—Same as No. 996.

Beginning—Same as No. 996.

End:

....वाशीकरणमुत्तमम् ।
गोरोचनावचाकुष्ठं विल्वमण्डं मनश्शिलाम् ।
गवां क्षीरेण संपिष्ट्वा निक्षिपेत् ताम्रभाजने ॥

तत्र स्थिते.... .... ।
....मभ्यज्य भर्तारं वशमानयेत् ॥

दध्ना च पयसा पिष्ट्वा केसरं जलसामयम् ।
अयं लेपः प्रयोक्तव्यो भर्तारं वशमानयेत् ॥

अ.... .... मूत्रे शोषितं पुनरातपे ।
आलिप्य गन्धतोयेन प्रसन्नेन च्छलेन वा ॥

पतेरालिङ्गनं कृत्वा भर्तारं दा(स)तां नयेत् ।

Colophon :

प्रयोगसारे सामान्यबलिविधानं नाम सप्तमः पटलः ।

Author—Same as No. 996.

Remarks—The manuscript is very old and too frangible to be touched. Many leaves are missing here and there. The first 90 leaves are continuously numbered. The remaining leaves are marked with letter-numerals. The title is based on the colophon "प्रयोगसारे सामान्यबलिविधानं नाम सप्तमः पटलः" Paṭalas 13—18 are written in the last 12 leaves.

॥ प्रयोगसारः ॥

No. 998. PRAYOGASĀRA.

C. O. L. No. 1880.

Substance—Palm leaf. Size—16¾″ × 1¾″. Leaves—183. 7 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas—3500.

Owner—Nārāyaṇaru Govindaru, Kumāramaṅgalathu, Chaṅganāśśery.

Subject—Same as No. 996.

Beginning :

... .न्नाभिधानतः ।
नहि नादकलेत्येवममूर्तत्वात् प्रदृश्यते ॥

या च विष्ण्वात्मिका पृथ्वी सोमोऽसौ गुणपञ्चकः ।
....प्रत्येकभेदेन गुणाः पञ्चदशाभवन् ॥

ताः कलास्सह वर्जिन षोडशेन्दोरनङ्गदाः ।
पूषायशः सुमनसा प्रीतिस्तुष्टिकरी धृतिः ॥

वृद्धिः सौम्या मरीचिश्च तथान्या चांशुमालिनी ।
शशिनी चाङ्गदा लक्ष्मीश्छाया पूर्णामृतेति च ॥

कलाः सौम्याः समाख्याताः स्वाख्याभेदव्यवस्थिताः ।
अष्टात्रिंशत्कलाः प्रोक्ता वह्निसूर्येन्दुसंस्थिताः ॥

End :

शुभग्रहाधिष्ठितदिक्षु सुस्वरं
शुभो.... ....भं फलम् ।
अतोऽन्यथा चेत्फलमन्यदुच्चकै-
र्विमिश्रके चापि विमिश्रकं फलम् ॥

....मार्गं
शकुनानीह विचिन्त्य कीर्तितानि ।
अमुनैव शुभाशुभं विदित्वा
तदधी.... .... ॥

Colophon :

इति प्रयोगसारे शकुनविधिस्सप्तविंशः पटलः ।

पूज्यासितो(क्तप्रवरेण) यत्नाद्
(गोविन्दना)ह्ना रचितो हिताय ।
स्थेयादयं ख्यातिमवाप्य लोके
प्रयोगसारः सदनुग्रहेण ॥

इति समाप्तः प्रयोगसारः ।

Author—Govinda.

Remarks—The first two leaves are missing. The edges of the Ms. have been completely damaged. The whole work covers 27 paṭalas.

॥ प्रयोगसारः ॥

No. 999 A. PRAYOGASĀRA.

C. O. L. No. 1915 A.

Substance—Palm leaf. Size—5″ × 2″. Leaves—118. 10 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—1400.

Owner—C. O.

Subject—Same as No. 996.

Beginning :

....र्थं प्रवक्ष्यामि चिकित्सितम् ।

तत्राधारः स्त्रियः प्रायस्तासु कार्या ततः क्रिया ।
दैवदोषग्रहग्रस्ताः स्त्रियो वन्ध्या भवन्ति हि ॥

ऋताव्रतौ परीक्ष्यास्ता वक्ष्यमाणैस्तु लक्षणैः ।

दृष्टार्तवा नष्टफला हि वन्ध्या
सकृत्प्रसूता च मृतप्रजा च ।
यथोक्तहेतूपनतास्तु तासा-
मन्त्यैव दोषेतरहेतुदक्षा ॥

End :

काश्मीरागरुचन्दनद्वयमदद्वन्द्वाम्बुगोरोचना-
मांसीमत्स्यतमालपारदनखग्रन्थ्यामयानाम्मितम् ।
पिष्ट्वा गोमयतोयसंयुतमथो य(न्त्रो?न्त्रं)लिखेद्धेलया
सिद्धै.... ....रूप्यकृतया तुल्याथवा दूर्वया ॥

षट्कर्माश्रयतन्त्रवर्गजलधेरालोक्नायासिता-
दुद्धृत्योत्थितसारभूतमिह हि व्याख्यान्तरावि[ष्]कृतः ।

Colophon :

इति प्रयोगसारे यन्त्रविधानं नाम पञ्चविंशः पटलः ।

Author :

Remarks—The Ms. covers the diagnostic branch of medical science. The opening chapter deals with the treatment for barrenness in women. It ends on a fragment of the 26th paṭala. The last five leaves contain the rites of invoking Vighneśvara, which is indicated to be a part of the Prayogasāra by the colophons.

॥ हरमेखला ॥

No. 999 B. HARAMEKHALĀ.

C. O. L. No. 1915 B.

Substance—Palm leaf. Size—8″ × 2″. Leaves—40. 10 lines per page and 16 letters per line. Script—Malayāḷam. No. of Granthas—400.

Owner—Same as No. 999 A.

Subject—Medicine, Hymns etc.

Beginning :

श्रीगणपतये नमः । स्वस्ति....

आत्मरक्षा च कर्तव्या मन्त्रवादी प्रयत्नतः ।
मन्त्रवादी भटैः शूरैः रक्षयित्वा द्विजोत्तमः ॥

विपिने वा नदीतीरे देवतालय एव वा ।
एषु स्थानेषु कर्त(व्या?व्यं) पट्क(र्म?र्म) च विशेषतः ॥

मन्त्रयन्त्रौषधैर्होमैर्जपैश्चूर्णैश्च शर्करैः ।
एतैश्च साधयेच्छत्रूछँभेन्मन्त्री महद् धनम् ॥

देव्युवाच—

भगवन् श्रोतुमिच्छामि विस्तरेण यथातथम् ।
मन्त्रौषधानां माहात्म्यं प्रयोगश्च विशेषतः ॥

End :

तण्डुलं कृष्णशालीनां पाचयेन्मतिमान् नरः ।
पीतमात्रेण सकला वाता नश्यन्त्यसंशयः ॥

अशीतिवातजा रोगा नश्यन्त्येव न संशयः ।
पुनर्नवस्य मूलानि सम्यक् सङ्गृह्य बुद्धिमान् ॥

Colophon :

इति हरमेखलाख्ये महामन्त्रोदये अथर्ववेदोक्ते त्रयोदशः पटलः ।

Author :

Remarks—The Ms. embraces medical treatment, black art etc.

॥ प्रयोगसारः ॥

No. 1000 A. PRAYOGASĀRA.

C. O. L. No. 1121 A.

Substance—Palm leaf. Size—$14\frac{3}{8}'' \times 1\frac{7}{8}''$. Leaves—54. 7—9 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas—1300. Incomplete.

Owner—Mitai Kunnu Thaliyolapparampu Velimanokoil Illom.

Subject—Medical treatment.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ सन्तानसिद्ध्य ... ... कुत्सितम् ।
तत्राधारः स्त्रियः (प्रोक्तास्तासु कार्या त)तः क्रिया ॥

(दैव)दोषग्रहग्रस्ताः स्त्रियो वन्ध्या भवन्ति हि ।
(ऋता)वृतौ परीक्ष्यास्ता वक्ष्यमाणैस्तु लक्षणैः ॥

दृष्टार्त्तवा नष्टफला हि वन्ध्या
सकृत्प्रसूता च मृतप्रजा च ।
यथोक्तहेतूपनतास्तु तासा-
मन्त्यैव दोषेतरहेतु(दृष्टाःदक्षा) ॥

वातळाहारचेष्टाया वाते योनिमुपाश्रिते ।
योनिः सशब्दरुक्फेनतनुरूक्षारुणार्तवा ॥
सतोदज्वरकार्कश्यस्तब्धता चोपजायते ॥

End :

शेलुपद्मकपटल्यो लूताविषहरो गणः ।
उग्रारसोनरजनीसमं हि वृद्धनागरम् ॥
पानादिना सगोमूत्रं हरेल्लूताविषं क्षणात् ।

Colophon :

इति प्रयोगसारे द्वादशः पटलः ।

Author—Govinda.

Remarks—The first 12 Paṭalas are intact in this Ms.

॥ स्कान्दशारीरकम् ॥

No. 1000 B. SKĀNDAŚĀRĪRAKAM.

C. O. L. No. 1121 B

Substance—Palm leaf. Size—$14\frac{3}{4}'' \times 1\frac{7}{8}''$. Leaves—23. 8 lines per page and 48 letters per line. Script—Malayāḷam. No. of Granthas — 600. Incomplete.

Owner—Same as No. 1000 A.

Subject—Palmistry.

Author :

Remarks—The commentary breaks off on the 2nd chapter. It is printed as No. 137 in TSS. 11 leaves in the middle deal with necromancy.

॥ प्रयोगसारः ॥

No. 1001. PRAYOGASĀRA.

C. O. L. No. 2061.

Substance—Palm leaf. Size—22″ × 2″. Leaves—86. 9—11 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—4300.

Owner—C. O.

Subject—A succinct account of Tantrik rites.

Beginning :

त्रिंशत्कलाः प्रोक्ता वह्निसूर्येन्दुसंस्थिताः ।
वह्निस्सूर्यस्य बीजं य ... ...
... ...
....
....गुणोद्भूतधातूनाश्रित्य केवलम् ।
सूर्यो नरः शशी नारी तौ लोकपितृमातरौ ।
शुक्रः शोणितमित्येतौ ताभ्यां ....
....

End :

अथोत्पन्नेषु रोगेषु राष्ट्रभङ्गभयेषु च।
ग्रहेष्वत्यन्तघोरेषु महाप..... ... ॥

....

....

सर्वपापापहा विद्या फेलवी परिकीर्तिता ॥
सिद्धेयमेकवीरा महार्णवादुद्धृता महाज्ञानात् ।
यत्नेन गोपितव्या देया विद्या विनीताय ॥
इति

Colophon :

इति प्रयोगसारे अष्टाचत्वारिंशत्पटलः ।

Author :

Remarks—The Ms. is much damaged and worn out. The leaves are wrongly arranged. The closing portion of the 50th patala occurs in the middle.

॥ प्रयोगसारव्याख्या (सर्वाङ्गसुन्दरी) ॥

No. 1002. PRAYOGASĀRAVYĀKHYĀ
(Sarvāṅgasundarī).

C. O. L. No. 1723.

Substance –Palm leaf. Size—21″ × 2″. Leaves—78.

6 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—1875.

Owner—Sūryan Tuppan Bhaṭṭatiri.

Subject—Deprecatory mantrās for the prevention of certain fell diseases.

Beginning :

श्रीगणपतये नमः । अविघ्नमस्तु ।

अनवच्छिन्नचिन्मात्रपरमा(नन्दसुन्दरीम्) ।
(ध्यानहानक्रियावाह)क्रन्दस्पन्दां नुमो गिरम् ॥

श्रीमन्नाथपदाम्भोजं यत्र सम्यग्विराजते ।
तेभ्यो दिक्कालदेशेभ्यो रचये सन्ततं नुतिम् ॥

अन्तरायमहाघर्मच्छिदुरां सर्वमङ्गलाम् ।
हेरम्बमेघस्तनुतां दृष्टिवृष्टिमभीष्टदाम् ॥

प्रयोगसारवाणीं तां प्रणम्यानन्ददायिनीम् ।
यथामति करिष्ये तद्व्याख्यां सर्वाङ्गसुन्दरीम् ॥

इह हि ग्रन्थमारभमाण आचार्यः सुजनपरिपालितशिष्टाचार-प्रचयगमनाभ्यामाशीर्वादलक्षणं मङ्गलाचरणं मुखतः सम्पादयन् तदीयं विषयादि च सूचयति—मायेति ।

End :

शिवारुतज्ञाः गोमायुरवेण फलज्ञाः । रुतः शब्दः शुभोऽयमशुभोऽयम् इति मार्गं विविच्य विवेचनं कृत्वोक्तफलदान्येतानि नान्यानि इति विचिन्त्य निरूप्य शकुनानि कीर्तितानीत्यन्वयः ।

प्रयोगसारव्याख्याभूत् कृता सर्वाङ्गसुन्दरी ।
स्वर्णग्रामाधिपेनेयं वासुदेवविपश्चिता ॥

केषाञ्चिदधिकमुक्तं नैवोक्तमपेक्षितञ्च केषांचित् ।
इति यदि बुद्धिरिह स्यात् कुर्युर्मतमात्मनो यथाकामम् ॥

व्याख्यागुणं वा दोषं वा वदन्ति यदि सज्जनाः ।
तद्दृष्टिपातपूतत्वाच्चरितार्था वयं तदा ॥

यच्चिन्तासन्ततिलता तनुते मुक्तिसत्फलम् ।
अखण्डं तन्महो वन्दे शाम्भमाकाशसुन्दरम् ॥

त्रिपञ्चसप्तनिःष्यन्दस्पन्दसारमनश्वरम् ।
ध्वानभानमयं वन्दे वैद्यं तत् परमं वपुः ॥

नमो महीयसे तुभ्यं गुरवे परवेधसे ।
महसे महसां नित्यदायिने मायिनेऽणवे ॥

ग्रन्थसद्ग्रन्थिभिदुरबुद्धिसंपत्तिभूमयः ।
सन्तस्ते मेऽनुगृह्णन्तु सन्तः सन्तो यथा तथा ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यकवितार्किकचक्रवर्तिश्री-देवराजगिरिपूज्यपादशिष्यस्य श्रीवासुदेवविदुषः कृतौ श्रीमत्-प्रयोगसारव्याख्यायां सर्वाङ्गसुन्दर्यां चतुष्पञ्चाशत्पटलः ।

Author—Vāsudeva.

Remarks—The colophon suggests that the author was a disciple of Devarājagiripūjyapāda. A

Malayāḷam annotation is also added at the end to serve the purpose of a supplement to the work.

॥ प्रयोगसारव्याख्या (सर्वाङ्गसुन्दरी) ॥

No. 1003. PRAYOGASĀRAVYĀKHYĀ (Sarvāṅgasundarī).

C. O. L. No. 372.

Substance—Paper. Size—13½″ × 8½″. Pages—140. 20 lines per page and 17 letters per line. Script—Devanāgarī. No. of Granthas—1500.

Owner—C. O.

Subject etc.—Same as No. 1002.

End :

अङ्गावरणमन्त्रैश्च नाममन्त्रैरपि क्रमात् ।
हुत्वा साध्येन मनुना प्रोक्तद्रव्यैर्हुनेत्ततः ॥

सङ्ख्यापूर्तौ देवतात्र तूर्णाभेदेन चिन्तयेत् ।
तत्रापि किञ्चिज्जुहुयात् तूर्णया विद्यया तथा ॥

पश्चात् तां निष्कलीकृत्य विमृश्य परमां कलाम् ।
हृदये सम्यगुद्वास्य मनसा पूजयेत् ततः ॥

... ...
... ...
... ...

एवं कृते कार्यसिद्धिः स्यात् सद्यः ससुरार्चिते ।

Colophon :

इति उत्तरभागे सप्तविंशः पटलः ।
शुभं भूयात् ।

Author—Same as No. 1005.

Remarks :

॥ प्रयोगसारव्याख्या (सर्वाङ्गसुन्दरी) ॥

No. 1004 A. PRAYOGASĀRAVYĀKHYĀ.

C. O. L. No. 965 A.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—25. 9 lines per page and 62 letters per line. Script—Malayāḷam. No. of Granthas—870.

Owner—C. O.

Subject—Explanation of the Śakta tantrās based on Kaula school.

Beginning :

अतिविशङ्कटगण्डतटोदर-
स्फुरितदानविनोदितपट्टपदम् ।
... ...
.... ॥

सतां प्रीतिकरी येषां प्रवृत्तिस्ते हि साधवः ।
अत उत्तरभागस्य व्याख्यामस्य समारभे ॥

सुर... ... ...तदा वैषम्यं परमं स्यादिति तानि मनुष्यभाषया वक्ष्मि—

End—Same as No. 1002.

Colophon :

इति प्रयोगसारव्याख्यायां श्रीमत्परमहंसपरिव्राजकाचार्यकविता-
किंकचक्रवर्तिदेवराजागिरिपूज्यपादशिष्यस्य श्रीवासुदेवविदुषः
कृतौ सर्वाङ्गसुन्दर्यां सप्तविंशः पटलः ।

ईश्वरेण सुधीसार्थपादपद्मरजोजुषा ।
प्रयोगसारव्याख्येयं लिखिता सदनुग्रहात् ॥

नमो हरिहरहिरण्यगर्भेभ्यः ।

Author—Vāsudeva.

Remarks—This Ms. succinctly expounds the religious practices. Only the latter half is extant herein.

॥ त्रिष्टुब्विनियोगक्रमः ॥

No. 1004 B. TRIṢṬUPVINIYOGAKRAMA.

C. O. L. No. 965 B.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—30. 9 lines per page and 62 letters per line. Script—Malayāḷam. No. of Granthas--1046.

Owner—C. O.

Subject etc.—Same as No. 984 B.

Author :

Remarks—The title of the work is only surmised from the opening lines of the Ms. A paṭala with the close "प्रयोगसारे त्वरिता ... ... सप्तदशः पटलः" etc. occurs here. But this particular portion is missing in the original Prayogasāra.

॥ बहुदैवत्यम् ॥

No. 1005. BAHUDAIVATYAM.

C. O. L. No. 340 A, B, & C.

Substance—Paper. Size—14″ × 8$\frac{6}{8}$″. Pages—494. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—4940.

Owner—C. O.

Subject—An elaborate exposition of the worship of Śiva, Viṣṇu and Durga.

Beginning:

हरिः । श्रीगणपतये नमः ।

सर्वज्ञत्वं जगति विदितां भोक्तृतां सर्वभोगै-
स्तृप्तत्वं वा विहितकरणे दातृतां वा फलस्य ।
सा(मूल्यं?फलयं) वा सकलजगतां भुक्तिमुक्त्योरवाप्त्यै
स्वीकुर्वाणं प्रणमत शिवं देवतायाः स्वरूपम् ॥

धातुर्नियमपात्रस्था ततो विष्णुपदं गता ।
गङ्गा वराङ्गे न्यपतद् यस्य देवं नतोऽस्मि तम् ॥

देवस्सदाकाशनिकाशकान्ति-
द्विजाधिराजस्फुरितोत्तमाङ्गः ।
पायात् फणारत्नमरीचिमाला-
लसन्महाभोगिविभूषितो वः ॥

उभयोरुमारमणमाधवयो-
र्बहुतन्त्रशास्त्रविहितं स्नपनम् ।
पदकल्पनादिविधिमत्र मनाक्-
कृतिलालनाय कथये युगपत् ॥

जनुतोयधीमथो यन्नामपरागो मुदाभिधानौकाः ।
यजने भुवनौ मखिनामेतत् समुपात्तसङ्ख्यकलशानाम् ॥ (?)

सर्व कपी धी गगरी धन्यो मायालयो यायासीनैः ।
पदविधिरारभ्यैभिर्दशशतमापञ्चविंशतेर्नवधा ॥

तत्र हि मण्डपमानं त्रिंशद्धस्तादिपञ्चहस्तान्तम् ।
उत्तममध्यमहीनः प्रभेदको नवविधकः स्यात् ॥

End :

इन्द्रादिलोकपालानां मन्त्रैरेव यथाक्रमम् ।
गुरुस्तैः कलशैः कुर्याद्बलिपीठाभिषेचनम् ॥

ततो देवं समाराध्य बलिं तेषु समारभेत् ।
बलिदानविधिस्तेषु तत्र तत्र समीरितः ॥

एवं यः पूजयेन्नित्यं देवानीश्वरपूर्वकम् ।
तत्प्रसादात्समाप्नोति सर्वान् कामानसौ बुधः ॥

आरवाटकुलोत्पन्नो यज्ञनामास्ति तद्सुतः ।
नारायणेन तन्त्रेषु सारमर्थं विचिन्वता ॥

प्रोक्तेश्वरादिदेवानामर्चनक्रमकारिका ।
बालानामुपकारार्थं बहुदैवत्यनामिका ॥

Colophon :

इति बहुदैवत्ये चतुर्विंशतिः पटलः ।
बहुदैवत्यं समाप्तम् ।

Author—Nārāyaṇa born of Āravāṭakula and son of Yajña.

Remarks—The Ms. contains 24 Paṭalas only.

॥ बिम्बलक्षणम् (भाषाव्याख्यायुतम्) ॥

No. 1003. BIMBALAKṢAṆAM
with Malayāḷam commentary.

C. O. L. No. 885.

Substance—Paper. Size—11½" × 6". Pages—27.

20 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—25.

Owner—C. O.

Subject—Characteristics of the idols to be consecrated in temples.

Beginning :

विघ्नेशं मनसा नम्य विश्वकर्माणमेव च ।
बिम्बलक्षणपद्यानां भाषां लिखितुमारभे ॥

ഞാൻ ഗണപതിയേയും വിശ്വകർമ്മാവിനേയും മനസ്സു കൊണ്ടു തന്നെ നമസ്ക്കരിച്ചിട്ടു ബിംബലക്ഷണശ്ലോകങ്ങൾക്കു ഭാഷയായിട്ടു വ്യാഖ്യാനത്തെ ഉണ്ടാക്കുന്നേൻ.

അവിടെ നടെ ഒരു ഗർഭത്തിൽ പ്രതിഷ്ഠിപ്പാനുള്ള ബിംബത്തിന്റെ ഇവരത്തെ ചൊല്ലുന്നു.—

द्वारोत्सेधसमं तदङ्घ्रिरहितद्वारे विलोचान्विते
नन्दांशेन गजांशकेन च समं भक्ते त्रिधाद्यंशकैः ।
एवं नित्युदितानि पञ्चमनुबिम्बान्यत्रिगर्भालये
भक्तलोकरक्षणैद्विगुणभूम्यंशग्रहात्रीणि च (?) ॥

End :

ശങ്കരനാരായണനു് ഒരു പുറത്തു് ജട. ഒരു പുറത്തു കിരീടം. ചന്ദ്രക്കലയും കണ്ണു മൂന്നും വേണം. ഉടപ്പാൻ ഒരു പു

റത്തു പുലിത്തുകല. ഒരുപുറത്തു് മഞ്ഞൾപുടക. കൈകൾ നാ
ലിന്നു ശൂലവും ചക്രവും കപാലവും ശംഖും. നിറം ഒരുപുറം
വെളുത്തു ഒരുപുറം ശ്യാമം. അതരണ്ടാങ്ങൾ അത്തോത്തുകൊണ്ടു്
(ചെരിക്കഴുക്കോലുടെ ഏറുമവിലുമറിയേണ്ടു മുപാനാം പ്രകൃതൗ
തോഹെവ്യന്തക്ക(?) ഏറും വലിവും അറിയുന്ന പ്രകാരം അസ്സമ
ചതുരത്തിന്റെ പടിഞ്ഞാറെ ഭ്രൂയിങ്കൽനിന്നു് വളവുള്ളത്തോ
ളം വിരൽ പടിഞ്ഞാറുനീക്കി ഇട ഒക്കുമാറു തെക്കുവടക്കുനീട്ടി
ഒരു രേഖ ഉണ്ടാക്കു. കൊടിതുടങ്ങിയുള്ള ചെരിക്കഴുക്കോലുടെ
കർണ്ണസൂത്രങ്ങൾ കർണ്ണത്രപേണ ആ രേഖമേൽ തട്ടമാറു
വയ്പു. പിന്നെ കോടിക്കഴുക്കോലുടെ കർണ്ണസൂത്രം ആ രേഖ
യിങ്കൽ തട്ടുന്നേടത്തു് നിന്നു് വളകർണ്ണത്തിൽ പാതിവിരൽ
ആ വളമേൽ തന്നെ പാതിവിരൽ വടക്കോട്ടു നീക്കി അടയാള
ങ്ങളുണ്ടാക്കു. പിന്നെ ഒരു മൊട്ടുമുണ്ടാക്കു. അതിന്റെ ഒരു
പുറം കോടിക്കഴുക്കോലുകൾ ഉള്ള തോത്തുകളുണ്ടാക്കു. അവ
റിൽ എല്ലായിലും വലിയതോത്തു കൊടാവണയുടെ പ്രമാണം
പിൻതേറത്തിൽ വലിയ തോത്തു് ആക്കേണം. പിന്നെ മഞ്ഞണ
യിന്നിങ്ങനെ ക്രമത്താലെ കണ്ടുകൊൾക.?)

Colophon :

Author :

Remarks—The work opens with a general delineation of the manifold kinds of idols and then proceeds to expound the characteristics of the images of Gaṇapati, Śaṅkaranārāyaṇan etc. No colophon is noticeable herein.

॥ ब्रह्मतान्त्रिकम् ॥

No. 1097 A. BRAHMATĀNTRIKAM.

C. O. L. No. 1936 A.

Substance—Palm leaf. Size—9″ × 1″. Leaves—83. 5 lines per page and 29 letters per line. Script—Grantha. No. of Granthas—606.

Owner—P. Vāsudeva Śarma, Vaṭṭappaḷḷi, Suchīndram.

Subject—Tantra.

Beginning:

ओं ककारस्य केशवनामधेयम्। प्रह्लाद ऋषिः। गायत्रीछन्दः। अग्निर्देवता। श्रीं बीजम्। प्राह्लादिनी शक्तिः। पृथिवीतत्त्वं। चम्पकवर्णं। उदात्तस्वरः। समुखमुद्रा। पातकनाशनम्। उम् कीलकम्। पादाङ्गुष्ठे न्यसेत्।

चकारं चम्पकं पद्मं ब्रह्मविष्णुशिवात्मकम्।
शान्तं पद्मासनारूढं ध्यात्वा भवति पावकम्॥

End:

पञ्चवक्त्रां दशभुजां त्रिपञ्चनयनोज्ज्वलाम्।
मुक्ताविद्रुमसौवर्णां सितनीलनिभाननाम्।

वाणीं परां पठेद्.....।
यं यं चिन्तयते कामं तं तमाप्नोति निःश्रमम् ॥

Colophon :

इति श्रीब्रह्मतान्त्रिके गायत्रीपञ्जरं समाप्तम् । श्रीलक्ष्मीनृसिंहाय परमगुरवे नमः । शुभमस्तु ।

Author :

Remarks — Certain hymns bearing upon Subramaṇya occupy the first two leaves. Gāyatri and other Mantras are also explained here.

॥ रुद्रयामलम् ॥

No. 1007 B. RUDRAYĀMAḶAM.

C. O. L. No. 1986 B.

Substance—Palm leaf. Size—9″ × 1″. Leaves—18. 5 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—135.

Owner—Same as No. 1007 A.

Subject—Tantra.

Beginning :

कैलासे सुखमासीनं शिवं पप्रच्छ पार्वती ।
गायत्र्यास्तु महाचक्रं मम ब्रूहि महेश्वर! ॥

शम्भुरुवाच—

साधु पृष्टं त्वया देवि! सर्वलोकसुखावहम् ।
सायकानां त्रिवर्णानां दृष्टमात्रेण सिद्धिदम् ॥

End :

मध्ये तारं सुवर्भूःस्वरहुतवहनं योऽक्ष्यसेत्कोणषट्कं
भावान्तं वस्वारे(?) मन्त्रवर्णं लिपिभिरपि वृतं भूपुरे तूर्यमन्त्रम् ।
स्वाराज्ये चूडामन्त्रं (?) हरिहरसहितं वैष्णवं मन्त्रमेतत्
सर्वाभीष्टप्रदानप्रचुरतरतमं प्राणिनां भाग्धेयम् ॥

हरिः। श्रीसरस्वत्यै नमः । सुब्रह्मण्याय नमः ।

Colophon :

Author :

Remarks—The last few leaves contain Puruṣa-sūkta, Camaka and other hymns.

॥ भक्तिचिन्तामणिः ॥

No. 1008. BHAKTICINTĀMAṆI.

C. O. L. No. 1833.

Substance—Palm leaf. Size—9″ × 2″. Leaves—104. 6 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1450.

Owner—Brahmadattan Nambūri, Kūdallūr.

Subject—Tantra.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीकृष्णाख्यं परं ब्रह्म स्मृत्वा नत्वा मुहुर्मुहुः ।
भक्तिचिन्तामणिं नाम कुर्वे तत्सेवनक्रमम् ॥

गोविन्दमङ्गलकृपाञ्चितसिन्धुशायि-
सूरीन्द्रसारतरमूलयुतोपदेशः ।
गोप्योऽपि कालभवमूलवचःप्रमोप-
प्राप्तांशविस्मृतिभयेन विलिख्यतेऽसौ ॥

सनत्कुमारं क्रमदीपिका च
सम्मुच्चयस्तद्विवृती च मूलम् ।
तेष्वेकमूलग्रहणं त्विह स्या-
दन्येष्वनुक्तेर्मतभेदको वा ॥

इह तावन्निर्विवादतया सर्वेषामपि दुःखनिवृत्तिपूर्वकसुखावाप्तिरूपश्रेयोलाभलोभित्वात् तदुपायेष्वेव विवादात् तत्रापि कर्मपरश्रुतिस्मृतिपुराणगणभणितोपायानां स्वर्गधनपुत्रादिमात्रफलत्वस्य तेष्वेव स्पष्टतो.... ....

End:

श्रीकृष्णाय सर्वदेवतागुरुमन्त्रात्मने प्रसन्नार्घ्यं समर्पयामि इति प्रसन्नार्घ्यं दत्त्वा ओं ह्रीं गां गङ्गायै इत्यनेन तीर्थं सम्पाद्य संप्रोक्ष्य

शङ्खं प्रक्षाल्य ओं क्लीं कृष्णाय स्वाहावसानार्घ्यं समर्पयामि इत्यवसानीयार्घ्यं दत्त्वा शङ्खं न्यग्विलं न्यस्य ओं पाञ्चजन्याय नम इति शङ्खस्य पुष्पं चूडयित्वा देवे व्यापकाङ्गानि कृत्वा तालत्रयादिना संरक्ष्य ओं प्रसीद प्रसीदेति प्रसादपुष्पं चूडयित्वा कुसुमद्वयमादायोद्वासनमुद्रया भगवतस्तस्य तेजसोंऽशं स्वस्मिन् सान्निध्यवृद्ध्यर्थं पिङ्गलापथेन हृद्युद्वासयेत् आवहनोक्तवत् प्रणवत्रयोपचारमूलान्युक्त्वा श्रीकृष्णम् उद्वासयामीति मन्त्रः। ततः प्राणायामेन स्थिरीकृत्य मानसपूजां सुरभिमुद्रान्तां कृत्वा व्यापकाङ्गन्यासादिकं तालत्रयादिकञ्च कृत्वा स्वात्मानं भगवन्तमेव ध्यायन् कार्यान्तराणि कुर्यात्। अथ सालग्राममन्त्रेण तुलसीदलमिश्रं श्रीपादोदकं देवस्य पुरत एव 'तदस्ये'त्यृचा पिबेत्।

Colophon :

षट्पीठपूजाविधिः।

Author :

Remarks—The Ms. includes Vaiṣṇavapūja and other religious rites.

॥ भद्रदीपक्रिया ॥

No. 1009 A. BHADRADĪPAKRIYĀ.

C. O. L. No. 1972 A.

Substance—Palm leaf. Size—$16\frac{3}{4}'' \times 1\frac{3}{4}''$. Leaves—61. 8—9 lines per page and 48 letters per line.

Script—Malayalam. No. of Granthas—1550. Complete.

Owner—Vamanan Viṣṇu Namburi, Mankombu.

Subject—A descriptive account of the rituals relating to Bhadradīpa.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

गुरुं गजाननं गोपगोपिकाजनवल्लभम् ।
प्रणम्य लिख्यते तन्त्रे गोपितो दीपिकाक्रमः ॥

अमुष्य भद्रदीपस्य ब्रह्माण्डे सात्त्वतादिषु ।
अन्येषु तन्त्रकल्पेषु विविधेषु विचक्षणैः ॥

मुनिभिस्सूचितास्तत्र याः क्रिया विविधाः पुरा ।
ता एवात्र विलिख्यन्ते संक्षेपक्रमलक्षिताः ॥

त्रैवर्णिकाश्शुभाचारा दीक्षिता मन्त्रवित्तमाः ।
योग्यास्त एव सर्वत्र स्वयं यष्टुं न चापरे ॥

स्त्रीशूद्रा गुरुभिर्भक्ताः कारयेयुर्व्रतोत्तमम् ।
योग्यास्ते (च) स्वयं यष्टुं मण्डलादिषु केवलम् ॥

End:

तदत्र कर्मसौष्ठवक्लप्तिरवश्यकरणीयेति बहुविदामनुयोगादादित एव मम भद्रदीपक्रियोपदेटुः श्रीकण्ठगुरोरादेशानुसरणेन पुरा-

णार्थनिष्कर्षे दीप एवास्य यजनक्रिया सम्मता शक्तितस्त्रिकालं वा स्यात् । व्रतविधियजनक्रिया च मन्त्रतन्त्रसम्बुद्ध्या स्यादिति भद्र-दीपशाखान्तरिते यद्दीपाराधनक्रिया दीक्षाद्यवभृथान्तमाप्तजनशिक्ष-यासिलोपकाराय सकलावयवसंक्षिप्याभिहिता ।

Colophon :

अनुगृह्णन्तु सन्तः । प्रसीदतु पुरुषोत्तमः । विष्णुशर्मवासुदेव-शर्मणा लिखितमिदं पुस्तकं स्वीयमेव ।

Author :

Remarks—Immediately after the close of this work two leaves embody certain hymns for the worship of Kālacakra.

॥ प्रबोधदीपिका ॥

No. 1009 B. PRABODHADĪPIKĀ.

C. O. L. No. 1972 B.

Substance—Palm leaf. Size—12″ × 1⅞″. Leaves—26. 8—10 lines per page and 44 letters per line. Script—Malayāḷam. No. of Granthas — 650. Complete.

Owner—Same as No. 1009 A.

Subject—Realisation of the supreme soul.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
श्रीगुरुभ्यो नमः ।

अध्यारोपापवादाभ्यां ज्ञातव्यस्तत्त्वनिर्णयः ।
न कर्मणा न प्रजया न त्यागेन धनेन वै ॥

अध्यारोपो नाम शुक्तिरजतादिवत्सच्चिदानन्दलक्षणे ब्रह्मणि प्रपञ्चारोपः । सोऽपि परमार्थवस्त्वनवबोधाकारेणाज्ञानेनापतितः ।

अज्ञानमेव गुणानां साम्यावस्था । सैव मूलप्रकृतिः । प्रलयो महासुषुप्तिः । तस्यामनन्तकोटिजीवानां सकलकर्मवासना सूक्ष्मरूपा लयमेष्यति । अयमनुभवः सर्वेषां सुषुप्तौ न विद्यते च ।

End:

इहात्मनो दुःखं शरीरपरिग्रहेण । तच्च कर्मणा कर्मरागादी....
....दप्यविवेकेन अविवे.. ..
....जातः । तन्नाशो ज्ञानेन । तच्च.... ....
....ज्ञानानन्दस्वरूप ....
.... णो वासाकं गुरुरेवेत्याचार्यवचनेन विज्ञाततत्त्वो विविदिषासन्न्यासिनो हंससन्न्यासिनश्च प...देहावसाने परिपूर्णब्रह्मरूपो भवति ॥

Colophon:

इति प्रबोधदीपिकायां द्वादशोल्लासः ॥

Author:

Remarks--The closing two leaves are much worn out.

॥ भद्रदीपदीपिका ॥

No. 1010. BHADRADĪPADĪPIKĀ.

C. O. L. No. 766.

Substance—Paper. Size—12″ × 6″. Pages—134. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1340.

Owner—C. O.

Subject—Delineation of the religious observances pertaining to Bhadradīpa.

Beginning :

जयति स जगदण्डमण्डपान्त-
ग्रहगणमण्डलमण्डनायमानः ।
गगनमयमहाशरावमध्य-
स्फुरितसहस्रमयूखभद्रदीपः ॥

गुरुः स्वशिक्षाश्रयकल्पसिद्धिसम्पदं
मुनिः समूलाव्ययतर्कनिर्णयम् ।
हरिः स्वभक्तयुद्भवतत्त्वनिर्णयं
ममात्र तन्वन्तु मुदे मनीषिणाम् ॥

वागधीशो वचोभङ्गिमादर्शममलात्मनाम् ।
वासुदेवमहेज्याभिव्यञ्जनीं विदधातु नः ॥

प्रणम्य प्रीणिताशेषभुवनं कलभाननम् ।
लिख्यते लक्षितार्थैषा भद्रदीपस्य दीपिका ॥

नारायणादधिगतं धरित्र्या नारदेन च ।
ताभ्यामुभाभ्यां सत्पादभक्तधीषु प्रकाशितम् ॥

तदिदं वसुधोपज्ञं व्रतं वैदिकतान्त्रिकम् ।
नचिरात् साधयेत् पुंसां पुरुषार्थचतुष्टयीम् ॥

भद्रदीपाभिधा सेयमयनद्वयसंमता ।
प्रतिष्ठा स्वार्थसर्वस्वघटना कामसौरभी ॥

मणिलोहशिलाद्यासु प्रतिमासु मधुद्विषः ।
आधेयमेव चैतन्यं दीपे यदवभासते ॥

पुरातनेन कविना पुराणपुरुषात्मना ।
पराशरभुवा यैषा पुराणे स्वे प्रकाशिता ॥

तस्यास्तन्त्रान्तरापेक्षमन्त्रकर्माभिसन्धयः ।
आदीप्यन्तेऽनया यद्वत्प्रदीपेन घटादयः ॥

इह शास्त्रमुखन्यायपरिप्रश्नादिवर्णनम् ।
पुराणं शतधा ख्यातं स्मृत्यैव चरितार्थ्यते ॥

End :

इति मखपतियोगस्यैष सत्संप्रदायः
प्रथितगुरुमुखोत्थः कर्मयागोपदेशः ।

अनिपुणरचनातोऽप्यत्र दिङ्मात्रसिद्ध्यै
यजनकृतमतीनां यावदर्थं निबद्धः ॥

यदपि निगमशिक्षादक्षिणैर्देशिकेन्द्रै-
रमलविकृतवर्णा दीपिकेयं तथापि ।
विधिगुणपरिपाटी मूर्तिपानल्पशीला-
नवगमयितुमेषाप्येषणीयैव तज्ज्ञैः ॥

\+ + + +

जयति स गुरुः श्रीकण्ठो मे यदुज्ज्वलशिक्षया
गुरुरपि मया निर्व्यूढेयं महाध्वरदीपिका ।
शुकमुनिनुता शान्तिर्विद्या बृहस्पतिमानिता
धनदमहिता श्रीरप्येनं यमेकमुपाश्रिता ॥

व्रतमिदममुनास्मदेशिकेन त्रिधाब्दै-
(रा?रु)दितमलघु कृत्वा वीतवर्षो नृमेधः ।
कलिबलविधुतानां कामधेनुर्द्विजाना-
मजनि जनककल्पः कोलभूपालमौलिः ॥

पित्रा शास्त्रधियाहमस्य लघुकृत्ये प्राञ्चनाक् शिक्षित-
स्तद्यज्ञे गुरुणा द्वयोरयनयोर्मूर्त्यर्चने योजितः ।
मातुर्भाग्यनिधेः व्रतालघुगुरूकृत्ये तदात्म्यं नयन्
भक्त्यास्या रचनात्मिकामरुरवं विश्वात्मनोऽनुग्रहात् ॥

× × × ×

× × × ×

Colophon :

इति दीपदीपिकायामष्टमपटलेन कर्मशेषविधिः ।
कर्म दर्शितनीत्या सम्यङ् नारायणेन समतानि ॥

इति दीपदीपिका समाप्ता ।

Author—Nārāyaṇa.

Remarks—The concluding portion of the 4th Paṭala and the beginning portion of to the 5th are missing. Śrīkaṇṭha must probably be the preceptor of the author as stated at the end. The writer was present for the performance of this function by Kolabhūpati at his father's command.

॥ भारद्वाजसंहिता ॥

No. 1011. BHĀRADVĀJASAMHITĀ.

C. O. L. No. 531.

Substance—Paper. Size—14" × 5¾". Pages—68. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—680.

Owner—C. O.

Subject—Rituals based on the school of Pāñcarātra.

Beginning :

भारद्वाजसंहिता । श्रीगणेशायनमः ।

श्रुत्वा तु सकलान्.... .... ।
....णत्रयभेदतः ॥

गुणत्रयविभेदेन प्रपत्तिं त्रिविधां पुनः ।
प्रणामाङ्कनमुख्येन न्यासलिङ्गेन केवलम् ॥

गुर्वधीना हि भवति प्रपत्तिः कामिकी क्वचित् ।
अविज्ञातार्थतत्त्वस्य मन्त्रमीरयतः परम् ॥

गुर्वधीनस्य कस्यापि प्रपत्तिर्वाचिकी भवेत् ।
न्यासलिङ्गवताङ्केन धियार्थज्ञस्य मन्त्रतः ॥

उपासीत गुरोः सम्यक् प्रपत्तिर्मानसी भवेत् ।
यदिच्छन् प्रतिकूलानि सर्वभूतानुकम्पिनम् ॥

End :

अनुज्ञातक्रियायोगा ज्ञानवैराग्यशालिनी ।
इति भक्तिमयी वृत्तिः पुनरेव प्रपञ्चिता ॥

इत्थं किलात्मनो न्यासाज्जाता भृत्याख्यपादपाः ।
असौ फलमयः सेव्यस्तं न चोत्पद्यते विना ॥

सुसूक्ष्मत्वाद् दुरापत्वान्महत्वाद् गौरवादपि ।
मयायमपरो धर्मः प्रोक्तः स्थित्यै पुनः पुनः ॥

वृत्तिं सन्तोऽनुभूयेमामनुरूपामिहात्मनः ।
परत्र चानुमोदन्ते परमेण विपश्चिता ॥

Colophon :

इति भारद्वाजसंहितायां परिशिष्टे चतुर्थोऽध्यायः ।

Author :

Remarks—The Ms. contains 8 chapters, 4 on Nyāsopadeśa and 4 on Pariśiṣṭa. A few leaves at the beginning are missing. The nine pages after the 68th contain a reproduction of a portion of this work.

॥ मण्डलचतुष्कलक्षणम् (भाषाव्याख्यासमेतम्) ॥

No. 1012. MAṆḌALACATUṢKALAKṢAṆAM with Malayāḷam commentary.

Substance—Paper. Size—11″ × 9″. Pages — 19. 22 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas — 300.

Owner—C. O.

Subject—Definition of the mystical diagrams used in invoking the divinities.

Beginning :

येन येन मनुना मनुबिम्बे
देवदेवयजनं कृतमत्र ।

तेन तेन तदुदक् परिक्लृप्ते
मण्डले स्वविहिते च यजेत् तम् ॥

चक्राब्जे प्रयजेद्विष्णौ दुर्गायां शक्तिदण्डके ।
भद्रकेऽन्ये(रि?पु) सेनान्यां प्रत्य(यं?क्) प्रागुक्तपङ्क्तले ॥

इति पञ्चमपटलेऽधिवाससमयोक्तशेषतया द्वादशपटलोक्तमण्डलानां चतुर्णां प्रमाणं प्रकृतिविकृतिश्चाह ।

एकद्विसागरकरप्रमितानि तानि
स्युर्भद्रकप्रकृतिकान्यथ मण्डलानि ।
चक्राम्बुजं द्विकरमप्यकरं वरिष्ठं
तद्वेददोःप्रभृतिपन्नगहस्तनिष्टम् ॥

भद्रकप्रकृतिकानि तानि मण्डलानि एकद्विसागरकरप्रमितानि स्युरित्यन्वयः ।

ഭദ്രകപ്രകൃതികങ്ങളായിരിക്കുന്ന ആ മണ്ഡലങ്ങൾ അധമ മധ്യമോത്തമക്രമേണ ഏകദ്വിസാഗരകരപ്രമിതങ്ങളായി ഭവിക്കുന്നു. ഭദ്രകപ്രകൃതികങ്ങൾ=ഭദ്രപത്മമണ്ഡലം പ്രകൃതികളായുള്ളവ.

End :

द्वाभ्यां द्वाभ्यां पदाभ्यां तु द्वाराण्याशासु कल्पयेत् ।
कोणं कोणपदेनैव गुणरेखा बहिर्हिताः ॥
इति ।

दलानि पीतवर्णेनच्छादयेदसितेन वा ।
दलसन्धिस्तथा द्वाराण्याच्छाद्य हरितेन तु ॥

कोणकोष्ठचतुष्कं तु शुक्लेनैव प्रपूरयेत् ।
वृत्तस्य बाह्ये यत् कोणं चतुरश्रस्य (चा)न्ततः ॥

कृष्णेन पूरयेद् बाह्ये गुणवर्णे गुणात्मकाः ।
इत्यागमान्तरे प्रोक्तम् । इति ईशजनुपि पङ्दलमण्डलं स्यात् ।

ഇങ്ങനെ സ്ഥാനങ്ങളേ ഷഡ്ദളപദ്മമണ്ഡലം ചെയ്ക്കുന്നു.

Colophon :

इति मण्डलचतुष्कं समाप्तम् ।

Author :

Remarks—The text is embodied herein along with a brief commentary in Sanskrit. The Malayāḷam translation occurs sporadically herein. The four mystical diagrams in the 12th paṭala of Tantrasamuccaya are also explained in the course of the work.

॥ महाकालीमतम् ॥

No. 1013 A. MAHĀKĀLĪMATAM.

C. O. L. No. 2100 A.

Substance—Palm leaf. Size—$10\frac{1}{2}'' \times 1\frac{3}{4}''$. Leaves—13. 7—9 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—175.

Owner—Revati Tirunāḷ, Grāmattil Kottāram.

Subject—Explanation of the methods of exhuming the hidden treasures and the deprecatory rites for warding off the evil consequences arising therefrom.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथातो लिख्यते ग्रन्थः प्रबन्धे प्राक्तने यथा ।
तथा कुर्याच्च विद्वांसः क्षन्तुमर्हन्तु मे सदा ॥

महाकालीमतं नाम्ना प्रोक्तमादिशिवेन तु ।
निधिशास्त्रं मुनिवरैर्गृहीतं लिख्यते मया ॥

ऋषयः ऊचुः—

केनोपायेन मुच्यन्ते ब्राह्मणाः क्लेशसानुगाः ।
दौर्गत्याह्वयमार्गात्तु (य?)तद्वाक्यं वक्तुमर्हसि ॥

ईश्वर उवाच—

तादिदानीं प्रवक्ष्यामि शृणुध्वं मुनिपुङ्गवाः ।
निधिशास्त्रं परं गुह्यं दुर्लभं त्रिदशैरपि ॥

प्रवक्ष्यामि द्विजश्रेष्ठा दारिद्र्यार्णवतारकम् ।
यं ज्ञात्वापि नरः कश्चिद्दारिद्र्यात् परिमुच्यते ॥

पञ्चपातकयुक्तोऽपि कुबेरसदृशो भवेत् ।
निधीनां लक्षणं विप्रा वक्ष्येऽहं शृणुताखिलम् ॥

End :

अथ महाविनायकानां विघ्नानि भवन्ति । वायव्यविघ्नाय भूत्वा कुण्डाहरीशकुनवृद्धेन वेतालश्यागेनाहर्गयये? एषा बलिमुशानिपगौ-पस्फारकृतीं(?) कुर्वन्ति कुमारा दृश्यन्ते। नार्योदकं भवति। श्वाना-कारमतिनक्षत्राणि प्रदृश्यन्ते। तेन बलिमुपहरेत् । तेन प्रशाम्यति। गणनचारिणे स्वाहा । एतेन प्रशाम्यति ।

Colophon :

इति खन्यवादे महाकालीमतं समाप्तम् ।
दामोदरेण लिखितमिदं पुस्तकम् ।

Author :

Remarks—The lines quoted below are added in the wake of the colophon.

किमत्र चित्रं रसिकं रसेन रजस्वलापुष्परसेन भावितम् ।
क्रमेण देवी उरगेण वेष्टनं धमेन कृत्वा त्रिपुटेन काञ्चनम् ॥

१ ४ ६ १ ४ വെള്ളി ഒന്നു് സിന്ദൂരം

घोषभागद्वयं चैव तीक्ष्णभागद्वयं तथा ।
रीतिभागश्च चत्वारि एते भागन्तु तारकम् ॥

तत्समं शुल्वभागन्तु एते भागश्च नाशकम् ।
तारशेषं भवेत् कुर्यान्नृवीजं सप्तवर्णकम् ।

॥ निधिप्रदीपः ॥

No. 1013 B. NIDHIPRADĪPA.

C. O. L. No. 2100 B.

Substance—Palm leaf. Size—10½" × 1¾". Leaves—48. 7—8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas — 625. Complete.

Owner—Same as No. 1013 A.

Subject—Same as No. 1013 A.

॥ योगदीपः ॥

No. 1013 C. YOGADĪPA.

C. O. L. No. 2100 C.

Substance—Palm leaf. Size—10½" × 1¾". Leaves—8. 8 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—125.

Owner—Same as No. 2100 A.

Subject—A compendium of the tenets of Yoga philosophy.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

योगीश्वरं नमस्कृत्य योगमार्गप्रकाशकम् ।
योगदीपमहं वक्ष्ये सर्वशास्त्रार्थसंग्रहम् ॥

यमश्च नियमश्चैव तथैवासनमेव च ।
प्राणायामस्तथा पश्चात् प्रत्याहारस्ततः परम् ॥

धारणा च तथा ध्यानं समधिश्चेति दर्शितः ।
अष्टाङ्गयोगो योगज्ञैस्सर्वागमविशारदैः ॥

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ।
क्षमा धृतिर्मिताहारः शौचं चैते यमा दश ॥

आगमोक्तप्रकारेण विना सर्वत्र कर्मणि ।
कायेन वाचा मनसा हिंसा हिंसा न चान्यथा ॥

आत्मा सर्वगतोऽच्छेद्यः अदाह्य इति या मतिः ।
सा चाहिंसा परा प्रोक्ता नित्यं योगयोगिभिः ॥

End :

स एवाग्निः स चन्द्रोऽर्कस्स एव परमः शिवः ।
स एव योगगम्यस्तु सांख्यशास्त्रविचारणैः ॥

स एव कर्म इत्युक्तः कर्ममीमांसकैरपि ।
ब्य(भ?व)हारैर(या?यं) भेदस्तस्मादेकः स नान्यथा ॥

इति धीर्या समाधिः सा भुक्तिमुक्तिफलप्रदा ॥
मेया गोरक्षनाथेन रचितं यः पठेदिदम् ।
योगदीपं महाशास्त्रं विमुक्तो भ(भ्रा?व)न्धनात् ॥

Colophon :

इति योगदीपे अष्टमोपदेशः ॥

Author—Gorakṣanātha.

Remarks—Many mantras are described in 24 leaves after the close of this work.

॥ महागणपतिकल्पः ॥

No. 1014. MAHĀGAṆAPATIKALPA.

C. O. L. No. 713.

Substance—Paper. Size — 11″ × 9″. Pages — 32. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas — 400. Complete.

Owner—C. O.

Subject—The rites of adoring Ganapati.

Beginning :

गणपतये नमः ।

शिवयोरादिस्पन्दो
नित्यश्रीशक्तिरात्मभूर्यामिनाम् ।
गणपतिरभिमतदायी
वशयतु विश्वं मम स्वयंज्योतिः ॥

भक्त्यैव नियतलाभे
पत्युर्यस्याभिमुख्यसद्भावे ।
अभिमन्ता मन्त्राणां
गणः समस्तोऽपि मन्त्रिसम्पत्यै ॥

नियमितमनसिजवृत्ते-
र्महतो देवस्य कापि लीलेयम् ।
गाढालिङ्गनदयिता
गजवदनानन्दचिद्घना मूर्तिः ॥

End :

तुष्टे गुरौ विशेषेण प्रसीदति गणेश्वरः ।
तस्मिन् प्रसन्ने च विभावीप्सितं किं न लभ्यते ॥

इत्थं भक्तिपरायणो गणपतौ कुर्वन् स गुर्वाज्ञया
न्यासं ध्यानसमर्चनाहुतजपैः स्तोत्रादिनित्यक्रियाम् ।
मन्त्री यन्त्रितमानसो न विदधन्नर्मापि धर्मापरं
लक्ष्मीमत्र पुमर्थपुष्कलफलामन्ते च विन्देच्छिवम् ॥

Colophon :

इति महागणपतिकल्पः समाप्तः ।

Author :

Remarks :

॥ महाविद्याविडम्बनम् ॥

No. 1015 A. MAHĀVIDYĀVIḌAMBANAM.

C. O. L. No. 163 A.

Substance—Paper. Size—13½″ × 8½″. Pages—62. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—700. Incomplete.

Owner—C. O.

Subject—Exposition of the reality of Mahāvidya refuting the principles of other schools of thought with cogent reasons.

Beginning :

मेयत्वादिति । अयं शब्द एतदन्यत्वव्यतिरिक्तैतदन्यवृत्ति-त्वरहितानित्यनिष्ठाधिकरणं, मेयत्वादिति । एतदन्यत्वव्यतिरिक्ता

ये एतदन्यवृत्तयः तेष्वेतदन्यव्यतिरिक्तैतदन्यवृत्तित्वं धर्मः । तद्रहितं चैतदन्यत्वं वा अवृत्तिर्वा एतन्मात्रवृत्तिर्वा । आद्यौ पक्षौ व्याहतौ । तेन पक्षमात्रनिष्ठो धर्मोऽनित्यनिष्ठत्वविशेषितः पक्षे सिध्यतीत्यनित्यत्वसिद्धिः । अयं शब्दः शब्दत्वात्यन्ताभावव्यतिरिक्तैतदन्यवृत्तित्वरहितानित्यनिष्ठाधिकरणं मेयत्वादिति ।

End :

आद्ये घटत्वमेयत्वादेर्व्याघातापत्तिः । द्वितीये घटत्वशुक्लत्वादेर्व्याघातापत्तिः वक्ष्यमाणदोषः । तृतीयस्तु प्रकृते न सम्भवत्येव । अनित्यत्वाभावस्य पक्षीकृतशब्दमात्रवृत्त्यनित्यनिष्ठधर्ममन्तरेणोपलम्भेऽप्यनित्यत्वाभावमन्तरेण पक्षीकृतशब्दमात्रानित्यनिष्ठधर्मस्यानुपलम्भात् । उभयोः प.....

Colophon :

इति हरकिङ्करन्यायाचार्यपरमपण्डितवादीन्द्रविरचिते महाविद्याविडम्बने केवलान्वयिभङ्गो नाम द्वितीयः परिच्छेदः ।

Author—Harakiṅkaranyāyācārya.

Remarks—The Ms. abruptly breaks off on a fragment of the 3rd pariccheda. The line "श्रीसिंहधर्माध्यक्षेण वादीन्द्रेण विरच्यते" etc. reveals that the author was an administrant of justice.

॥ महाविद्याविडम्बनव्याख्या ॥

No. 1015 B. MAHĀVIDYĀ ḌAM ANAVYĀKHYĀ.

C. O. L. No. 163 B.

Substance—Paper. Size—13½" × 8½". Pages—30.

20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—325. Incomplete.

Owner—C. O.

Subject—Same as No. 163 A.

Beginning:

अनन्यत्वं दूषणं सर्वत्रोहनीयमित्याह—एवमिति । समाधत्ते—तादिति । स्ववृत्तित्वेन विशिष्टं स्वेतरवृत्तित्वं तदत्यन्ताभावस्वस्वेतरवृत्तित्वानाक्रान्तत्वमिति न विवक्षितम् । किन्तु स्ववृत्त्या विशिष्टा स्वेतरावृत्तिस्तदभावस्वेतरावृत्तिस्तदभावस्वस्वेतरवृत्तित्वं तदत्यन्ताभावस्तथा विवक्षित इति सदृष्टान्तमाह— यथेति । प्रतिज्ञापर्यवसानमाह—तेनेति । एवमपि व्याघाततादवस्थ्यं विशिष्टवृत्तिनिष्ठधर्मनिषेधस्य विशेषणीभूतस्ववृत्तिनिषेधेन वाच्यत्वादित्यत आह—तथा चेति ।

End:

अप्रतिभानिग्रहमात्मनः परिहर्तुं महाविद्या ज्ञातव्या । अतोऽपि तद्व्याख्यानमुपयुक्तमित्याह—यद्वेति । पक्षे साध्यवतो धर्मिणो धर्मः केवलान्वयी व्यापकः साध्यः पक्षे च तद्भिन्ने तदन्यस्मिंश्च वृत्तित्वरहितेनानुरञ्जितः स्वस्वेतरवृत्तित्वानाक्रान्त इत्यर्थः ।

Colophon:

इति महाविद्याविडम्बनव्याख्याने श्रीमदानन्दपूर्णविरचिते प्रथमः परिच्छेदः ।

Author—Ānandapūrṇa.

Remarks—The Ms. covers only a portion of the 1st paricchcda.

॥ महासंमोहनतन्त्रम् ॥

No. 1016 A. MAHĀSAMMOHANATANTRAM.

C. O. L. No. 2319 A.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—5. 12 lines per page and 66—68 letters per line. Script—Malayāḷam No. of Granthas—250.

Owner—Agniśarman Bhaṭṭatiri, Tiruvalla.

Subject—Exposition of the Tantrik principles.

Beginning :

... ...लायां चरत्येषः तस्माद्विपं दक्षिणे भाग उक्तो मुनीन्द्रैः

जानीयादुभयं बुधो जठरगे देवस्य कन्दे नृणां
घ्राण.... ....यं सन्ध्ये च पूर्वापरे ।
उत्पत्तिं च लयं च सन्ततमधो वृत्तिं निशां वासरं
तूर्ध्वां वृत्तिमधस्तथाहिमकरश्चोर्ध्वं दिनेशं गतिम् ॥

End :

ततो दक्षिणभागे तु स्वगुरुं पूजयेद् बुधः ।
नमस्कृत्वा ततोऽनुज्ञां प्राप्य चात्मनि रोपयेत् ॥
एवं सम्पूजयेन्नित्यं महतीं सिद्धिमाप्नुयात् ।

Colophon :

इति बहिर्यागपटलो दशमः । इति महासंमोहनाख्ये तन्त्रे भुवनाधिपकल्पः समाप्तः ।

Author :

Remarks—The Ms. lacks both beginning and end. The leaves in the middle are much worn away. Two verses occur after the colophon.

॥ सम्प्रदायदीपिका ॥

No. 1016 B. SAMPRADĀYADĪPIKĀ.

C. O. L. No. 2319 B.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—8. 15 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—400.

Owner—Same as No. 1019 A.

Subject—Explication of a work on mantra.

Beginning :

... ... गणेशस्य पदपङ्कजयोर्नतिः ।
या विघ्ननिवहं दूरान्निरस्यति पदे पदे ॥

भट्टनाग .... व्याख्यारभ्यते—

तत्राचार्यः प्राप्तिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं मन्त्राधिकारिणाम् अभ्युदयनिःश्रेयसार्थं तदुपायभूतदेवतास्तुतिपुरस्सरम् आशीर्लक्षणं मङ्गलमाशास्ते प्रह्वग्राचीनेत्यादि ।

End :

अजजाङ्गलेन आजमांसेन नग्नजिदस्थि कार्पासबीजं नीलाम्भोजैः नीलोत्पलैः सौगन्धिकैः कल्हारैः काकलिकुसुमैः अशोकपुष्पैः । स्पष्टमन्यत् ।

Colophon :

इति सम्प्रदायदीपिकायां दशमः पटलः ।

ओं नमो भगवते वासुदेवाय । श्रीसरस्वत्यै नमः । श्रीपरमेश्वर्यै नमः ।

Author—Bhaṭṭanāga.

Remarks—Only the Pratīkas of the text are quoted here. Certain invocatory hymns occur at the close.

॥ कुलालिकाम्नायः ॥

No. 1016 C. KULĀLIKĀMNĀYA.

C. O. L. No. 2319 C.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—23. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—750.

Owner—Same as No. 1016 A.

Subject—Kula doctrines.

Beginning :

....क्षत्रिया वैश्या शूद्राश्च प्राक्तान्त्यजाः ।
मातङ्गम्लेछजात्युद्भा बौद्धास्सांख्या दिगम्बराः ॥
त्रिदण्डिमुण्डिखट्वाङ्गिमु....न्यः

End :

शाम्भवस्य विष्णोरियं शाम्भ.... ....
दगस्य नाभ्यधस्तात्तु मण्डलम् ।

शतकोटिप्रविस्तीर्णं देवीकुलसमाश्रयम् ॥
... ...

Colophon :

इति कुलालिकाम्नाये श्रीकुब्जिकामते ससङ्केते दक्षिण-षट्कपरिज्ञानो नाम द्वादशः पटलः ।

Author :

Remarks—The first 83 leaves are missing. The closing portion also is not intact. The leaves are much damaged.

॥ मातृसद्भावः ॥

No. 1017 A. MĀTṚSADBHĀVA.

C. O. L. No. 1642 A.

Substance—Palm leaf. Size—14" × 1¾". Leaves—71. 12 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas—3150. Incomplete.

Owner—Raghava Maron Avl., Thalavady.

Subject—Exposition of the methods of worship, the definition of different kinds of idols etc.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

प्रणम्य च गुरुं विघ्नं दुर्गां च क्षेत्रपालकम् ।
मन्त्रसङ्घटनाम्नां च तन्त्रमेतत् प्रवक्ष्यते ॥

दासलेषु समालोच्य स्वसामर्थ्यानुरूपतः ।
जगद्धिताय चास्माभिः क्रियते सारसंग्रहः ॥

तानीश्वरमुखाम्भोजसमुद्दीर्णान्यनेकधा ।
ब्रह्मणापि न शक्यानि ज्ञातुं किमुत मादृशैः ॥

अल्पवीर्यबलोत्साहधैर्यायुःसत्त्वबुद्धिभिः ।
निःसारैर्नीरसैर्निःस्वैर्जातैरस्मिन् कलौ युगे ॥

बहुदोषैर्लघुगुणैरिति मत्वानुकम्पया ।
प्रमाणं भुवनस्यास्य यथाकूपशयो हरिः ॥

वक्तुमारभते मूढस्तथा व्यवसितं त्विदम् ।
तथापि खलु विस्पष्टं भक्तिश्चोदयतीव माम् ॥

End :

व्योमव्यापि शिवाङ्गैश्च पञ्चब्रह्म दशाक्षरम् ।
जपेयुःसंयतान्(?) शुद्धांश्चतुर्भिश्च द्विजोत्तमान् ॥

धारान्ते पूजयेद्देवमुद्वास्य वरुणं पुनः ।
अवगाहं ततः कुर्यात् पात्रं कृत्वा प्रमाणतः ॥

संस्थाप्य याज्ञिकैर्वृक्षैर्निश्छिद्रेण दृढेन च ।
संछाद्य वासोदर्भैश्च बिम्बं संस्थाप्य तत् पुनः ॥

निश्छिद्रं पूरयेद् गव्यैर्व्यस्तैश्चैव समस्तकैः ।
जपेच्च पूर्ववन्मन्त्रैः संस्पृश्य प्रय... ... ॥

Colophon :

इति मातृसद्भावे मुद्रापटलः सप्तविंशतिः ।

Author :

Remarks—The Ms. describes how the deities like Devī are to be consecrated. The work comes to an end on a portion of the 11th paṭala.

॥ मातृसद्भावः ।

No. 1017 B. MĀTṚSADBHĀVA.

C. O. L. No. 1642 B.

Substance—Palm leaf. Size—14″ × 1¾″. Leaves—69. 7–8 lines per page and 36—40 letters per line. Script—Malayāḷam. No. of Granthas—1600. Incomplete.

Owner—Same as No. 1017 A.

Subject—Same as No. 1017 A.

Beginning—Same as No. 1017 A.

End:

आकुञ्चो(?)न्नीयतां दीप्तां पुनस्संहारकारिणीम् ।
षोडशान्तं ततो नीत्वा तत्पदार्थञ्च भावयेत् ॥

स्थानधातुयुतं भूयः पदे पिण्डं नियोजयेत् ।
पदं रूपे तथा रूपं रूपातीते तु निष्कलम् ॥

दिक्कालाद्यनवच्छिन्ने शिवे स्वानन्दचिद्घने ।
पुनः श्रीरुद्रशक्तिं तु स्मृत्वा सृष्टिक्रमं भजेत् ॥

Colophon:

इति मातृसद्भावे मातृप्रतिष्ठाविधिस्त्रयोदशः ।

Author:

Remarks—This Ms. ends on a fragment of the 14th paṭala. The page numbers are not in order.

॥ बलिकल्पः ॥

No. 1017 C. BALIKALPA.

C. O. L. No. 1642 C.

Substance—Palm leaf. Size—14" × 1¾". Leaves—19. 9 lines per page and 40 letters per line. Script—Malayaḷam. No. of Granthas—425. Incomplete.

Owner—Same as No. 1017 A.

Subject—The rites of giving offerings to Gods.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।
अथ चण्डिकाबलिप्रकारो लिख्यते ।

तत्र अष्टमीद्वयं वा नवमीद्वयं वा चतुर्दशीद्वयं वा कृत्तिकासु वा एकदिवसं सङ्कल्प्य तत्पूर्वेद्युर्दिवा तदर्थं कलशं श्रीभूतबलिञ्च कृत्वा रात्रौ गुरुः स्नानादि कृत्वा गर्भगृहं प्रविश्य तत्रोपविश्य ... ...
मण्डपे नमस्कृत्य पादौ प्रक्षाल्याचम्य द्वारदेशे गत्वा द्वाःस्थोरघं दत्त्वान्तः प्रविश्य निवेद्यं विसृज्य गण्डूषादिब्रह्मार्पणान्तं प्रसन्नार्घ्यादि कृत्वा देवीं निष्कलीकृत्य रक्षेत् ।

End :

ध्वजपीठस्य पुरतः कृत्वा गोमयवारिणा ।
आलिप्य चतुरश्रं च सुधाचूर्णेन शोभयेत् ॥

चतुरश्रं धान्यपीठं शालीनां द्रोणपञ्चकम् ।
कल्पयित्वा कालचक्रं तस्य मध्ये निवेशयेत् ॥

बल्यर्थं चक्रमत्रैव स्थापयेद् ध्वजसम्मुखम् ।
पूजयित्वा निवेद्याथ हवींषि... ... ... ॥

Colophon :

Author :

Remarks :

॥ मृगेन्द्रोत्तरम् ॥

No. 1018. MRGENDROTTARAM.

C. O. L. No. 460.

Substance—Paper. Size—14″ × 8½″. Pages — 174.
20 lines per page and 16 letters per line.
Script—Devanāgarī. No of Granthas—1750.

Owner—C. O.

Subject—The worship and the consecration of Śiva.

Beginning :

परमेशं नमस्कृत्य भरद्वाजमृषिं ततः ।
हरादीन्द्रं क्रमायातं ज्ञानं शृणुत सुव्रताः ॥

नारायणाश्रमे पुण्ये भरद्वाजादयो द्विजाः ।
तेपुश्चिरं प्रतिष्ठाप्य तदेकाहितमानसाः ॥

अथ तान् भावितान् मत्वा कदाचित् त्रिदशाधिपः ।
तदाश्रमपदं भेजे स्वयं तापक्षयेप्सया ॥

स तैस्सम्पूजितः पृष्ट्वा तांश्च सर्वाननामयम् ।
प्रोवाच चोदनाधम किमर्थं दानमर्च्यते (?) ॥

त ऊचुस्तद्द्वयं धर्मश्चोदनाविहितो मुने ।
देवताराधनोपायस्तप.....भीप्सिद्धये ॥

वेदेऽस्ति संहिता रौद्री .....रुद्रश्च देवता ।
... .विहितं का... ... ... ॥
... ...परं भावं जिज्ञासुः प्रहसन् विभुः ।

End :

ततो गन्तासि दुःखान्तमित्युक्त्वान्तर्हितेऽच्युते ।
हरिश्चचार तत्सर्वं सर्वदुःखान्तमाप च ॥

ज्ञानं चैतत् परं पुण्यं यद्वि(शि)ष्टं जगत्त्रये ।
श्रोतुं मृगेन्द्ररूपत्वान्मृगेन्द्रमिति सूरिभिः ॥

तदेनदुपसंहृत्य त्रैलोक्यगुरुणोदितः ।
ऋषिभ्योऽनन्तरोक्तेभ्यः सूतैस्तैरेव गोमयाः ॥

निशम्य हारीतवचस्तदद्भुतं
तपोधना नैमिशकाननौकसः ।
ववन्दिरे पापहरं हरं मुदा
प्रणम्य सद्गीर्भिरमोघसिद्धिदम् ॥

Colophon :

इति मृगेन्द्रोत्तरे सप्तविंशः पटलः ।
मृगेन्द्रोत्तरं समाप्तम् ।

यत्पादपङ्कजरजःपरिमार्जितेषु
चेतस्सु दर्पणतलामलतां गतेषु ।
शब्दार्थसम्पद उदारतराः स्फुरन्ति
विघ्नच्छिदेऽस्तु भगवान् स गणाधिनाथः ॥

शुभं भूयात् ।

Author :

Remarks—The work is divided into 27 paṭalas. Gaps are seen in paṭalas 10, 11 and 12.

॥ मृडानीतन्त्रम् ॥

No. 1019 A. MṚḌĀNĪTANTRAM.

C. O. L. No. 2359 A.

Substance—Palm leaf. Size—11″ × 2″. Leaves—17. 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 380.

Owner—Thuppan Thuppan Nambūri.

Subject—Alchemy.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
एकान्ते देवमासीनमपृच्छन्मृडमम्बिका ॥

देवदेव महादेव! भवनाशन भैरव! ।
भक्तानामनुरक्तानां भवद्यजनसाधनम् ॥

दारिद्र्यनाशनं ब्रूहि रसबन्धं कृपालयम् ।
साधु साधु त्वया पृष्टं तुष्टोऽस्मि सुभगे तव ॥

वक्ष्यामि सूतवेधं ते यि(युि)क्षूणां परं हितम् ।
दारिद्र्यविषवृक्षस्य महाशनिरुदाहृतम् ॥

रसायनं परं दिव्यमप्रकाश्यं सुदुर्लभम् ।
सूततुत्थौ सुरेशानि प्रत्येकं दशनिष्ककौ ।

संचूर्ण्य मर्दयेदेतद्द्वयं यामद्वयं ततः ।
सुवर्चलारसेनैव दश पञ्च च वासरान् ॥

मर्दयेत् क्षीरतस्तस्यास्तावदेकदिनं तत्रः ।
तत्समुद्धृत्य कलशे तद्रसप्रस्थपूरिते ।
लोलयित्वा तु कलशे मन्थयित्वा पचेन्न्यसेत् ॥

End :

चीरत्रयेणान्वयित्वा शिवत्रयकरीषकैः ।
पुटे दग्ध्वा त्रिशस्त्वेवं तत उद्धृत्य विक्षिपेत् ॥

षष्टिसंख्याङ्गुलीः कुर्यात्पूर्वोक्तभुजगद्रुतिम् ।
तद्वज्रमूषिके न्यस्य विलमण्डूकतैलतः ॥

लेपयित्वा गुलीं पूर्वां निदध्यात्तदुपर्यधः ।
अन्धयित्वा धमेन्मूषां शिवमानेन साक्षिणा ॥

(?नष्टं सु)तं भवेद्यावत्तावद्वज्रं समुद्धरेत् ।
अमुं विद्रावयेद्वज्रं पादमानेन भास्वता ॥

तुत्थनागद्विपन्निष्क... ... ... ।

Colophon :

इति श्रीमृडानीतन्त्रे रसपाशे नवमः पटलः ।

Author :

Remarks—The leaves seen immediately after this work also deal with alchemy.

॥ रसाङ्कुशः ॥

No. 1019 B. RASAṄKUŚA.

C. O. L. No. 2359 B.

Substance—Palm leaf. Size—11″ × 2″. Leaves—10.

9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 225.

Owner—Same as No. 1019 A.

Subject—Same as No. 1019 A.

Beginning:

श्रीदेव्युवाच—

रसज्ञानं शिवज्ञानं भुक्तिमुक्तिप्रदायिनी !
साङ्गेन चामरत्वञ्च खेचरत्वं भवेत्तथा ॥

इन्द्रियाणां विना भौतिकविज्ञानं च साधितम् ।
इन्द्रियैरपि साध्यन्तु सूताज्ञानं विशेषतः ॥

सूतकर्मकराणां तु बहुधा विघ्नकारिणः ।
सिद्धविद्याधरा नागा यक्षा भूता महाबलाः ॥

सर्वेषामपि विघ्नश्च रसाङ्कुशमिति ब्रुवः ।
निरङ्कुशस्समारुह्य वने मत्तमहागजम् ॥

रसाङ्कुशमविज्ञाय सूतकर्मणि यो नरः ।
कथं तया पूर्णकामं तथ्यमेतन्महेश्वरि!(?) ॥

रसाङ्कुशं महादेवि! किञ्चिन्मन्त्रक्रमं यथा ।

End:

बन्धं भवति तन्मात्रादेकाभ्रं पादहेमयोः ॥

मिश्रमस्तु च पण्णागे बद्धं भवति शुद्धितः ।
अर्कक्षीरेण सद्द्रव्यमभ्रकं नाम तत्समम् ॥

मूषालेपनकं कृत्वा तन्नागं सह बन्धय ।
भारार्धाङ्गारधाम्यास्तु हेमं भवति सद्गुणि ॥

एतद्भद्रे विशुक्लाद्यैः पञ्चनं षोडशास्तथा ।
जीर्णमस्तु तदैकाग्रं तन्नागाच्चतुष्पटिकम् ॥

कृत्वा वेधकमाप्नोति तत्परार्द्धं परः सकृत् ।

Colophon :

इति रहस्यसंहितायां रसाङ्कुशे षष्ठः पटलः ।
हरिः ।

Author :

Remarks—The work is a part of Rahasyasamhitā and its main theme is alchemy.

॥ रसहृदयम् ॥

No. 1019 C. RASAHRDAYAM.

C. O. L. No. 2359 C.

Substance—Palm leaf. Size—11″ × 2″. Leaves—30 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 675. Complete.

Owner—Same as No. 1019 A.

Subject—Same as No. 1019 A.

Beginning :

जयति स दैन्यगदाकुलमिदमखिलं पश्यतो जगद्यस्य ।
हृदयस्यैव गलित्वा जाता रसरूपिणी करुणा ॥

पीताम्बरोऽथ बलजिन्नागक्षयबहलरागगरुडचरः ।
स जयति हरिरिव हरजो विदलितभवदैन्यदुःखभरः ॥

मूर्च्छित्वा हरति रुजं बन्धनमनुभूय मुक्तिदो भवति ।
अमरीकरोति च मृतं कोऽन्यः करुणाकरः सूतात् ।

सुरगुरुगोद्विजहिंसापापकलापोद्भवं किलासाध्यम् ।
श्वित्रञ्च तदपि शमयति यस्तस्मात्कः पवित्रतरः ॥

तस्यास्ति स्वस्फुरितः प्रादुर्भावः स शाङ्करः कोऽपि ।
कथमन्यथाखिलाघं विलासमात्राच्छमं नयति ॥

र..बन्ध एव धन्यः प्रारम्भे यस्य सततमिति करुणा ।
सिद्धे रसे करिष्ये महीमिमां निर्जरामरणाम् ॥

End :

शीतांशुवंशसम्भवैहयकुलजमतीवविधगुणमभिमार्जयति । श्रीमन्नयतः किरातनाथो रसाचार्यः यस्य स्वयम(व)तीर्णा रसविद्या सकलमङ्गलाधारा, परे निःश्रेयसि परमेष्टिनोः पूर्वं येन चतुर्वर्णाः म्लेच्छादिकपापजातपापसन्त्रासा रक्षत्यन्तरं गृहीत्वा आदिवराहो मनवमहाप्रलयो हेत्यघनष्टशरीरवर्णाः नागाङ्गुष्ठीनरप्रांगुला यस्याहितवनं सोमेश्वरस्तथा सति पुनर्न्नवरङ्गैः तस्मात् किरातनृपते रसकर्मोपदेशतो दृष्ट्वा रसहृदयं तन्त्राख्यश्रीविरचितावाग्गोविन्दभट्टमतिन्नत्वा मङ्गलविष्णुसूनोन रसाख्यानामाऽयं श्रीमगवद्गे विन्दे कृत्स्नजगतां श्रेयसे भूयात् । अष्टादशसंस्काररसेन्द्रराजस्य दिव्यतनुं दृष्ट्वा लिखितं पुंसा हृदयं समाप्तसकलम् (?) ॥

Colophon :

इति श्रीगोविन्दभगवच्छ्रीपादविरचिते रसहृदये रसायनविधिर्नामाष्टादशः पटलः ॥

Author—Śrī Govindabhagavatpāda.

Remarks—The closing six leaves are devoted to a portion of Kanakamañjarī.

॥ रसोपनिषत् ॥

No. 1019 D. RASOPANIṢAD.

C. O. L. No. 2359 D.

Substance—Palm leaf. Size—11" × 2". Leaves—17. 9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—400.

Owner—Same as No. 1019 A.

Subject—Same as No. 1019 A.

Beginning :

ओन्नमः सर्वज्ञाय ।

अजममरमनादिमव्ययं त्रिगुणातीतमनन्तमीश्वरम् ।
शरणं शरणैकवत्सलं.... ...शर्वमुपैमि सर्वदा ॥

यां मूर्तिं प्रथमां वदन्ति कवयो रुद्रस्य विश्वाकृ-
र्यस्मिन्नध्वरणं हविर्गणिहितं सम्यग्घो प्रीतये ।
अन्वर्थाभिधये स कीर्तिमगमद्यो लोकपालाख्यया-
ब्रह्मांशेक्षुज(?)नीललोहिततनुं तं नौमि वैश्वानरम् ॥

चपलं दुर्ग्रहमस्थिरमूष्मासहमविदितस्वरूपञ्च ।
मानसमिव क्षिप्राभ्रमिव नौमि रसेन्द्र... ... ॥

सदा भक्त्या ह्यस्तरूपं सिद्धिसुविदितधातूत्सर्गनिपातः योगी वैयाकरणो जयति भिषक् चन्तिकेन्दो वाक्कमलसम्भवाश्विनि दुर्वासणापणिमाणव्यौमाणव्याच्छङ्खलिखितौ ताभ्यां मौसलिकोसलौ पराशरः पराशराशराव्यासः(?) सुविदितो व्यासो जैमिनिसुमन्तुवैशम्पायनप्रभृतयः शिष्या रसोपनिषदं पुराधिय.....स्म। किञ्च श्रद्धारहुलाय राहुलो लोकनाथाय लोकनाथस्सुकीर्तये सुकीर्तिः प्रभाकरमिश्राय प्रभाकरमिश्रो दिवाकराय दिवाकरमिश्रो नागार्जुनाय नागार्जुनोऽपि नागबुद्धये नागबुद्धिः प्रोवाच सुनाम्ने। एवं परम्परया व्यालिवक्त्रघोणसुकेशिकनादित्यप्रभृतीनुपदेशाद्रसोपनिषच्छास्त्राण्यवजग्मुर्यावन्मृगचारिणं मृगचारीभवन्तामिति। तदहं युष्माभि(स्मि?)श्चिरप्रयत्नेनाभ्युपनीतः पृच्छामि रसोपनिषदं शुश्रूषमाणेन कीदृशो गुरुरुपसेव्य इति। शास्त्रानुक्रमणिका प्रथमविरचितिः।

End:

ताम्बूलीश्रवणाज्ञया त्रिफलिका कङ्कोलिका गोमयो
लोहानां दयितस्तनः शशधरो जातीफलं पञ्चकम्।
रेत(?)श्चस्तसमस्तकं निजधुः कारे पराकारणं
कर्कोटीकरविलासिमुरुवकं मूत्रं रसाजीवके ॥

मुद्गयूषेण वा शालीक्षीरमण्डेन सर्पाष्टिकम्।
का(चि?क)माची कुलुत्था स्यात् कपोतसिशितं तथा ॥

कामहर्षक्रोधचिन्ताप्रवातञ्च ग्रहं त्यजेत्।
स्मरदेवान् जपेन्मन्त्रान् ध्यायेच्चैवादिभावनाम् ॥

गगनरससिन्धुत्रिफला त्रिकटुकशिला ।

Colophon :

इति रसोपनिषदि रागयुक्त्याधिकारे एकविंशतिविरतिः ।
मृदुकारिणी पञ्चविंशतिविरतिः ।

Author :

Remarks—The Ms. comprises the 25th Virati of Rasopaniṣad and the paṭalas 47—50 of Mahat-svacchandasārasaṅgraha. The work published from this office as No. 92 TSS. may be different from the one enshrined here.

॥ श्रीसिद्धसूक्तिः ॥

No. 1019 E. ŚRĪSIDDHASUKTI.

C. O. L. No. 2359 E.

Substance—Palm leaf. Size—12″ × 2″. Leaves—33. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 650.

Owner—Same as No. 1019 A.

Subject—Description of the Śakty derived from Ś. I.

Beginning :

जीयाद् ज्योतिर्भिदोन्मुक्तिस्मा सुवर्गपदानुगा ।
शिवयोः सामरस्यैकयं मर्त्यानां वितनोति या ॥
परं यस्या विलासेन मन्त्रं विन्दुद्वयात्मकम् ।
सद्यस्सिध्यति जन्तूनामष्टौ किमुत सिद्धयः ॥

यस्याः स्रष्टापि तत्त्वज्ञो नालं वैभववर्णने ।
तस्याः परिमितार्थज्ञः कथं शक्तो भवेन्नरः ॥

येषां नाथकटाक्षोऽस्ति करुणामृतनिर्भरः ।
ते नाम परमार्थानां कथनेष्वधिकारिणः ॥

सूक्तयो ब्रह्ममुख्यानामधिकारमलीमसाः ।
सूक्तिर्जयति सिद्धानां साक्षात् स्वातन्त्र्यनिर्मला ॥

रसतन्त्रं महेशाद्यैस्सिद्धैर्यत् प्राक् प्रकाशितम् ।
तस्मादुद्धृतसिद्धार्था सिद्धसूक्तिरियं वरा ॥

End :

पारदविद्या मुदिता महितैरणिमादिवैभवैर्जुष्टा ।
अष्टादशसंस्कारैर्विरचितभूषा प्रयोगरुचिराङ्गी ॥

सुललितपदसञ्चारा सूक्तिस्सिद्धावतारिता लोके ।
सुकरमिह साधकानां साक्षाद्भूयान्मनोरथावाप्त्यै ॥

Colophon :

इति श्रीसिद्धशाम्भवतन्त्रे श्रीसिद्धसूक्त्यां भक्षणसंस्काराधिकारो नाम त्रयोदशः पटलः । श्रीगुरुभ्यो नमः ।

Author :

Remarks—The colophon proves that this work is borrowed from Śrīsiddhasambhava Tantra. The next 9 leaves cover certain details about alchemy. Medicine is dealt with in the last five leaves.

॥ यजनावली ॥

No. 1020 A. YAJANĀVALĪ.

C. O. L. No. 720 A.

Substance—Palm leaf. Size—8" × 1¾". Leaves—113. 8 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—1400. Complete.

Owner — Maheśvaran Bhaṭṭatiri, Kuzhikkāṭṭu Illom, Tiruvalla.

Subject—Invocatory rites.

Beginning :

हरिः । श्रीगणपतये नमः ।

विरिञ्चविष्णवीशविभक्तरूपै-

... ...

.....शास्त्राखिलतन्त्रमन्त्रै-

वेंद्यं पुराणं पुरुषं नमामि ॥

रमेशवक्त्राम्बुजनि··· ···

तन्त्राणि संवीक्ष्य हिताय पुंसाम् ।

यैर्विष्णुतन्त्रा बहुधा प्रणीता-

स्तेभ्यो गुरुभ्यो नियतं नमोऽस्तु ॥

अथ पूजास्समालिख्ये गुरूनाराध्य भक्तितः ।
सम्प्रदायक्रमात्प्रोक्ता दुर्वासाद्यैर्मुनीश्वरैः ॥

ब्राह्मे मुहूर्तेऽथोत्थाय पूर्वं गतदिनार्चकः ।
दूरतो मलमुत्सृज्य शुद्धिं कृत्वाऽथ मृज्जलैः ॥

यथान्यायं ततः पादौ प्रक्षाल्याचम्य वाग्यतः।
दन्तानां धावनं चैव जिह्वानिर्लेखनादिकम्।

कृत्वा स्नात्वा यथान्यायं परिधाय सिताम्बरम्॥
उपास्य सन्ध्यां विधिना प्रविश्य ...ग्रमण्डपम्।

प्रक्षाल्य पादयुगलमाचम्य च शुभैर्जलैः।
अपकृष्य च निर्माल्यं पूर्वनिर्माल्यधारिणम्॥

द्वारि चण्डं प्रचण्डञ्च पूजयित्वा स्वनामभिः।
श्रियं पुष्टिञ्च तत्रैव पूजयेद्गन्धपुष्पकैः॥

End:

परलोकगते पुत्रः पितरि स्वयमेव तु।
आराध्य स्थण्डिले विष्णुं लभेदेवंश्वरादिदम्॥

तस्मादिदं विविक्ते तु स्थाने विन्यस्य गोपयेत्।
यस्य प्रसादमवलम्ब्य सुरासुराद्याः
स्वं स्वं पदं प्रतिदिनं विधिना लभन्ते।
तस्य प्रसादजननी कमला कटाक्षै-
रालोक्य सास्तु भवतां दिनशेषभूत्यै॥

Colophon:

इति याज्ञवल्क्यां नवमं प्रकरणम्।
याज्ञवल्क्यी समाप्ता।

सृष्टिस्थितिलयहेतुं
देवं ब्रह्महरीशभेदयुतम्।
वेदान्तेषु निरूप्यं
वन्दे योगीन्द्रचेतसोपास्यम्॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

आदर्शदोषान्मतिविभ्रमाद्वा
श्रुत्यर्थहीनं लिखितं मया यत् ।
तत्सर्वमार्यैः परिशोधनीयं
प्रायेण मुह्यन्ति च ये लिखन्ति ॥

Author :

Remarks—The seven leaves succeeding the close of this work embody the three days of Kali, the dates of Śrāddha and certain items of expenditure. The next 8 leaves deal with the invocation of Śiva and the closing six, of Viṣṇu

---

॥ आशौचपद्धतिः ॥

No. 1020 B. ĀŚAUCAPADDHATI.

C. O. L. No. 720 B.

Substance—Palm leaf. Size—8" × 1¾". Leaves—12. 10 lines per page and 25 letters per line. Script—Malayāḷam. No. of Granthas—200. Complete.

Owner—Same as No. 1020 A.

Subject—Details of pollution.

Boginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

शङ्खार्यब्जगदाधरश्चधमृगाभीटाभयप्रस्फुरद्-
बाहू चन्द्रकचन्द्रखण्डविलसच्चूडौ जगत्स्वामिनौ ।
मेघश्यामलचन्द्रबिम्बधवलच्छायाभिरामाकृती
वन्द्यावञ्जलिशेखरेण शिरसा वन्दे मुकुन्देश्वरौ ॥

पिञ्छोत्तंसमपास्तनिस्तुपशरत्पूर्णेन्दुशोभामद-
स्मेरास्यं ललितं कलायकुसुमच्छायं क्वणत्किङ्किणि ।
वेणुक्वणपराकृताखिलजगद्धैर्यं किमप्यद्भुतं
तेजश्चेतसि मामकेऽस्तु सततं गोगोपगोपीवृतम् ॥

मीमांसाख्यपयःपयोधिमथने मन्थायमानाशयो
यो धर्मागमवारिराशितरणे यश्चाञ्जनेयायते ।
अन्तेवासिजनान्तरान्धतिमिरप्रध्वंससूर्यश्च यः
पाष्माभीत(?)तरोद्यतश्च गुरवे तस्मै नमः श्रेयसे ॥

वाणीं विघ्नेश्वरं व्यासं योगीश्वरसुरेश्वरौ ।
मनुमाद्यं च नत्वाहं वक्ष्याम्याशौचपद्धतिम् ॥

End :

मासपिण्डांस्ततो दत्त्वा बलिकर्म समापयेत् ।
सपिण्डीमष्टकां चापि कुर्याद्वा पञ्चमेऽहनि ॥

पित्रोर्विशेषात् कर्तव्यमार्द्रवस्त्रोपवासिना ।
एवमेव गतोऽब्दोऽब्दोऽपीत्यब्रवीदङ्गिरा ऋषिः ॥

Colophon :

हरिः । जातवेदेन लिखितमिदमाशौचपद्धतिः ।

Author :

Remarks---The two leaves following the close of this work, contain certain sentences under

the heading Naimiśiyasiddhi. Then in the next Fol. occur the following.

रसात्मा ललितोऽयं	कलिः		१६९३५७२	
		रा.	भा.	क्र.
हेमस्थः पार्थः	रविः	७	१७	५८
हरिर्वन्द्योऽभूत्	चन्द्रः	४	१४	२८
लग्नगः कालः	कुजः	३	१३	३
धनेन्द्रो नन्दनः	बुधः	४	२	९
धिगलं कनकः	गुरुः	१०	१३	३९
योगी धीरो हि	शुक्रः	४	२९	३१
सेव्योऽयं नवः	मन्दः	४	१	१७
मानवो रौद्रः	सर्वः	२	२४	५

॥ यन्त्रसारः ॥

No. 1021. YANTRASĀRA.

C. O. L. No. 447 (2 Vols.)

Substance—Paper. Size—13$\frac{1}{5}$" × 3$\frac{1}{5}$". Pages—423. 18 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—3800.

Owner—C. O.

Subject—The principles in drawing yantras.

Beginning:

हरिः । श्रीगणपये नमः ।

अथ प्रवक्ष्यामि च वैदिकानि
यन्त्राणि संक्षिप्य सतान्त्रिकाणि ।
इष्टाय भक्ताय सुसंयताय
शुश्रूषवे शिष्यवराय तावत् ॥
अथ कविरुक्त्या यन्त्राण्यर्थानि तत्र तत्र संक्षेपात् ।
स्वयमेव वदन्ति भूयो दुर्ज्ञेयत्वाद्विदाय मन्त्रविदाम् ।

अनुष्टुभो यन्त्रा लिख्यन्ते—

आलिख्याष्टदलं पादं तारं तत्कर्णिकान्तरे ।
तस्योदरे समिति च जीवं साध्यार्णवेष्टितम् ॥

तारस्य पार्श्वयोर्दृष्टिरिई इति च वै पुनः ।
तयोरधस्तात् श्रोत्रं च उ ऊ इति च तत् पुरः ॥

End :

दुर्गतावपि जातायां दुर्गतो मे मनोरथः ।
यदि नाशं न विन्देत तावतासि कृती सदा ॥

न वाक्कलुषं चित्तं मम ते पादयोः स्थितम् ।
वामये वैष्णवत्वं तु सर्वकर्मसु केवलम् ॥

इत्येवमनया स्तुत्या स्तुत्वा देवं जनार्दनम् ।
किंकरोऽस्मीति चात्मानं देवायैव निवेदयेत् ॥

त्वद्दासोऽहं देहदृष्ट्या जीवदृष्ट्या त्वदंशकः ।
आत्मदृष्ट्या त्वमेवाहमिति मे निश्चिता मतिः ॥

Colophon :

विष्णवे नमः शुभमस्तु ॥
इति यन्त्रशरीरनिर्माणप्रकारः ॥

Author :

Remarks—The subject-matter is expressed in verse. The reference to Vaidyanātha Dīkṣitīyam etc., in this work testifies to its modernism.

॥ रत्नावलिः ॥

No. 1022. RATNĀVALI.

C. O. L. No. 7..2.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—178. 7 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—4350.

Owner—Vāsudevan Śaṅkaran Bhaṭṭatiri, Tiruvalla.

Subject—Renovation of temples.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नमोऽनन्तागमज्ञानज्ञेयरूपाय वेधसे ।
तथापि वाङ्मनातीततत्त्वाय परमात्मने ॥

यो वेदवृक्षं बहुमूलशाखं
नानाफलार्थिद्विजसङ्घसेव्यम् ।
पूर्वश्रवानुश्रवभेदभिन्न-
मारोपयेत् तं पुरुषं प्रपद्ये ॥

सनत्कुमारोत्तरगार्ग्यपारमपाराशर्यपद्मोद्भवनलकूबरपुष्करसौम्यान्तकवैहायनसानन्दाख्यहैरण्यगर्भीयनारदीयपारम्पुरुषकापिलान्यन्यानि च तन्त्राणि निरीक्ष्य मधुकैरमध्विव यथाशक्ति सारमुद्धृत्य भूपरीक्षादीनां क्रियाणां रत्नावलिर्नाम प्रयोगपद्धतिः क्रियते । तत्र सर्वासां क्रियाणामाचार्यकालमूलत्वात् पूर्वमाचार्यं संगृह्य तेन सह भूपरीक्षादीनां कालं निरूपयेत् ।

End :

यस्मात् पुत्रः प्रोक्षितस्तस्मादस्मानां निरयस्थानां स्वर्गारोहणं भवेदिति निरयस्थाः पितरः स्वर्गं गच्छन्ति । सर्वे लोका मोदन्ते । अविद्याग्रहणक्रमया विद्योक्ता तां तां सर्वां विधिवत् गृह्णीयात् । तत्रायं विधिः षण्मन्त्रं चेदिति तर्पणं कृत्वा प्राङ्मुख उदङ्मुखो वासीनमाचार्यं शिष्योऽभिवादयेत् । अहमस्मि भो इति तमाचार्यं प्रब्रूयात् तव किं नामधेयमिति । तत्रात्मनो नामधेयं निवेदयेत् । तस्य जन्मर्क्षमावयोः(?) शिष्यसकाशे ज्ञात्वा सर्वेषामानुकूल्यं ज्ञात्वा सामान्यशब्दपूर्वं दक्षिणापूर्वमशक्तस्याज्ञापूर्वमुक्तपूर्वं मन्त्रं दद्यात् । षण्मन्त्रादन्येषां दिक्तर्पणं नास्ति । अन्यत् सर्वं समानम् ।

Colophon :

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

हरिः ।

पाण्डरङ्गसूनुना कृष्णेन लिखितमिदं पुस्तकम् ।

Author :

Remarks—The Ms. is very old and worn out.

॥ रत्नावलिः ॥

No. 1023. RATNÁVALI.

C. O. L. No. 1883.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—61.
5—6 lines per page and 60 letters per line.

Script—Malayāḷam. No. of Granthas—1250. Incomplete.

Owner—Brahmadattan Nampūrī, Kūḍallūr.

Subject—Beginning : Same as No. 1022.

End :

बहुबेरविधिर्नाम—पूर्वोक्तां वा मृन्मयीं काष्ठजां वा प्रतिमां कृत्वा यदि देविकादिषु स्थाप्यते, तत्र प्रतिष्ठापरिवारान् कल्पयेत् । यस्मात् तत्र परिवारबेरैस्सह देवः स्थाप्यते तत्र यो विधिः स बहुबेरविधिः । बहुबेरविधाने स्नानादिकपार्थं कर्तार्चाः पूर्वोक्ताः पञ्च कार्याः । एकबेरविधाने पूजाकर्तार्चातनविधिना चतस्रः कार्याः । अयमेकबेरबहुबेरयोर्भेदः । पूर्वं बहुबेरविधौ वक्ष्यते ।

Colophon :

Author :

Remarks :

॥ रत्नावलिः ॥

No. 1024 A. RATNĀVALI.

C. O. L. No. 2050 A.

Substance—Palm leaf. Size—22″ × 2″. Leaves—130. 8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—4300.

Owner—Devan Nārāyaṇan, Haripād.

Subject etc.—Same as No. 1022.

Author :

Remarks—The author states at the beginning of the Ms. that it is a compendium of several other kindred treatises.

॥ तन्त्रसारः ॥

No. 1024 B. TANTRASĀRA.

C. O. L. No. 2050 B.

Substance—Palm leaf. Size—22″ × 2″. Leaves—80. 8 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—2500. Complete.

Owner—Devan Nārāyaṇan, Haripād.

Subject—The rites of invoking Śiva, Skanda, etc.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

प्रणिपत्य हरिं शम्भुं गुरुं दुर्गां प्रभापतिम् ।
साधकानां हितार्थाय तन्त्रसारं वदाम्यहम् ॥

वैष्णवं पञ्चभिर्वक्ष्ये चतुर्भिश्शैवमेव तु ।
पटलैस्तु त्रिभिः स्कान्दं द्वाभ्यां दौर्गं तथैव च ॥

एकेन शास्तृयागं तु तन्त्रसारः समासतः ।
पटलैः पञ्चदशभिः क्रियतेऽनुक्रमादयम् ॥

स्थापिता(नां) त्वर्थतेषां विष्वादीनां क्रमेण तु ।
वक्ष्यामि निष्कृतिं सम्यगुत्पातेषु समासतः ॥

उत्पतन्ति पुरस्तादित्युत्पाता भयशंसिनः ।
दिव्यान्तरिक्षभौमास्ते ज्ञेयास्तन्त्रेषु कीर्तिताः ॥

प्रासादगर्भपीठार्चाः शरीरत्वेन कीर्तिताः ।
देवानां सर्वदा रक्ष्या विप्रैरुत्पातशङ्कया ॥

End :

समूलफलसंयुक्तं भूतानां बलिमाचरेत् ।
आचार्याय प्रदातव्यं सालङ्कारादि काञ्चनम् ॥

सपुत्रदारसंयुक्तमात्मानं च निवेदयेत् ।
मूर्तिपांश्च सभां चैव पूजयेत् प्रीतिपूर्वकम् ॥

आलोच्य पञ्चरात्रादिपञ्चतन्त्रार्णवं पुनः ।
गुर्वादेशानुसारेण तन्त्रसारः कृतो मया ॥

नैष दोषोऽल्पविद्याय हरिभक्ताय वाग्मिने ।
शास्त्रज्ञाय महिताय दातव्यो देशिकैः सदा ॥

येषामनुग्रहः पुंसः संसारविपनाशनः ।
नमस्तेभ्यो गुरुभ्यो वै नमस्तेभ्यो नमो नमः ॥

Colophon :

इति तन्त्रसारे पञ्चदेवताप्रकरणे पञ्चदशः पटलः ।
तन्त्रसारः समाप्तः ।

अन्तरचिद्गेहभुवा सुब्रह्मण्येन तन्त्रसारोऽयम् ।
रचितः साध(कं?क)पुंसां हिताय दोषेषु निष्कृती यूनाम् (?) ॥
इदमपि कृष्णेन लिखितम् ।

Author—Subramonya.

Remarks—The Ms. contains 15 paṭalas. The colophon reveals the name of the author. But the epithet 'आन्तरचिद्घनभुवा' seems to be enigmatic. The name of the scribe is also recorded at the close. The four leaves succeeding the colophon deal with a topic akin to Tantra.

॥ वनदुर्गाकल्पः ॥

No. 1025 A. VANADURGĀKALPA.

C. O. L. No. 2240 A.

Substance—Palm leaf. Size—19″ × 2″. Leaves—29. 9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—1100.

Owner—Kṛṣṇa Bhaṭṭatiri, Budhanur, Ceṅgannūr.

Subject—Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीसौभाग्यप्रदां देवीं मध्येतीरनिवासिनीम् ।
ध्यायामि सततं कालीं यशोवृद्ध्यै धनाप्तये ॥

हिमवच्छिखरे रम्ये नानारत्नसमाकुले ।

× × × × ×

अगस्त्य उवाच—

किं रूपं वनदुर्गायाः कान्यङ्गानि विशेषतः ।
उद्धारः कीदृशः प्रोक्तो विनियोगश्च कीदृशः ॥

End :

पुण्ये तु दिवसे प्राप्ते ब्राह्मणान् सप्त भोजयेत् ।
अग्ने जिह्वेति तान् बद्ध्वा तेषां निष्कं तु दापयेत् ॥

कुमारि? भोजयेत् सप्तमान्नवकानपि ।

Colophon :

इति गुह्योक्ते वनदुर्गाकल्पे पञ्चदशः पटलः ।

ഈക്ഷി ഈതുയുമതു ചിന്താമണി ... ... അടിമ
റന്ത്ര മടത്തിലെ ഗ്രന്ഥം എന്നറിക.

Author :

Remarks :

॥ कुक्कुटकल्पः ॥

No. 1025 B. KUKKUṬAKALPA.

C. O. L. No. 2240 B.

Substance—Palm leaf. Size—19″ × 2″. Leaves—5. 9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—200.

Owner—Same as No. 1025 A.

Subject—Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

मध्येतीरनिवासिन्यै भद्रकाल्यै नमः

अथ कुक्कुटकल्पं व्याख्यास्यामः । वशीकरणविद्वेषणोच्चा(टा)न स्तम्भनमोहनताडनोत्पाटनो... ... ... मारणात्मविभूतिश्च ज्वरप्रतिबन्धनञ्च सेनास्तम्भना... ... सहस्रं जपेत् ।

End :

ह्रीं महागणपतये नमः । वरवरद सर्वजनं मे वशमानय क्षिप्रप्रसादनाय स्वाहा श्रीं ह्रीं क्ष्रीं आं क्रों ऐं क्ष्रीं सौं ओं ।

Colophon :

Author :

Remarks :

॥ सारसंग्रहः ॥

No. 1025 C. SĀRASAṄGRAHA.

C. O. L. No. 2240 C.

Substance—Palm leaf. Size—19″ × 2″. Leaves—20. 9 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas — 725.

Owner—Same as No. 1025 A.

Subject—Tantra.

Beginning :

चक्रं कृशानुपुरसंपुटकोणकोणेषु तस्य जठरादिसुदरिशनाक्यं? आलिख्य षड्वि?युगमिताक्षरमस्य बाह्ये भूविम्बसमस्तामिदमत्युदयाय यन्त्रं चक्रे च सप्तमहासा प्रणवान्तराले नामा लिखेत्...(?)

... .षडङ्गमन्त्रान् ।

End :

खड्ग .... स्त्रिनेत्राभरणान्विताम् ।
भुजामेकपीरात्म(?)नानागुणसमन्विताम् ॥
दर्पणे सकलं मन्त्री परीक्षेत शुभाशुभम् ।

Colophon :

इति सारसंग्रहे पष्टिः पटलः ।

Author :

Remarks—The manuscript covers almost up to the end of the 50th Paṭala.

॥ विजयबलिकल्पः ॥

No. 1026 A. VIJAYABALIKALPA.

C. O. L. No. 2548 A.

Substance—Palm leaf. Size—9″ × 2″. Leaves—61. 9 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—1075.

Owner—Manayattāṭṭu Vāsudevan Nambūri, Vaikom.

Subject—Rites of offering oblations to God.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ विजयबलिरुच्यते । स च विष्णुपञ्चम्यां कार्यः । तत्र प्रथमं देवस्य शुद्धिं कुर्यात् । बलिमिव स पूर्वेद्युः यजमानशुद्धौ कृतायां संभृतसकलसम्भारोऽपराह्णे सभायामन्यत्र वा प्राङ्मुख उपविश्य गणपतिं संपूज्य प्रदीपञ्चालंकृत्याचार्यं मूर्तिपञ्च स्वाचान्तमग्रत आसन उपविष्टं गन्धपुष्पप्रदानेन च संपूज्य नववस्त्रद्वयमंगुलीयकं च ताभ्यां दत्त्वा विजयबलिः क्रियतामिति कार्यं विज्ञापयेत् ।

End :

एकश्च ब्राह्मणो भोजयितव्यः । तं देवे पक्त्वा निवेद्यं कृत्वा विसृज्य पूजाशेषं कुसुमं यजमानाय देवानुग्रहं तीर्थरूपेण तदार्पयेत् । पुनर्यजमानेन सह शैवं प्रदक्षिणं कृत्वा मण्डपे स्थाणुमन्त्रेण नमस्कारं विदध्यात् । ततो यजमानस्तस्मै समूर्तिपायाचार्याय सदस्येभ्यः परिकर्मिभ्यश्च यथाशक्ति दक्षिणां दद्यात् तानितरांश्च संमृष्टं भोजयेदिति इति ।

Colophon :

इति (जया?विजय) बलिकल्पः समाप्तः । गुरुभ्यो नमः । हरिहरये नमः । शुभमस्तु शुभमस्तु ।

Author :

Remarks—The Ms. is old and worn out.

॥ मन्त्रविधिः ॥

No. 1026 B. MANTRAVIDHI.

O. L. No. 2548 B.

Substance—Palm leaf. Size—9″ × 2″. Leaves—6. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—75.

Owner—Same as No. 1026 A.

Subject—Mantra.

Beginning:

हरिः । प्राक्षी शक्तिभ्यां नमः । ॐ अघश्शमूर्तिदीर्घघोणाश- ... ... रुतीशमूर्तिसुदीर्घमुखिशक्तिभ्यां नमः । ऋं अतिथीशमूर्तिगोमुखीशक्तिभ्यां नमः । नूं(?) हेरशमूर्तिकुड्डोदरी-शक्तिभ्यां नमः । एं झल्लीशमूर्ति ऊर्ध्वकेशिशक्तिभ्यां नमः । ऐं भौतिकशमूर्त्ति(?)विकृतमुखिशक्तिभ्यां नमः ।

End:

ओं ह्रीं ऊर्ध्वब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले वा
पाताले वानले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा ।
क्षेत्रे पीठेव(?) पीठादिषु च कृतपदा भूपदीपादिकेन
प्रीता देव्यस्सदा नः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः ॥

यां योगिनीभ्यः स्वाहा क्षां क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्रपालनाय सर्वोपचारसहितं बलिं गृह्ण गृह्ण सर्वविघ्नान् नाशय नाशय हुं फट् स्वाहा । ओं गां गीं गूं गं गणपतिनाथ वल्लभमण्या(?) सहितपादवर वरद सर्वजनं मे वशमा(न)य सर्वोपचारसहितं बलिं गृह्ण गृह्ण सर्व-विघ्नान् नाशय नाशय हुं फट् स्वाहा ।

Colophon :.

Author :

Remarks—The Ms. deals with Mantras to be chanted at the time of making offerings to God.

॥ चक्रभेदादि ॥

No. 1026 C. CAKRABHEDĀDI.

C. O. L. No. 2548 (!.

Substance—Palm leaf. Size—9″ × 2″. Leaves—18. 8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—250.

Owner—Same as No. 1026 A.

Subject — Explanation of certain mantras and cakra.

Beginning :

हरिः । श्रीगणपतये नमः ।

पराभूज्जन्म पश्यन्ती वल्लीगुच्छसमुद्भवा ।
मध्यमासौ...भावैर्वर्याक्षमाला जयत्यजा ॥ (?)

समस्त...सम्पूर्णभोगमोक्षफलाप्तये ।
ध्यानामृतमयं नौमि गुरुं सच्चिन्मयं शिवम् ॥

पूर्विण्णप्रमाणसंसिद्ध्यै सद्यो मां करोम्यहम् । (?)
चिद्रसाप्यमृतांभोधिलहरीकरशीकरैः ॥

आद्रीकृतसमस्ताङ्गो विदधे स्नानमुत्तमम् ।
अशेषकर्मानुष्ठानयोग्यताप्रतिपादिनीम् ॥

सन्ध्यामुपासे शिवयोस्सामरस्य... ....पदम् ।
शिवां चक्रमयीमेनां तं पं(?) तपनमण्डले ॥

तोयाञ्जलिप्रदानेन प्रणमाम्यम्बिकामहम् ।

End :

स्त्रीं हरि विलिं हीं ऐं ब्लें यला बलां बः ऐं ब्लूं स्त्रीं ऐ स्सुं स्त्रिं ऐं वौं बः स्त्रिं हिरिविलीं गुलुं सुलुं पुलुं लुलुं बिलुं हीं चपले चपले चलचित्ते रेतो मुञ्च मुञ्च ब्लूं क्ष्रीं स्त्रीं हरिविलीं श्रीं शिखिजीं वौ भ्रातृगतौ वे श्रे भौम... ...स्य गोमन्दः भृगुचन्द्रारबुधाभगवामन्ये राहुश्चरिष्पगः सूर्यः, नृपतिसमोऽयं योगकलिदिवसाः शब्दसाङ्गं कौन्तेयः ।

Colophon :

Author :

Remarks—The mantras occurring in No. 1026 B are also quoted herein.

॥ यन्त्रभेदः ॥

No. 1026 D. YANTRABHEDA.

C. O. L. No. 2548 D.

Substance—Palm leaf. Size—9″ × 2″. Leaves—11. 8 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—125.

Owner—Same as No. 1026 A.

Subject—Exposition of different mystic designs,

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

अथ वक्ष्यामि यन्त्राणां भेदांस्तन्त्रेषु गोपितान् ।
यैस्साधयन्ति सततं मन्त्रिणो निजवाञ्छितम् ॥

मार्णे? लिखेत् सार्णयुतं ससाध्यं
वर्गाष्टपत्रे स्वरकेसरस्थे ।
बहिस्सदीर्घैर्गगनैः प्रवीतं
रक्षाकरं यन्त्रमिदं प्रशस्तम् ॥

पुटीकृते भूमिपुरस्य युग्मे
मायां लिखेन्मध्यगसाध्यसंज्ञाम् ।
वकारकोणेन महीपुरेण
संवेष्टितं वश्यकरं तदुच्चैः ॥

मध्ये सार्णविदर्भितं प्र(चु?पु)टितं मृत्युञ्जयं त्र्यक्षरैः
क्षान्तस्थं निजसाध्यनाम विलिखेत् किञ्जल्कसंस्थान् स्वरान् ।
पत्रेष्वष्टसु नाममन्त्रपुटितं वर्गांस्तदग्रेष्वधो-
यन्त्रं पद्मपुटीकृतं निगदितं मृत्युञ्जयाख्यं परम् ।

End:

कामं लिखेत् साध्ययुतं सरोजे
स्वरोल्लसत्केसरवर्गपत्रे ।
उदीरितं मन्मथयन्त्रमेतत्
सौभाग्यलक्ष्मीविजयप्रदायि ॥

काश्मीररोचनालाक्षामृगेभमदचन्दनैः।
विलिखेन्मदलेखिन्या यन्त्राण्येतानि देशिकः ॥

भूमिस्पृष्टं शवस्पृष्टं दग्धं निर्माल्यसंयुतम्।
विशीर्णं लङ्घितं मन्त्री यन्त्रं जातु न धारयेत् ॥

Colophon :

Author :

Remarks — Protective and enticing yantras are dealt with in this Ms. The introductory portion shows that ministers used to wear such mystic symbols.

॥ विष्णुसंहिता ॥

No. 1027. VIṢṆUSAMHITĀ.

C. O. L. No. 1063.

Substance—Palm leaf. Size—16½″ × 2″. Leaves—100. 8—9 lines per page and 48—56 letters per line. Script—Malayāḷam. No. of Granthas—2600. Complete.

Owner—Cirakkal Rāja Avl.

Subject—Tantra.

Author :

Remarks—The script is legible. The Ms. is printed as No. 85 TSS.

॥ विष्णुसंहिता ॥

No. 1028 A. VIṢṆUSAMHITĀ.

C. O. L. No. 1223 A.

Substance—Palm leaf. Size—15½″ × 2″. Leaves—59. 12—14 lines per page and 60—66 letters per line. Script—Malayāḷam. No. of Granthas—3100. Complete.

Owner—Kochunārāyaṇan, Chirayil.

Subject—The worship of Viṣṇu.

Author :

Remarks—This work is available in print.

॥ नारदीयपद्धतिः ॥

No. 1028 B. NĀRADĪYAPADDHATI.

C. O. L. No. 1223 B.

Substance—Palm leaf. Size—15½″ × 2″. Leaves—39. 14 lines per page and 60—68 letters per line. Script—Malayāḷam. No. of Granthas—2200.

Owner—Same as No. 1028 A.

Subject etc.—Same as No. 974 A.

Colophon :

इति नारदीयपद्धतौ स्नपनविधिः सप्तदशः पटलः ।

नारदीयपद्धतिः समाप्ता ।

Author :

Remarks—The Ms. is well preserved. The script is small.

॥ विष्णुसंहिताव्याख्या ॥

No. 1029. VIṢṆUSAMHITĀVYĀKHYĀ.

C. O. L. No. 1229.

Substance—Palm leaf. Size—20″ × 2″. Leaves—142. 9 lines per page and 72—78 letters per line. Script—Malayāḷam. No. of Granthas—6000. Incomplete.

Owner—C. O.

Subject—Tantra.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीगुरुभ्यो नमः प्राग्भ्यो निर्ममेभ्यः प्रकुर्महे ।
पत्ये गणानां दम्पत्योरपत्याय च दिव्ययोः ॥

स्थूलात् स्थूलतरः सूक्ष्मादपि सूक्ष्मतरः प्रभुः ।
यः परस्मात् परतरस्तस्मै स्ताद्विष्णवे नमः ॥

नमस्तस्मै सुमतये यो दिव्यां विष्णुसंहिताम् ।
आविश्चक्रे भुवश्चक्रे गङ्गामिव भगीरथः ॥

सुमतेस्संहितार्थो यः सूर्यकेर्न प्रकाशितः ।
मया यदुल्मुकेनेव प्रकाश्य इति हास्यता ॥

यत्नादर्थाच्छरत्नैर्महितसुमतिसह्याद्रिराजावतीर्णा
गाढेनाप्तैर्मयाप्तां हरिपदजलधिं संहिताताम्रवर्णीम् (?) ।
तारं हारं वहन्ती चितमतिसुमुखी चारुमध्या विदग्धैः
प्रेक्ष्या व्याख्यावधूटी जयतु शुभपदाहारिणीनामधेया ॥

अथ भगवानखिललोकानुग्रहगृहीतविग्रहः विश्वसम्भवे निःश्वसितवदात्मनो वदनाम्बुजादुद्गतं महान्तं विष्णुसंहिताख्यमागमसार्वभौमम् अल्पधियामयमनध्येय इति ध्यायन् सुमत्यौपमन्यवक्तृश्रोतृद्वारेण संक्षेप्तुकामः स्वयं स्वतन्त्रोऽपि शिष्टानिष्टदेवताभीष्टपरिकीर्तनादिमङ्गलं कर्तव्यं ग्रन्थादाविति बोधयन् परप्रकृतिवाचकरूपश्रीशब्दसंकीर्तनलक्षणं मङ्गलमाचरन् मुखतश्शिष्याचार्यसम्प्रयोगं प्रतिपादयन्नर्थाद्विषयप्रयोजनसंबन्धाधिकारिणोऽपि दर्शयति — श्रीशैलेत्यादिना ।

End :

अथैवं लब्धाचार्यभावस्य पूजाप्रतिष्ठाद्यनुष्ठानयोग्यस्य तद्योग्यभूम्यपेक्षया तस्या ग्राह्या ... ...

Colophon :

इति नारायणविरचितायां हारिण्याख्यायां विष्णुसंहिताव्याख्यायामेकादशः पटलः ।

Author—Nārāyaṇa.

Remarks—The 12th paṭala is commenced at the close of the Ms.

॥ विष्णुसंहिताव्याख्या ॥

No. 1030. VIṢṆUSAMHITĀVYĀKHYĀ.

C. O. L. No. 2070.

Substance—Palm leaf. Size—20″ × 2″. Leaves—226. 10 lines per page and 73 letters per line. Script—Malayāḷam. No. of Granthas—9900.

Owner—C. Nārāyaṇan Bhaṭṭatiri, Parambur Illom, Thiruvalla.

Subject—Explanation of Viṣṇusamhitā.

Beginning—Same as No. 1029.

End :

कथमयाचितत्वादभीष्टमज्ञात्वा दद्यादित्यत्राह—जानात्येव हि कामं स इति । कालमिति वा पाठः । फलदानकालमित्यर्थः । अकालयाचनं प्रयोजनाभावाद्वैराग्यहेतुत्वाच्च न कर्तव्यमित्यभिप्रायः । किञ्च भक्तिं स्नेहादीन् पूजां स्वविषयकृतमर्चनं गुणान् विनयादीन् अगुणान् फलयाचकत्वादिदोषान् जानातीति ।

Colophon :

इति विष्णुसंहिताव्याख्यायां हारिण्याख्यायामेकोनत्रिंशः पटलः ।

Author—Nārāyaṇa.

Remarks—The Ms. comprises 29 paṭalas and a fragment of the 30th. Thence the following topics are also touched upon here.

Mṛtasañjīvanam
Mṛtyupañcākṣaram
Puruṣasūktayantralekhanam

॥ विष्णुसंहिताव्याख्या ॥

No. 1031 A. VIṢṆUSAMHITĀVYĀKHYĀ.

C. O. L. No. 2418 A.

Substance—Palm leaf. Size—18½″ × 1½″. Leaves—206. 8—14 lines per page and 84 letters per line. Script—Malayāḷam. No. of Granthas—12000. Complete.

Owner—C. O.

Subject—Elucidation of Viṣṇu Samhitā.

Beginning—Same as No. 1030.

End :

अथ सुमतिरेवं विष्णुमुखोद्गतं विष्णुसंहिताख्यं शास्त्रमौपमन्यवाय यथावद्व्याख्यानेनोपदिश्य मुखप्रसादेन तस्य कृतार्थतां ज्ञात्वा तस्मात्पर्वतादनुज्ञामादाय विष्णुसमीपगमनाय त्वरमाणस्तस्य तदनुमत्यर्थमाह—समाप्तेति । इयं संक्षिप्ता सत्यपि महाविष्णुसंहितागतसमस्तार्थप्रकाशनदक्षविष्णुसंहिता भवते मया व्याख्याता समाप्ता च तदहं विष्णुसमीपे गच्छामि । भवते समस्ताभिप्रेतसिद्धिरस्तु । पुनर्दर्शनमपि भूयादिति शेषः । भद्रं भवतु ॥

Colophon :

यस्य व्याघ्रपुरौकसः कृतवृषाद्रीशप्रसूनाञ्जलि-
प्रीतेः पूर्णगुणः पितोदय इति ख्यातस्स नारायणः ।
यां हारिण्यभिधां व्यधादिह विभोर्विष्णोर्महासंहिता
व्याख्यायामतियात एष पटलस्त्रिंशः श्रितोऽर्थश्रिया ॥

व्याख्याने दुर्ग्रहस्यास्य कृता चेदन्यथा गतिः ।
तत्सर्वं देव सर्वेश क्षम्यतामयमञ्जलिः ॥

हरिः ओम् ।

Author—Nārāyaṇa.

Remarks—The opening leaf discloses the dates of a few events as evinced by the statements "൭൭ ഇടവം ൫൯ മലയിൻകീഴ് ധ്വജപ്രതിഷ്ഠ" "വൃശ്ചികം ൨൫ വല്യച്ചാലയിൽ അഷ്ടബന്ധനം". The colophon is succeeded by a panegyric in verse and in prose the latter of which is termed as "ശംഖലാഗദ്യം". At the close of the invocation in prose, above referred to, occurs "ഇത് മേൽപത്തൂർ ഭട്ടതിരി ചമച്ച ശംഖലാഗദ്യമെന്നറിക". The last six leaves are devoted to the invocation of deities on festive days and the leaves thereof range between ൱൨൫ (125) and ൱൩൦ (130).

॥ ऋक्संहिताभाष्यम् ॥

No. 1031 B. ṚKSAMHITĀBHĀṢYAM.

C. O. L. No. 2418 B.

Substance—Palm leaf. Size—18½" × 1½". Leaves—15. 10 lines per page and 56 letters per line. Script—Malayāḷam. No. of Granthas—525. Incomplete.

Owner—Śri Padmanābhar Subramaṇyar, Kuvakkara Maṭhom.

Subject—A hymnic index.

Beginning :

हरिः । श्रीगणपतये नमः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥

अथ पञ्चमाष्टके प्रथमाध्याय आरभ्यते ।

षष्ठमण्डलस्य षष्ठेऽनुवाके चतुर्दश सूक्तानि । तत्र स्तुपे नरेति एकादशर्चं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका 'स्तुप एकादशाश्विनंत्वि'ति । मण्डलद्रष्टा बार्हस्पत्यो भरद्वाज ऋषिः । अनुक्तत्वात्त्रिष्टुप्। अश्विनौ देवते । प्रातरनुवाकाश्विने क्रताविदमादिके द्वे सूक्ते । आश्विनशस्त्रे चैते एव । सूत्रितं च 'स्तुपे नरेति सूक्ते' इति । तत्र प्रथमा स्तुपे नरेति । दिवे द्युलोकस्य नरा नेतारौ अस्य भुवनस्य प्रसन्ता प्रसन्तौ प्रसक्तवन्तावीश्वरौ अश्विनाश्विनौ स्तुपे प्रगीतमन्त्रसाध्यैः स्तोत्रैः अप्रगीतमन्त्रसाध्यैः शस्त्रैः जरमाणः स्तुतिं कुर्वन् हुवे आह्वयामि ।

End :

मा नो अग्ने । हे अग्ने! नोऽस्मान् अवीरते अपुत्रतायै मा परादाः (य?र)क्षसे वलिने (वलिने?) चास्मान् मा देहि । दुर्वा(साय?ससे) दुष्टवस्त्राय च नो... ....

Colophon :

इति पञ्चमस्य प्रथमे पञ्चविंशो वर्गः ॥

Author—Sāyanācārya.

Remarks—The 20th and a portion of 21st Varga of the 1st chapter in 5th Aṣṭaka are included in this Ms. The work has been printed in Calcutta.

॥ विष्णुसंहिताव्याख्या ॥

No. 1032. VIṢṆUSAMHITĀVYĀKHYĀ.

C. O. L. No. 2419.

Substance—Palm leaf. Size—14″ × 2″. Leaves—180. 9—12 lines per page and 50—54 letters per line. Script—Malayāḷam. No. of Granthas—6200. Incomplete.

Owner—Śrī Padmanābhar Subramanyar, Kuvakkara Maṭhom.

Subject—Same as No. 1030.

Beginning—Same as No. 1030.

End :

अत्रेति । अत्र पञ्चहोमपक्षे शतेशते शतसंख्यया हुतद्रव्यान्तरे पूर्णां दद्यात् । कृताचार्यस्तु होमयेदित्यत्र तुशब्द एवार्थः । वाशब्द उत्तरार्धादाकृति यष्टव्या(?) तत्र अधिवासविषये आचार्य एव वा होमयेदिति संबन्धः । वैशब्दो मुख्यत्वं सूचयति । पटलमुपसंहरति—

इति विष्णुसंहितायां विम्बशुद्धिप्रतिपादकः पटलः षोडशोऽतीतः इत्यर्थात् ।

Colophon :

इति विष्णुसंहिताव्याख्यायां नारायणविरचितायां हारिण्याख्यायां षोडशः पटलः ।

Author—Nārāyaṇa.

Remarks—The work contains 16 paṭalas. The leaves have decayed a little.

॥ विष्णुसंहिताव्याख्या ॥

No. 1033. VIṢṆUSAMHITĀVYĀKHYĀ.

C. O. L. No. 439 (3 Vols.)

Substance—Paper. Size—13½″ × 8½″. Pages—666. 20 lines per page and 24 letters per line. Script—Malayāḷam No. of Granthas—10,000. Complete.

Owner—C. O.

Subject—Exposition of the principles in the constructions of temples etc.

Beginning—Same as No. 1030.

End—Same as No. 1032 A.

Colophon—Same as No. 1032 A.

Author—Nārāyaṇa.

Remarks—The Ms. comprises 30 paṭalas. The words "വ്യാഖ്യാവൈകസഃ" in the text reveal the birth place of the author as Vaikom. The following panegyric of Viṣṇu is seen at the close.

नमः किरीटोज्ज्वलकुण्डलाङ्गद-
प्रलम्बहारोदरबन्धशोभिने ।

मणिप्रदीप्तैर्वलयाङ्गुलीयकैः
सकङ्कणैरङ्कितदीर्घबाहवे ॥

पिनद्धपीताम्बरकाञ्चिकाञ्चित-
प्रकामपीनोरुनितम्बभूमये ।
मनोज्ञजङ्घारुचिपूरनूपुर-
प्रबद्धरत्नद्युतिरञ्जिताङ्घ्रये ॥

उरोनभोभासुरकौस्तुभांशुम-
ज्ज्वलत्परीवेषमनोहरस्रजे ।
स्वभूरिभासा परिभासितांशुम-
च्छशाङ्कबह्व्यादिसमस्ततेजसे ॥

स्वमार्गणोत्थश्रुतिमार्गणेच्छया
गृहीतमत्स्याकृतिमत्स्वरूपिणे ।
स्वमूर्ध्ववास्तव्यपतद्धरोद्धृति-
क्षमाचलेन्द्रच्छविकच्छपात्मने ॥

पुरा हिरण्याक्षहृतोर्वराहृति-
त्वराम्बुधिक्षोभिवराहरूपिणे ।
स्फुरन्नखोद्दारितदैत्यराड्उरः-
क्षतोत्थरक्ताक्तनृसिंहरूपिणे ॥

पदत्रयाक्रान्तजगत्त्रयार्पित-
द्युसद्मनः(?) कामनवामनात्मने ।
अनेकशः क्षत्रियतक्षतिक्षमो-
द्भट...कान्तितरामरूपिणे ॥

पुलस्त्यपुत्रायतनेन्द्रसौख्यद-
स्वसेतुशय्यार्पकराधवात्मने(?) ।
स्वफालभूपातिलकाभमेदिनी
विशेषतः(?) श्रीबलभद्ररूपिणे ॥

नृपात्मकक्षोणिभरासुरच्छिदि-
क्रियाकृतार्थीकृतकृष्णरूपिणे ।
शराम्बुवर्षक्षपितत्रिविष्टप-
प्रवृद्धकल्किप्रलयाम्बुदात्मने ॥

नमो नमस्तेऽखिलवस्तुरूपिणे
नमः समस्तेन्द्रियशक्तिरूपिणे ।
नमः समस्तान्तरजीवरूपिणे
नमोऽखिलप्राणिघटानियामिने ॥

रमाधराकल्पलताभिवेष्टित-
स्वभक्तकामप्रदकल्पशाखिने ।
नमः परस्मै पुरुषाय विष्णवे
सदद्वयानन्दचिदात्मने नमः ॥

य एवमेतत् स्तुतिरूपमभ्यसेद्
दिने दिने द्वादशकं नरो हरेः ।
स भक्तिमानेत्य परामिह श्रियं
परत्र वा मुक्तिमयत्नमाप्नुयात् ॥

This could not be attributed to Nārāyaṇa with certainty. The text is published as No. 85 TSS.

॥ विष्णुसंहिताव्याख्या ॥

No. 1034. VIṢṆUSAMHITĀVYĀKHYĀ.

C. O. L. No. 2549 A.

Substance—Palm leaf. Size—11½″ × 1½″. Leaves—196. 7 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—3400.

Owner—Vāsudevan Nambūri Avl., Vaikom.

Subject—Exposition of religious rituals.

Beginning :

.....ष्ठादिकर्मज्ञः कालवित्तमः ज्योतिश्शास्त्रज्ञः । कीदृशेभ्यः शिष्येभ्यः इति चेद् उपसन्नेभ्यः शुश्रूषया समीपवर्तिभ्यः स्वशिष्येभ्यो विशेषतः स्वेन दीक्षितेभ्यः कुण्डमण्डलमुद्रादियुक्तं व्याचक्षीत। विनीतेभ्यः शिक्षाजनितसंस्कारयुक्तेभ्यः । एवं गुरोः शास्त्रं ज्ञात्वा पुनरप्यभिपक्तस्तु परेभ्यः प्रतिपादयेत्। ततश्शिष्यान् दीक्षयेच्च स्थापनादिकं कर्म च कुर्यात् । तर्हि दीक्षितानां सर्वेषां प्रतिष्ठातन्त्रश्रवणादिष्वधिकारोऽस्तीति चेद् दीक्षितोऽपि शूरस्तन्त्रं न पठेत् तथा न शृणुयाच्च ।

End :

कीर्तौ च श्रूयमाणायां हृदयं जायतेरदः(?) अन्तराया हि ।

Colophon :

साक्षाद्भगवता प्रोक्ता सर्वाज्ञानविनाशिनी ।
या विष्णुसंहिता पुण्या धर्मकामार्थमोक्षदा ॥

गुरोरनुग्रहात्तस्या मया व्याख्या विनिर्मिता ।
स्वामिना नागपूर्वेण नाम्ना तत्त्वप्रदीपिका ॥

सेयं विमत्सरैः शास्त्रैर्विष्णुभक्तैर्दृढव्रतैः ।
शोधनीया प्रयत्नेन समुदीक्ष्य महात्मभिः ॥

भगवन्नत्र यत् प्रोक्तमपशब्दादिकं मया ।
क्षन्तुमर्हसि तत्सर्वं देहि भक्तिं त्वयि स्थिराम् ॥

इति विष्णुसंहिताव्याख्यायां तत्त्वप्रदीपिकायां त्रिंशः पटलः ।

Author—Nāgasvāmin.

Remarks—A few leaves at the beginning and 19 in the middle are missing.

॥ विष्णुसंहिताव्याख्या ॥

No. 1035. VIṢṆUSAMHITĀVYĀKHYĀ.

C. O. L. No. 445.

Substance—Paper. Size—13½″ × 8½″. Pages—302. 20 lines per page and 18 letters per line. Script—Devanāgarī. No. of Granthas—3150. Complete.

Owner—C. O.

Subject—The rites of worshipping Viṣṇu.

Beginning :

हृदये जृम्भतां नित्यं मम हस्तिमुखं महः ।
अभिप्रेतार्थसिद्ध्यर्थं दैवैरपि यदर्चितम् ॥

या भारतीति विख्याता लोके सा प्रददातु मे ।
अज्ञानतिमिरान्धस्य ज्ञानदीपं शुभानना ॥

भासतां नो हृदम्भोजे किङ्किणीजालमण्डितम् ।
कलाय(भुवन?कुसुम)श्यामं तेजो भुवनभासकम् ॥

उद्धृत्य पाञ्चरात्रेभ्यः सारं येनेदमीरितम् ।
भुक्तिमुक्तिप्रदं तन्त्रं तस्मै सुमतये नमः ॥

गुरून् प्रणम्य सर्वज्ञान् तत्प्रसादान्निरूप्यते ।
तन्त्रस्यास्य मया व्याख्या नाम्ना तत्त्वप्रदीपिका ॥

औपमन्यवः सिद्धं प्रणम्य पृष्टवान् । उपमन्योर्गोत्रजात औपमन्यवः। कीदृशम्। श्रीशैलशिखरे आसीनं, सिद्धं साधितपुरुषार्थम्। तन्त्रपारगं तन्त्रशास्त्रस्य पारङ्गतम्। अस्मान्मम ज्ञानमुपलब्धुं शक्यत इति मत्वा पृष्टवान् ।

End—Same as No. 1034.

Colophon :

Author—Nāgasvāmin.

Remarks—This work is the simplest commentary on Viṣṇusamhita.

॥ वैखानसागमः (मरीचिप्रोक्तः) ॥

No. 1036. VAIKHĀNASĀGAMA (Marīciprokta).

C. O. L. No. 2194.

Substance—Palm leaf. Size—14″ × 2″. Leaves—160. 10—12 lines per page and 44 letters per line. Script — Grantha. No. of Granthas — 4800. Complete.

Owner—Keśavan Keśavan Maṇalikkaramaṭhom.

Subject—The rites of worshipping Viṣṇu.

Author—Marīci.

Remarks—This Ms. is published as No. 121 in TSS. The codex is so mildewed that several leaves have become inseparably glued to one another.

॥ वैखानसागमः (भृगुप्रोक्तः) ॥

No. 1037. VAIKHĀNASĀGAMA (Bhṛguprokta).

C. O. L. No. 193 A.

Substance—Paper. Size—13″ × 8″. Pages—246. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—2460.

Owner—C. O.

Subject—Vaiṣṇava Tantra.

Beginning :

श्रीः ।

वैखानसे यज्ञाधिकारप्रकरणम् ।
श्रीमद्भृगुमहर्षिप्रोक्तम् ।
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

... ...वासगुरवे नमः ।
.... वरं श्रेष्ठं नरलोकनिवासिनम् ॥

कुशासने समासीनं नारायणपरायणम् ।
समासाद्य प्रणम्यैवं भगवान् शान्त... ॥

...न्त्रेण कैर्मन्त्रैः कं देवं नियतेन्द्रियाः ।
तदर्चायां तु परमं (पदं गच्छेयुरव्ययम्) ॥

ऋषय ऊचुः—

न श्राद्धात् तत्यजाद्धि?... ... ...

भृगुः—

युष्माभिश्चोदितं सर्वं साधु वक्ष्याम्यशेषतः ।
शृणुध्वं मनसा देवं स्मृत्वा नारायणं परम् ॥

End :

तस्माद्यथोक्तलाभे तु मूलागारं सलक्षणम् ।
कृत्वैव विधिना धीमान् स्थापयेत्तत्प्रयत्नतः ॥

यथोक्तबालालयं कुर्यात् मूलागारं समं भवेत् ।
... . सप्ताहं हुत्वान्ते मन्त्रवित्तमः ॥

बालालय... ... .

Colophon :

इति श्रीवैखानसे भृगुप्रोक्तायां संहितायां यज्ञाधिकारे उत्सव-प्रायश्चित्तविधिर्नाम एकोनपञ्चाशोऽध्यायः ।

Author—Bhṛgu.

Remarks—The Ms. clearly states the sacrificial rites, the worship of Viṣṇu, the consecration of deities etc. The first 49 chapters and 6 verses in the 50th of Yajñādhikāra constitute this codex.

॥ वैखानसागमः (भृगुप्रोक्तः) ॥

No. 1038. VAIKHĀNASĀGAMA
(Bhṛguprokta).

C. O. L. No. 193 B & C.

Substance—Paper. Size—13″ × 8″. Pages—369. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—3690.

Owner—C. O.

Subject—Description of the rites for the consecration and purification of Viṣṇu's image.

Beginning :

श्रीः ।

वैखानसे क्रियाधिकारः भृगुप्रोक्तः ।

हृदि स्थिरगतं पीठं चतुरश्रं हिरण्मयम् ।
नानामणिगणज्वालादुष्प्रेक्षं शुभमुज्ज्वलम् ॥

तस्य मध्यगतं ध्यात्वा नारायणमनामयम् ।
शुद्धस्फटिकसङ्काशं शङ्खचक्रधरं परम् ॥

आसनाद्युपचाराणि मनसा तस्य भावयेत् ।
एषा तु मानसी पूजा बेरपूजापि वक्ष्यते ॥

उक्तप्रमाणप्रतिमां हाटकादिविधां पराम् ।
प्रतिष्ठाप्यार्चयेत् सा तु बेरपूजेति चोदिता ॥

End :

नीत्वा सोपानमार्गेण विष्णोस्योपरि तिष्ठति ।
याम्या अभिमुखं कृत्वा भटैः परिवृतैः सह ॥

तच्छिद्रपीडनं कृत्वा तत्कराग्रेण कारयेत् ।
तस्य दक्षिणहस्ते तु दत्त्वा शस्त्रं विलग्नकम् ॥

शस्त्रेण भेदयेच्छिश्नं तस्य हस्तेन कारयेत् ।
त्रिपदं तु नयित्वा तु पातकं विसृजेद् भुवि ॥

Colophon :

इति वैखानसे भृगुप्रोक्तायां संहितायां क्रियाधिकारे पञ्चत्रिंशोऽध्यायः ।

Author—Bhṛgu.

Remarks—The Ms. embraces only the Kriyādhikāra. The worship by Aḷvars, the devotees of Viṣṇu and the exposition of Cāturvarṇya with the rites of penances of a disciplinary kind are described in the 33rd and 36th chapters respectively.

॥ वैखानसागमः (भृगुप्रोक्तः) ॥

No. 1039. VAIKHĀNASĀGAMA (Bhṛguprokta).

C. O. L. No. 267.

Substance—Paper. Size—13″ × 8″. Pages—628.
20 lines per page and 16 letters per line.
Script—Malayāḷam. No. of Granthas—6280.

Owner—C. O.

Subject—Same as No. 1038.

Beginning :

श्रीः । ओं । वैखानसागमः भृगुप्रोक्तः ।

नारायणः पिता यस्य माता चापि हरिप्रिया ।
भृग्वादिमुनयः पुत्रास्तस्मै विखनसे नमः ॥

ऋषय ऊचुः ।

ब्रह्मपुत्र! मुनिश्रेष्ठ! त्वमेव ब्रह्मणः प्रियः ।
त्वमेव सर्ववेत्तासि त्वमेव वदतां वरः ।

शृणु श्राव्यं च या विश्वो विज्ञाप्य विदितं प्रभो (?) ।
यत्कर्तव्यं कृतं कृत्स्नं परमात्मरतात्मना ॥

... ...

भृगुरुवाच ।

युष्माभिः परिपृष्टं यत् तत्सर्वमृषिसत्तमाः ।
सावधानमना यूयं श्राव्य(?)मस्मत्प्रचोदितम् ॥

अस्यार्थस्य तु जिज्ञासा सुराणामपि दुर्लभा ।
बहुजन्मार्जितैः पुण्यैस्तपोभिर्लोकपूजितैः ॥

End:

अग्निकार्यादिकं सर्वमाचरन् तरुणालये ।
मूलस्थानगते वापि बालस्थानगतेऽपि वा ॥

कुण्डेष्वेवंप्रकारेण अग्निकार्यं समाचरेत् ।
इति संक्षेपतः प्रोक्तमग्निकार्यं समाचरेत् ॥

Colophon:

इति वैखानसे खिले भृगुप्रोक्तायां संहितायां यज्ञाधिकारे नित्याग्निकार्यविशेषं नाम अष्टचत्वारिंशोऽध्यायः ।

Author—Bhṛgu.

Remarks—This Ms. contains 48 chapters in Khilādhikāra. The Vaikhānasāgama by Marīci has been published as No. 121 in TSS.

॥ वैखानसागमः (भृगुप्रोक्तः) ॥

No. 1040. VAIKHĀNASĀGAMA
(Bhṛguprokta.)

C. O. L. No. 285.

Substance—Paper. Size—13½″×8¼″. Pages—237. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—2360.

Owner—C. O.

Subject—Same as No. 1039.

Beginning :

नारायणः पिता यस्य माता चापि हरिप्रिया ।
भृग्वादिमुनयः पुत्रास्तस्मै विखनसे नमः ॥

कुरुक्षेत्रे महापुण्ये सर्वतीर्थसमायुते ।
पुण्यवृक्षसमायुक्ते देवगन्धर्वसेविते ॥

आश्रमे सम्यगासीनं भृगुं विश्वहितोद्यतम् ।
ऋषयो धर्मसंयुक्ता अभिगम्य प्रणम्य च ॥

अभिपूज्य यथान्यायमिदं वचनमब्रुवन् ।

ऋषय ऊचुः—

नमस्ते भगवन् ब्रह्मन्! नमस्ते ब्रह्मणः सुत!।
त्वमेव सर्वं वेत्तासि त्वमेव ब्रह्मणः प्रियः ॥

देवदेवं समुद्दिश्य स्थापनाराधनक्रमम् ।
त्वत्प्रसादादशेषेण श्रोतुमिच्छामहे वयम् ॥

End :

भृगुः—

एवमेव विमानेन प्रतिष्ठादिषु कारयेत् ।
भृगुप्रोक्तविधानेन स्थापितः पूजितोऽमरैः ॥

पठतां शृण्वतां चैव विष्णुलोकं स गच्छति ।
लिखिते ध्यायिते यत्र स्तुत्यते श्रवणेऽपि च(?) ॥

इह लोके श्रियः प्राप्तिः पुत्रपौत्रसमन्वितः ।
अन्ते विमानमारुह्य सायुज्यं पदमाप्नुयात् ॥

Colophon :

इति श्रीवैखानसे उत्तरतन्त्रे भृगुप्रोक्तायां संहितायामर्चनाधिकारे कूटाकारविधिः ।

कर्षणादिपुनस्संस्कारविधिर्नामाष्टत्रिंशोऽध्यायः ।

श्रीधन्विनाख्याच्च पुराद् गृहीत-
मर्चाधिकारम् अवनौ च दुर्लभम् ।
आराधकानामतिसौख्यदं च
आरोपितं श्रीकुरङ्गर्चकेन(?) ॥

श्रीमद्धन्विपुरानीतमिदमर्चाधिकारकम् ।
श्रीमत्कुरङ्गवासेन रामशर्मेण लेखितम् (?) ॥

Author—Bhṛgu.

Remarks—The portion written in this Ms. occurs in the Arcanādhikāra of Bhṛgusamhitā.

॥ वैनायकसंहिता ॥

No. 1041 A. VAINĀYAKASAMHITĀ.

C. O. L. No. 728 A.

Substance — Paper. Size—11″ × 9″. Pages—22. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—220.

Owner—C. O.

Subject—The worshipful rites for propitiating the deity Vināyaka.

Beginning :

कैलासशिखरासीनं देवदेवं महेश्वरम् ।
प्रणम्य परया भक्त्या भार्गवो वाक्यमब्रवीत् ॥

भार्गवः--

भगवन्! देवदेवेश! सर्वभूतहिते रत ! ।
त्वत्तः श्रु(त्वा?तं) सप्तकोटिभेदमन्त्रमनुत्तमम् ॥

वैनायकाभिधा मन्त्रा भोगमोक्षफलप्रदाः ।
तेषामयत्नफलदं हरिद्राख्यमनुत्तमम् ॥

वक्तुमर्हति देवेश सर्वकार्यार्थसिद्धये ॥

ईश्वर उवाच—

साधु पृष्टं त्वयेदानीं सर्वभूतहितावहम् ।
सर्वेषामेव मन्त्राणामयत्नफलसिद्धिदम् ॥

End :

एतत्ते सुसमाख्यातं रहस्यं भुवि दुर्लभम् ।
क्षिप्रं सिद्धिकरं गुह्यं सर्वकार्यार्थदायकम् ॥

शान्ताय च विनीताय गुरुभक्तिपराय च ।
विघ्नेशपदभक्ताय विनीताय प्रदापयेत् ॥

.... यश च ।
नाशिष्याय प्रदातव्यं नाभक्ताय कदाचन ॥
इति

Colophon :

वैनायकसंहितायां हरिद्रागणपतिप्रयोगे अष्टमः पटलः ।

Author :

Remarks—The Ms. points out the principles regarding the design of yantras. The whole work contains eight paṭalas.

॥ वामकेश्वरतन्त्रव्याख्या (अर्थरत्नावलिः) ॥

1041 B. VĀMAKEŚVARATANTRA with the commentary, Artha Ratnāvali.

C. O. L. No. 728 B.

Substance—Paper. Size—11″ × 9″. Pages — 43. 20 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—650. Incomplete.

Owner—C. O.

Subject—The method of invoking Śiva and Devī.

Beginning :

श्रीमन्महावनेशानपादपङ्केरुहद्वयम् ।
योगीन्द्रमधुपव्रातसेवितं सर्वदा भजे ॥

प्रियानन्दमहं वन्दे सदानन्दप्रकाशकम् ।
प्रपन्नजनसादुःखध्वान्तविच्छेदभास्करम् ॥

आद्यं विधुनमारभ्य स्वगुर्वङ्कं क्रमेण तु ।
वन्दे गुर्वैघदीशान्या करूणातरुणीप्रियम् (?) ॥

(यत्) पादाम्बुजसंभूतराजो विमलयन् मनः ।
प्रसादं तनुते मह्यं तं रत्नेशं गुरुं भजे ॥

यन्मुखाम्नायमासाद्य विद्याशुद्धिरभून्मम ।
महात्रिपुरसुन्दर्यास्तं रत्नेशं गुरुं भजे ॥

शिवं कामेश्वरीं सिद्धान् त्रिविधानपि दम्पतीन् ।
कङ्कालप्रभृतिं वन्दे गुरुं कल्याणरोचिषम् ॥

गणनाथमहं वन्दे विश्ववन्द्यं प्रपूजितम् ।
सर्वविघ्नौघनाशार्थसर्वाभीष्टफलाप्तये ॥

वटुकं योगिनीवृन्दं भैरवममितौजसः ।
प्रणमामीष्टसम्पत्तिसम्पादनसमुत्सुकान् ॥

मन्त्रमण्डलवर्णात्मरूपिणीं करुणां पराम् ।
धामसंवित्स्वरूपां तां वन्दे त्रिपुरसुन्दरीम् ॥

सम्प्रदायद्वयज्ञेन विमलस्वात्मशंभुना ।
क्रियते टिप्पणं सम्यग् वामकेश्वरशास्त्रकम् ॥

अर्थरत्नावलीत्येषा ख्यातास्तु भुवनत्रये ।
भुवनेश्वरि! ते भक्त्या क्रियते टिप्पणं यतः ॥

प्रारिप्सितस्य शास्त्रस्याविघ्नेन परिसमाप्त्यर्थं विशिष्टेष्टलाभाय परमकारुणिको भगवान् लोकानुग्रहं चिकीर्षुर्बहुरूपाष्टकशास्त्रं

संक्षिप्य चतुःशतसंख्यापरिमितैर्ग्रन्थै(कसा?स्तत्सा)रमुद्धर्तुकामस्तच्छास्त्रप्रतिपाद्यां वर्णावयवां महात्रिपुरसुन्दरीं श्रीकण्ठनाथापरपर्यायो महादेवः प्रणमति—गणेशग्रहनक्षत्रेत्यादिना ।

End :

.....व सिन्दूरवर्णाभेत्यारभ्य चिक्किर्षकरी ? स्मृतेत्यन्तस्यायमर्थः । सैव महाकामराजवीजरूपा सिन्दूरं ... ... नादित्यन्तस्य अपेति ये द्योतकशब्दः (?) मूर्ध्न्यधोमुखसहस्रारकमलयक ... ... ।

Colophon :

Author—Vimalasvātmaśambhu.

Remarks—The commentary discloses that Mahādeva *alias* Śrīkaṇṭha is credited with the authorship of the work. The commentator refers to his preceptor Ratneśa. Sāṅketikapaddhati, Śrīmataśāstram and other notable treatises arereferred to herein.

॥ वैष्णवनवीकरणादि ॥

No. 1042. VAIṢṆAVANAVĪKARAṆĀDI.

C. O. L. No. 575.

Substance—Paper. Size—11″ × 8½″. Pages—146. 18 lines per page and 18 letters per line

Script--Devanāgarī. No. of Granthas—1500. Incomplete.

Owner—C. O.

Subject—The reparation of Vaiṣṇava temples.

Beginning :

हरिः ।

अथ वैष्णवनवीकरण. . . . . .

. . . . . .

. . . . . जाङ्घु(मा?रा)र्पणं कुर्यात् . . . . . .

. . . . . .

. . . . . चतुर्वर्णं पोडश. . . . . .

. . . . . .

. . . . . ण संक्षालनसूत्रादि. . . . . .

. . . . . .

. . . . . लुकाकमीपै. . . . . .

. . . . . .

यवमुद्गति . . . . . हिमा. . . . . .

. . . . . .

पाढकियुतम् इत्येतान् . . . . . .

. . . . . .

ण च संक्षाल्याग्नौ न्यस्य गुरुस्तले . . . . . .

. . . . . .

कृत्वा गणपतिं सम्पूज्य प्रायश्चित्त. . . . . .

. . . . . .

सहबीजाङ्कु(र)दैवताः प्रीयन्तामिति सहितं पुण्याहम् ....

... ...

त्र दक्षिणे स्वस्तिके न्यासो... ..पुनः पालिकासु ... ...

.... क्षणः हनप्लावनकाठिन्या(?)

....

....क्षतविकिरणञ्च विधाय ....

....

विष्णवे इति ....

.... ह्य

पूजयेत् । पुनमर्घ्य ?... ....

....दीशान्तपङ्क्ती ....

.... भान्तौ जितन्तौ पूर्ववत् ....

....मुद्राः प्रदर्श्य लिपि-

विन्या.... ....

... ...आपोहिष्टा-

दिभिः समुक्ष्य वस्त्रादिदत्त्वा सम्पूज्य निवेद्य प्रसन्नपूजां कुर्यात् ।

End :

मूलाक्षराणि मूर्ध्नि भ्रूमध्यहृदये गुह्ये चरणयोश्च न्यस्य अङ्गानि न्यस्य ऋष्यादीन् न्यस्य मानसपूजां कृत्वा मूलमन्त्रं यथाशक्ति सञ्जप्य शङ्खपूरणमात्माराधनं च कृत्वा पीठपूजां कुर्यात् । गुं गुरुभ्यो नमः । गं गणपतये नमः इति वामदक्षिणयोः । दुर्गायै नमः । क्षं क्षेत्रपालाय नमः इत्यग्रीशयोः । आधारशक्तये नमः । विद्याब्धये नमः । रत्नद्वीपाय नमः । मणिमण्डपाय नमः । कल्पवृक्षाय नमः इति मध्ये । धर्माय नमः । ज्ञानाय नमः । अज्ञानाय नमः । अवैराग्याय नमः । अनैश्वर्याय नमः ।

Colophon :

इति तोरणकलशमन्त्राः ।

Author :

Remarks—Numerous leaves are left blank.

॥ वैष्णवपूजाध्यानादि ॥

No. 1043 A. VAIṢṆAVAPŪJĀDHYĀNĀDI.

C. O. L. No. 2327 A.

Substance—Palm leaf. Size—23″ × 3″. Leaves—159. 8—9 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—6750.

Owner—Agni Śarman Bhaṭṭatiri Avl., Tukalaśśeri, Kuḷikkāṭṭiilom, Tiruvalla.

Subject—Explication of the forms of Vaiṣṇava and Śaiva worship.

Beginning :

अथ वक्ष्ये समासेन विष्णोराराधनं स्फुटम् ।
क्रियासारानुसारेण क्रियालाघवसिद्धये ॥

विधिवत् स्नात्वा यथावदाचम्य द्वाःस्थवन्दनपूर्वकं देवागारं प्रविश्य सुखासनस्सन्नारसिंहबीजेन वा सुदर्शनेन वा, तालत्रयदिग्बन्धनाग्निप्राकारान् विधाय मूलेन पञ्चविंशतिसंख्यया त्रिवारं प्राणायामं कृत्वा वायुबीजनृसिंहबीजामृतबीजैश्शोषणदहनप्लावनानि विधाय पृथिव्याकाशबीजाभ्यां काठिन्यसुषिरीकरणे कृत्वा करन्यासपूर्वकं

लिपिन्यासेन सकलदेहमुत्पाद्य साङ्गर्ष्यादिकं लिपिगणपतिदुर्गा-मन्त्रान् संजप्य वैष्णवमनुष्ठानं कुर्यात् ।

End :

पुनर्यथाविधि मण्डपसंस्कारं कृत्वा उत्तमादिपञ्चविंशतिद्रव्यकलशैर्देवमभिषेचयेत् । अष्टबन्धं यथाविधि कुर्यात् । पुनर्दिशाहोमं कृत्वा, श्रीभूतबलिं कृत्वा उत्सवादिकं कुर्यात् ।

इति वैष्णवे सङ्कोचकलशविधिः ।

Colophon :

इति एकप्रकारो नागबलिः समाप्तः ।

ഇതു സാമാന്യം വരും പാലും കൊടുക്കുംപ്രകാരം.

समाप्तश्चायं नागबलिः ।

Author :

Remarks—The Ms. also contains forms of worship connected with various other divinities.

॥ त्रिपुरासारसमुच्चयव्याख्या (सम्प्रदायदीपिका) ॥

No. 1043 B. TRIPURĀSĀRASAMUCCAYA-VYĀKHYĀ.

Sampradāyadīpikā.

C. O. L. No. 2327 B.

Substance—Palm leaf. Size—23″ × 3″. Leaves—30. 8 lines per page and 72 letters per line. Script—Malayāḷam. No. of Granthas—1080.

Owner--Same as No. 1043 A.

Subject etc.—Same as No. 872.

Author:

Remarks—The following verse.

श्रीमन्नाथपदाम्भोजं यस्यां दिशि विराजते ।
तस्यै दिशे नमस्कुर्मः कायेन मनसा गिरा ॥

occurs at the end. The portion given below brings the Ms. to its close.

किञ्चित् पूजामाह। ऐं ह्रीं इति मण्डपशुद्धिं कृत्वा ह्रीं इति द्रव्यशुद्धिं कृत्वा हुं इति पात्राणि प्रक्षाल्य ततस्सव्यदक्षिणे गुरुगणपातिं चाभ्यर्च्य ततो हंसमन्त्रेण वा दशांगुलिस्थाने नियोज्यम्, इति मूलाधारात् कालाग्निरुद्रमुत्थाप्य दग्ध्वा इति प्रचण्डवायुमुत्थाप्य भस्मराशिमपनीय वा इत्यमृताम्भोधिमयं ध्यात्वालम् इत्यात्मानं सुस्थिरं सञ्चिन्त्य ततः द्रां द्रावणीबाणाय नमः द्रीं क्षोभणीबाणाय नमः क्लीं वशीकरणबाणाय नमः इति पञ्चबाणान् अङ्गुष्ठादिकनिष्ठिकावधि करद्वन्द्वाङ्गुलीषु विन्यस्यानन्तरं वद वद वाग्वादिनी ऐं हृदयाय नमः क्लिन्ने क्लेदिनि महाक्षोभं कुरु क्लीं शिरः ओं मोक्षं कुरु सौः शिखा वद वद वाग्वादिनि ऐं कवचाय क्लिन्ने क्लेदिनि महाक्षोभं कुरु क्लीं नेत्रम् ओं मोक्षं कुरु सौः अस्त्राय फट् इत्यङ्गषट्कम् ततः ह्रैं ह्रीं क्ष्रं शिरसि क्ष्रां मुखवृत्ते इं ईं नयनयोः उं ऊं श्रोत्रयोः सृं सॄं कपोलयोः ष्लृं ष्लॄं चिबुकयोः शं शैं दन्तपङ्क्तयोः पों पौं ओष्ठयोः यं नाभौ यः शिरसि इति षोडशकलान्यासः। अनन्तरं मातृकां यथास्थानं विन्यस्य अनन्तरं मातृकापुरस्सरेण मूलविद्यया

विन्यासं कुर्यात्। प्रथमं मूर्ध्नि द्वितीयं गुह्ये तृतीयं हृदये। गुह्ये हृदये चैको न्यासः वामादिनयनयुगे ललाटे च कर्णयुगम् आस्ये च अंसद्वये पृष्ठे च जानुयुगे नाभौ ऊर्ध्वाधःकुक्षिदक्षिणवक्त्रे...न्यासं कृत्वा बाणानङ्गानि कलास्समातृकावर्णवक्त्रविन्यासः अङ्गानि बाणका कामान् व्यापकपुष्प्यादिकं न्यसेत्। ऐं क्लां हृदयम् ऐं क्लीं शिरः ऐं क्लूं शिखा ऐं क्लैं कवचं ऐं क्लौं नेत्रं ऐं क्लः अस्त्राय फट् इति षड ङ्गन्यासः। द्रां द्रावणीबाणाय नमः इति गुह्ये। द्रीं क्षोभणीबाणाय नमः इति नाभौ। क्लीं वशीकरणबाणाय नमः इति हृदये। क्लूं आकर्षणबाणाय नमः इत्यानने। सं सम्मोहनबाणाय नमः इति मूर्ध्नि, इति पञ्चबाणन्यासं कृत्वा ह्रीं कामराजाय नमः ललाटे क्लीं मन्मथाय नमः वदने। ऐं कन्दर्पाय नमः हृदये। क्लूं मकरकेतनाय नमः नाभौ। श्रीं मनोभवाय नमः गुह्ये। इति पञ्चकामान् विन्यस्य न्यासप्रकारः। प्रथमं वद वद वाग्वादिति द्वितीयं क्लिन्ने क्लेदिनि माक्षं कुरु तृतीये ओम् मोक्षं कुरु ऐं क्लीं सौः सौः क्लीं ऐं सौः ऐं क्लीं सौः क्लीं ऐं। ततः मूलविद्यया गोलकात्वेन पादादिकेशान्तं केशादिपादान्तं विन्यसेत्। एवं न्यासजातं कृत्वा ततः गन्धपुष्पादिभिरात्मानमभ्यर्च्य ततः अर्घ्यपात्रं साधयित्वा ततः ह्रीं इति पूजोपकरणानि च पीठञ्चात्मानञ्च संप्रोक्ष्य पीठोपरि त्रिकोणपञ्चदलचतुरश्रात्मकं पद्मपीठं विलिख्य तन्मध्ये मूलमन्त्रेणाधारशक्तिं पूज्य तदुपरि कूर्माय नमः। पृथिव्यै नमः। इति पूज्य पीठस्याग्नेयादिविदिक्षु पीठपादेषु धर्मादिचतुष्टयं नमोन्तैरभ्यर्च्य पूर्वादिदिक्षु पीठगात्रेषु अधर्मादिचतुष्टयञ्चाभ्यर्च्य पीठोपरि सं सत्त्वाय नमः रं रजसे नमः तं तमसे नमः कन्दाय नमः नायलाय? नमः। आवाहनमुद्रया देवीमावाह्य संस्थापनमुद्रया संस्थाप्य सन्निधिकारिण्या सन्निधाप्य सन्निरोधिन्या सन्निरोध्य

अवकुण्ठनमुद्रया अवकुण्ठनं कृत्वा हंसमन्त्रेण मूर्ध्नि बद्ध्वा योनि-मुद्रां महायोनिमुद्रां च तन्मूर्तौ स्वदेह इव न्यासजातं विधाय अर्घ्यादिषोडशोपचारैर्मूलमन्त्रेणाभ्यर्च्य नीराज्य प्रणम्यानुज्ञापु-रस्सरं परिवारानभ्यर्चयेत् ।

॥ सारसमुच्चयः ॥

No. 1043 C. SĀRASAMUCCAYA.

C. O. L. No. 2327 C.

Substance—Palm leaf. Size—23″ × 3″. Leaves—22. 8 lines per page and 68 letters per line. Script—Malayāḷam. No. of Granthas—750.

Owner—Same as No. 1043 A.

Subject—Same as No. 871 A.

Beginning :

गणपतये नमः । श्रीगुरुभ्यो नमः ।

प्रह्वप्राचीनबर्हिःप्रमुखसुरवरानीककोटीरकोटि-
श्लिष्टस्पष्टेन्द्रनीलामलमणिमधुपश्रेणिजुष्टं कृपीष्ट ।
श्रीपादाम्भोजयुग्मं नखमणिविलसद्रश्मिकिञ्जल्कपुञ्जं
शिञ्जन्मञ्जीरहंसीमुखरितमनिशं मङ्गलं वो भवान्याः ॥

भक्त्या गुरोर्भवपयोनिधिसेतुभूतान्
श्रीपादपद्मयुगरेणुकणान् प्रणम्य ।
लम्बोदरश्च कथयामि गुरूपदिष्ट-
माराधनक्रममहं कुलनायिकायाः ॥

स्नात्वा यथाविधि विधौतकराननांघ्रि-
राचम्य सम्यगमलाम्बरयज्ञसूत्रः ।
प्रागाननो धनददिग्वदनोऽथवापि
बद्धासनो गणपतिञ्च गुरुञ्च नत्वा ॥

End :

गन्धर्वसिद्धचारणगणोप्सरो ह्येकलक्षेण ।
विंशल्लक्षैर्वशिनो भवन्ति विश्वेश्वराः सर्वे (नियुतैः?) ॥

वशिनः शतार्द्धसंख्यैस्सदाशिवाम्भोजनाभकमलभवाः ।
वश्या भवन्ति लक्षैः कोटिभिरामोति शाश्वतं धामः ॥

पूर्णाहुतिमपि कृत्वा पुररिपुदयितां विसृज्य दृढभक्तिः ।
तदनु समाहितचित्तः स्वाहानाथं विसर्जयेन्मन्त्री ॥

सपरिस्करान्तहोमे नित्यं परिधीन् रुहेन्मन्त्री (मतिमान्?) ।
नैमित्तिके तु होमे परिधीन् सपरिस्करान् दहेन्मन्त्री ॥

Colophon :

इति सारसमुच्चये दशमः पटलः ।
समाप्तश्चायं सारसमुच्चयः ।

Author :

Remarks—The last four leaves deal with Ācārya-varaṇa and a portion of Bījāṅkurārpaṇavidhi. The following verse occurs at the close.

मूलाधारपडश्रचक्रकुहरेऽप्यालिख्य वामाक्षरं
तन्मध्ये भुवनेश्वरीं च तदनु त्र्यश्रन्तु वागुद्भवम् ।
कोणच्छिद्रपुटेषु षट्स्वपि तथाब्जाकारबीजं लिखेत्
स्त्रींकारेण तु वेष्टयेत् पुन .... य? चक्रं महत् ॥

समाप्तं चेदम् ।

॥ वैष्णवानुष्ठानकलापसंग्रहः ॥

No. 1044. VAIṢṆAVĀNUṢṬHĀNAKALĀPA-SAṄGRAHA.

C. O. L. No. 715.

Substance—Palm leaf. Size—10½″ × 2″. Leaves—250. 10 lines per page and 32—48 letters per line. Script—Malayāḷam. No. of Granthas—6250.

Owner—V. Nārāyaṇan Bhaṭṭatiri Avl., Tiruvalla.

Subject—Tantra.

Boginning :

श्रीमहागणपतये नमः अविघ्नमस्तु ।

लक्ष्मीवसुन्धराधात्रे विष्णवे विश्वसाक्षिणे ।
अक्षीणानन्दसन्दोहनिर्भराय नमो नमः ॥

परशिवशक्तिश्लेषप्रविजृम्भोल्लासमण्डसद्भावम् ।
अहमाश्रयामि देवं कर्मप्रारम्भपूजितं सर्वैः ॥

मुद्रापुस्तलसद्वाहा भारती मौक्तिकप्रभा ।
मुदं ददातु सा नित्यं चतुराननवल्लभा ॥

गुरवो नः प्रसीदन्तु करुणापूर्णमानसाः ।
पदाब्जसेवया येषां कृतार्थाः सुखमासहे ॥

अहं लक्ष्मीशगौरीशदुर्गां स्कन्दं गणेश्वरम् ।
शास्तारं भद्रकालीं च नमस्कुर्वे यथाक्रमम् ॥

तासामनुष्ठानकलापसङ्ग्रहं
गुरोर्मुखादागतमादरेण ।
सुखप्रबोधाय सुमन्दचेतसां
वक्ष्यामि बीजाङ्कुरपूर्विकाः क्रियाः ॥

आदौ वैष्णवानुष्ठानकलापसङ्ग्रहः प्रोच्यते ।

End :

तृतीयदिवसे प्रायश्चित्तशान्तितच्चहोमान् कृत्वा वा अकृत्वा वा यथाबलं चतुर्थदिवसस्नानं कृत्वा देवं सम्पूज्य रात्रौ श्रीभूतबलिं कुर्वन्ति । एतदसमीचीनः पक्षः । द्रव्यालाभे केचिदाचरन्ति तदसत् ।

Colophon :

इत्यष्टबन्धविधिः ।

शङ्खं सर्जाभया लाक्षा पट्चतुर्द्व्येकभागिका ।
एकैकं लाक्षया तुल्याः कार्पासोपलवालुकाः ॥

लाक्षाभागचिता धात्री सर्वं तैलेन पेपयेत् ।
सुपिष्टं पेपयेत् सम्यक् सुमुहूर्ते निधापयेत् ॥

स्थानवृद्धिकरं पुण्यं देवसान्निध्यकारकम् ।

ഇതി. ശംഖുപൊടി ആറുകുറു്, ചെഞ്ചല്യം നാലുകുറു്, കടുക്കാ രണ്ടുകുറു് കോലരക്കു ഇരുകുറു് പരുത്തിപ്പഞ്ഞി ഒടുക്കത്തൊതകുറു്, കൊഴിപ്പുരം ഒരുകുറു്, ആറുമണൽ ഒരുകുറു്, നെല്ലിക്കാ എല്ലാററിലും പാതി. ഇവ ഒക്കെ വെവ്വേറെ പൊടിച്ചു ചീലപ്പൊടി ഇട്ടു തുക്കിക്കുട്ടി എണ്ണയിൽ കുഴെച്ചു. പലരും കൂടി ആവോളം എതിരേയുമന്തിക്കും കുത്തിക്കൊള്ളുക. ഒരാണ്ടു മുട്ടാതെ കുത്തുകിൽ മുപ്പതിററാണ്ടു ചെല്ലും.

ഇടുൻറ നേരത്തു പഞ്ഞിവച്ചു കുത്താവു. എത്രകാലം കുത്തീ അത്രയും കാലം നില്ക്കും.

इत्यष्टबन्धयोगः । शिवमस्तु ।

गर्त्तवनशङ्करेणात्मजार्थमेव सोपदेशं लिखितोऽयं पुस्तकः ।

Author :

Remarks—The Ms. describes the methods of worshipping Viṣṇu and the religious rites observed during festivals in temples. The portion explaining Aṣṭabandha is written in Malayāḷam dialect.

॥ शारदातिलकम् ॥

No. 1045. ŚĀRADĀTILAKAM.

C. O. L. No. 2247.

Substance—Palm leaf. Size—14″ × 1½″. Leaves—88.

11 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—3900.

Owner — Maṇiyar Kṛṣṇa Bhaṭṭatiri, Budhanūr, Chengannūr.

Subject—Exposition of details relating to mantras and yantras.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमाद्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कवदनं वाचामधीशं महः ॥

अन्तः स्मितोल्लसितमिन्दुकलावतंस-
मिन्दीवरोदरसहोदरनेत्रशोभि ।
हेतुस्त्रिलोकविभवस्य नवेन्दुमौले-
रन्तःपुरं दिशतु मङ्गलमादराद् वः ॥

संसारसिन्धोस्तरणैकसेतून्
वन्दे गुरून् मूर्तिशिवस्वभावान् ।
रजांसि येषां पदपङ्कजानां
तीर्थाभिषेकश्रियमावहन्ति ॥

ओम्
सारं वक्ष्यामि तन्त्राणां शारदातिलकं शुभम् ।
धर्मार्थकाममोक्षाणां प्राप्तेः परमकारणम् ॥

शब्दार्थसृष्टिर्मुनिभिश्छन्दोभिर्देवतैः सह ।
विधिश्च मन्त्रयन्त्राणां तन्त्रेऽस्मिन्नभिधीयते ॥

निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः ।
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः ॥

End :

तस्या मध्यगता नाडी पित्राख्या योगिवल्लभा ।
ब्रह्मरन्ध्रं विदुस्तस्यां पद्मसूत्रनिभं परम् ॥

आधारांश्च विदुस्तत्र जतभेदाननेकधा ।
दिव्यमार्गमिदं प्राहुरमृतानन्दकारणम् ॥

इडायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः ।
श्री... .. .. ॥

Colophon :

इति शारदातिलके लक्षणमदशिञ्जुविरचिते विंशतिः पटलः । समाप्तः पूर्वभागः । हरिः । ओम् ।

Author—Lakṣaṇamadaśiñju.

Remarks—The Ms. comprises the 1st half extending over 20 paṭalas.

॥ शिवचन्द्रिका ॥

No. 1046. ŚIVACANDRIKĀ.

C. O. L. No. 716.

Substance—Palm leaf. Size—12¾" × 1¾". Leaves—162. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—3250.

Owner—Maheśvaran Bhaṭṭatiri Avl., Kuzhikkaṭṭillam Thiruvalla.

Subject—The sacrifice for propitiating Paramaśiva and other cognate rituals.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

जयति निगमगम्यं निर्मलं निर्विकल्पं
सकलभुवनमूलं सर्वसत्तास्वरूपम् ।
अजमजरमनन्तं ज्योतिरात्मप्रकाशं
विसृमररुचिचक्रं चन्द्रचूडामणीयम् ॥

शैलायितानि घनसंसृतिसिन्धुसेतो-
र्दीपायितानि निजरूपविलोकनस्य ।
बीजायितानि कवितालतिकाङ्कुराणां
श्रीनाथपादसरसीजरजांसि वन्दे ॥

कटतटीविगलन्मदसौरभ-
भ्रमदलिव्रजनादविनोदितम् ।

मधुरमाश्रितमोदकृते रसं
गणपतिं प्रदिशन्तमिवाश्रये ॥

चतुरर्था चतुश्चक्रा चतुश्शक्तिश्चतुष्पदी ।
चतुर्वर्गा चतुर्व्यूहा भारती मम भासताम् ॥

अथाभिधास्ये यजनं समासतो
निशीथिनीनाथकलावतंसिनः ।
गुरूपदिष्टामवलम्ब्य पद्धतिं
विशिष्टशैवागमसारसंग्रहाम् ॥

End :

यथावद्विगतास्थनां परेषां विग्रहान्तरे ।
प्रवेशने देशिकानां विशेषः किल विद्यते ॥

शरीरादात्मीयाद्विविधदुरितेनैव विधिना
विनिर्यातो वातो विशति तरसा गन्धवहताम् ।
परेषां देहान्तः कलयति तदीये हृदि दृढं
निजं जीवं पश्चान्निजनिजपदेष्विन्द्रियगणम् ॥

सकलेन्द्रियैरनुभवन्विषयं
मृतविग्रहेण रमतेऽमृतवत् ।
खलु योगिनां त्रिभुवने चरितं
मनितुं स्फुटं स गिरिशोऽप्यनलम् ॥

Colophon :

श्रीवासुदेवेन विनिर्मितायां
शिवावहायां शिवचन्द्रिकायाम् ।

यथावदेकादशमुल्लसन्त्यां
तमोहरन्त्यां पटलं प्रणीतम् ॥

Author—Śrī Vāsudeva.

Remarks—This Ms. extends upto a fragment of the 12th paṭala. It is much injured.

॥ शिवचन्द्रिका ॥

No. 1047. ŚIVACANDRIKĀ.

C. O. L. No. 967.

Substance —Palm leaf. Size—15″ × 1½″. Leaves—74. 9 lines per page and 80 letters per line. Script—Malayāḷam. No. of Granthas—3300. Incomplete.

Owner—C. O.

Subject—Same as No. 1046.

Beginning :

... ...कन्दलिकाद्यैः ।
साधनराशिभिरुपेताकर्ममयीकु... ...
अशेषगुह्यागम... ... .
....गुरुवक्त्रगम्या
निगद्यते नैव मयाद्य दीक्षा ।
दीक्षान्या तदनु समीर्यते समासा-
ल्लोकानां पशुपतिसेविनां हिताय ॥

End :

गङ्गां तुङ्गे त्रिपुरजयिनो राजितामुत्तमाङ्गे
दृष्ट्वा रुष्टा हिमगिरिसुतामाश्रिता तत्सपत्नी ।
कालिन्दीव स्फुरितचलनव्याजतस्तर्जयन्ती
चिच्छीवच्छी विलसतितरां शैलराजात्मजायाः ॥

वक्त्रेन्दुं निष्कलङ्कं परिवृढमतुलं दक्षयात्मा विकासे
मत्वा नेत्रारविन्दैस्तदभिभवकृतेनाभिभूतैः कदापि(?) ।
मूर्तिर्वेधुन्तुदीव स्फुटमभिनिहता सोपकण्ठे निलीना
देवीचिच्छी चलन्ती कुसुमशरधनुस्तर्जयन्ती लसन्ती ॥

करुणाभरिते समायते परिलोले मृदुले सुशीतले ।
कमल .... ॥

Colophon—Same as No. 1046.

Author—Śrī Vāsudeva.

Remarks—The opening Fol. is missing.

॥ शेषसमुच्चयः ॥

No. 1048. ŚEṢASAMUCCAYA.

C. O. L. No. 723.

Substance—Palm leaf. Size—7¼" × 14". Leaves—128. 8—10 lines per page and 24 letters per line. Script—Malayāḷam. No. of Granthas—1750. Complete.

Owner—Maheśvaran Bhaṭṭatiri Avl., Kuzhikkaṭṭil-lom, Thiruvalla.

Subject—The rites for worshipping and anointing deities.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

ब्रह्मार्कवैश्रवणकृष्णसरस्वतीश्री-
गौर्यग्रजा ददतु कालयपि मातरो मे ।
क्षेत्राधिपोऽथ रुरुजिद्गिरिशादिरूपा-
णीन्द्रादयोऽपि नमतेऽभिमतं प्रसन्नाः ॥

गुरून् प्रणम्याथ गुरोर्निदेशा-
देषां प्रतिष्ठाद्यभिधीयतेऽद्य ।
स्वतन्त्रके साङ्गनिरङ्गभिन्ने
बह्वेकवेरेऽपि विशेषयुक्तम् ॥

योऽयं तन्त्रसमुच्चयो गुरुकृतो यत्तन्त्रसारग्रहात्
तच्छिष्टागमसारसंग्रहतयेहारभ्यमाणे ततः ।
ग्राह्यं शेषसमुच्चये सुकुशलैस्सामान्यकर्माखिलं
योऽजाद्येषु विशेष एष निखिलस्मुच्यक्तमत्रोच्यते ॥

स्नातः स्वे सदने विशोधिततले स्नातान् गुरून् मूर्तिपां-
श्चास्य प्राग्वदनान् पुरो गणपतिं सम्पूज्य संवन्द्य तान् ।
पाद्यादीन्यथ मूलमूर्तिमनुभिस्संसाध्य कर्तेशदि-
ग्येतैस्तानभिपूज्य भुक्तवत आचान्तान् वृणीयात् ततः ॥

End :

पूजार्चायामष्टबन्धस्य जीर्त्तौ
तस्यामावाह्य स्वसम्पातसिक्तम् ।
जीर्णं प्रोद्धास्यादिबिम्बे विभुं तं
नीत्वेज्यार्चां क्षालयित्वा विधिज्ञः ॥

पीठं प्रार्च्यावाह्य तन्मूलबिम्बात्
क्षिप्त्वा प्रागुद्दिष्टरीत्याष्टबन्धम् ।
सर्वं कृत्वा पायसं सन्निवेद्य
पूजां कुर्यान्मूलबिम्बे नयेच्च ॥

Colophon :

इति शेषसमुच्चये दशमः पटलः ।

Author :

Remarks—The Ms. is preserved in good condition. Several topics allied to Tantra are dealt with here in detail.

॥ शेषसमुच्चयः ॥

No. 1049. ŚEṢASAMUCCAYA.

C. O. L. No. 1197.

Substance—Palm leaf. Size—18½″ × 2″. Leaves—28. 9 lines per page and 88 letters per line. Script—Malayāḷam. No. of Granthas—1600.

Owner—Maṇalikkara Maṭhom.

Subject etc.—Same as No. 1048.

Author :

Remarks—This Ms. is a supplement to the original Tantrasamuccaya. In the closing two leaves are embodied certain mantrakhaṇḍas.

॥ शेषसमुच्चयः ॥

No. 1050. ŚEṢASAMUCCAYA.

C. O. L. No. 346.

Substance—Paper. Size—13½″ × 8¼″. Pages—130. 19 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1235.

Owner—C. O.

Subject—Beginning : Same as No. 1049.

End :

क्षणेन मे प्रसादोऽस्य क्रियतां परमेश्वरि! ।
पाद्यार्घैः स्नापयित्वैवं ब्रह्मकुम्भेन वान्ततः ॥

अवस्रुतोदकैः प्रोक्ष्य परिवारान् यजेच्छिवाम् ।
मूलं ब्राह्मेऽङ्गमनवः सुरांशे मानुपे पुनः ॥

ततोऽपि च

महामायादयश्चापि मध्यांशे मातरो नव (क्रमात्?)।
क्षेत्रपालं स्वकलशैरभिषिच्य शिवस्य च।
भैरव्या जननीनां चावस्तुतैः प्रोक्ष्य पूजयेत्॥

Colophon :

इति शेषसमुच्चयेऽष्टमः पटलः॥

Author :

Remarks—The Ms. embodies the first eight paṭalas only.

॥ शेषसमुच्चयः ॥

No. 1051 A. ŚEṢASAMUCCAYA.

C. O. L. No. 1436 A.

Substance—Palm leaf. Size—9½″ × 1½″. Leaves—84. 6—8 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—1025. Incomplete.

Owner—Śrī Padmanābhar Subramaṇyar, Marukal, Kūvakkaramaṭhom.

Subject etc.—Same as No. 1049.

Author :

Remarks—This Ms. comprises the first 6 paṭalas and the 10th only.

॥ शेषसमुच्चयविमर्शिनी ॥

No. 1051 B. SEṢASAMUCCAYAVIMARŚINĪ.

C. O. L. No. 1436 B.

Substance—Palm leaf. Size—$9\frac{1}{2}'' \times 1\frac{1}{2}''$. Leaves—40. 7 lines per page and 28 letters per line. Script—Malayāḷam. No. of Granthas—500. Incomplete.

Owner—Same as No. 1436 A.

Subject—Exposition of Śeṣasamuccaya.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमद्गुरून् गणेशं ब्रह्मादीर्देवताश्च नत्वाथ ।
शेषसमुच्चयविषयां विमृशामि यथामति व्याख्याम् ॥

अत्र खलु ग्रन्थकृत् सप्तविधतन्त्रप्रतिपादकात् तन्त्रसमुच्चयाख्यात् ग्रन्थादवशिष्टानि ब्रह्मादिविषयाणि तन्त्राणि समुच्चित्य प्रतिपादयितुमिच्छन्नादौ तदविघ्नपरिसमाप्त्यादिप्रयोजनाय ता एव देवता उद्दिश्याशिषं प्रार्थयते ब्रह्मार्केत्यादिना । एता ब्रह्माद्या देवता नमते नमनं कुर्वाणाय मे मह्यं प्रसन्ना अभिमतमिष्टं ददतु । कास्ता देवता इत्यत्राह—

ब्रह्मार्कवैश्रवणकृष्णसरस्वतीश्रीगौर्यग्रजाः । ब्रह्मा प्रसिद्धः । अर्कः सूर्यः । वैश्रवणः स एव । कृष्णो गोशालास्थः कृष्णः । सरस्वती-श्रीगौर्यः प्रसिद्धाः । अग्रजा ज्येष्ठा ।

End :

पूजार्चायामष्टबन्धस्य जीर्त्तो सत्यां तस्यामेव देवमावाह्य स्वसम्पातसिक्तं संहारनवशक्तिसम्पातसिक्तं जीर्णमष्टबन्धं प्रोद्वास्यादिबिम्बे तं विभुञ्जीत्वाथेज्यार्चां क्षालयित्वा विधिज्ञो गुरुस्तत्र पीठं प्रार्च्य तद्देवमूलबिम्बादावाह्य प्रागुदिष्टरीत्याष्टबन्धं क्षिप्त्वा सर्वं कर्म कृत्वा पायसं सन्निवेद्य पूजां यथोक्तप्रकारेण कुर्यात् । मूलबिम्बे तं देवं नयेच्च तत्र न्यासजातं मानसपूजाश्च कुर्यात् ।

Colophon :

इति शेषसमुच्चयविमर्शिन्यां दशमः पटलः ।

Author :

Remarks—The Ms. covers the first two and the 10th paṭalas. The methods of Nāṭakābhiṣeka etc. are noted in the subsequent two leaves.

॥ शेषसमुच्चयभाषाव्याख्या ॥

No. 1052 A. ŚEṢASAMUCCAYABHĀṢĀ-VYĀKHYĀ.

C. O. L. No. 1512 A.

Substance—Palm leaf. Size—14″ × 2″. Leaves—215. 10—11 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—7200.

Owner—Kṛṣṇaru Nārāyaṇaru, Muṭṭaviḷa Maṭhom.

Subject—Exposition of Śeṣasamuccaya in Malayāḷam.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

श्रीमद्गुरून् गणेशं
ब्रह्मादीद्देवताश्च नत्वाहम् ।
शेषसमुच्चयविषयां
विमृशामि यथामति व्याख्याम् ॥

कारुण्याद् गुरुनायकस्य गुरुणो गुण्यस्य भाषामयीं
कृत्वा तन्त्रसमुच्चयस्य विवृतिं लघ्वीमथो तादृशीम् ।
कर्तुं शेषसमुच्चयस्य विवृतिं संवक्ष्यतामुद्यमं
कल्याणं कलयन्तु नः कमलयोन्यर्कादिका देवताः ॥

ശ്രേഷ്ഠാനാഗമണിഞ്ഞ വാരണമുഖശ്രീചേന്ന വിഘ്നേശ്വരം
തോഷത്തോടനിശം വിരിഞ്ചവദനേ വാഴ്ന്ന വാഗ്ദേവിയും ।
ദോഷജ്ഞാവലിഭൂഷണം ഗുണനിധിശ്രീദേശികാധീശ്വരം
ഭാഷാവൃത്തി ചമപ്പതിന്നിഹ മുദാ ചാലെ തുണച്ചീടണം ॥

ചെമ്പൊത്താർബ്ബാണവൈരിക്കൊരു തിരുമകളാം
വൈമ്പെഴും ഭദ്രകാളീ
മുമ്പായുള്ളൊരു ദൈവങ്ങളുമടിമലരിൽ കുമ്പിടുന്നോരെനിക്ക
കമ്പന്തീർത്തിമ്പമോടങ്ങതിരഡടിതി മനക്കാമ്പതിൽ
സാമ്പ്രതം തേ
സമ്പന്നാനന്ദഭാരത്തൊടു പരമകൃപാസമ്പദം നഠംകിടേണം.

അല്പജ്ഞനെങ്കിലുമഹം കരുണാർദ്രമാകും
കല്പദ്രുമം തൊഴുത മൽഗുരുസൽകടാക്ഷാൽ
നല്പോടശേഷമപി ശേഷസമുച്ചയാർത്ഥം
താല്പര്യമോടെഴുതുവാൻ തുനിയുന്നിദാനീം.

End :

ഇതി പീഠം പ്രാർഥ്യ, പിന്ന പീഠത്തെ പൂജിച്ചു് മൂലബിം
ബമാവാഹ്യ, മൂലബിംബത്തിങ്കൽ നിന്നും ദേവനെ ആവാ
ഹിച്ചു് ശക്തിയോടുകൂടി സപ്തദേഹത്തുങ്കൽ നിന്നുമാവാഹിച്ചു്
സകളീകരിച്ചു് പ്രാഗ്വദ്ദിഷ്ടരീത്യാ അഷ്ടബന്ധം ക്ഷിപ്ത്വാ,
മുമ്പിൽ പറഞ്ഞതുപോലെ പുണ്യാഹാദി ചെയ്ത അലങ്ക
രിച്ചു് അഷ്ടബന്ധത്തെയും ഇട്ടു് ധ്രുവസൂക്താദിയും ജപിച്ചു്
സർവ്വം കൃത്വാ പായസം നിവേദ്യ അവാഹനാദി ഒക്കെയും
ചെയ്ത പൂജിച്ചു് പായസത്തെയും നിവേദിച്ചു് പൂജാം കൂട്ടാൽ
മൂലബിംബേ നയേച്ച പ്രസന്നപൂജയും ചെയ്തു. ഒടുക്കം
മൂലബിംബത്തിങ്കൽ യോജിപ്പിച്ചു് പ്രണവവ്യാപകാദിമാനസ
പൂജാന്തം ചെയ്തു.

Colophon :

ഇങ്ങനെ ശേഷസമുച്ചയത്തിങ്കൽ ബഹുവെംപ്രതിഷ്ഠി
ങ്കലെ വിശേഷക്രിയകളെക്കൊണ്ടു് പത്താമത്തെ പടലം
സമാപ്തമായി.

Author :

Remarks—The Ms. deals with the consecration and purification of idols. The closing seven leaves are blank.

॥ जातकपद्धतिव्याख्या (बालप्रबोधिनी) ॥

No. 1052 B. JĀTAKAPADDHATIVYĀKHYĀ

(Bālaprabodhinī).

C. O. L. No. 1512 B.

Substance—Palm leaf. Size—14″ × 2″. Leaves—27.

10 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—800.

Owner—Same as No. 1052 A.

Subject—Astrology.

Beginning:

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

व्याघ्रग्रामेशनेत्रारुणशशधराङ्गारकैः कल्पितानी-
त्येतत्सौम्याकृतेस्तेऽखिलभुवनगुरोर्भार्गवाचार्यवृत्तेः ।
उद्यन्मन्दस्मितस्य प्रकटितभुजगालङ्कृतेर्देव भद्रं
तुभ्यं सर्वग्रहात्मन् वरदवर नमः पार्वतीवल्लभाय ॥

विद्यादारयव्य (?) विद्यादं चित्रं ज्योतिर्जगद्गुरुम् ।
कैलासपुरगेहस्थं वन्दे गोविन्दनामकम् ॥

वटुश्रेणीति लोकेषु प्रसिद्धस्याग्रजन्मनः ।
कृतेर्विलिख्यते व्याख्या स्वल्पा जातकपद्धतेः ॥

बालप्रबोधिनीसंज्ञां सन्तस्संशोधयन्त्विमाम् ।
यद्यप्युपकृतिः स्वल्पाप्यनया विनयान्विताः ॥

"ज्ञेयोऽत्र प्रथमं हि जन्मसमयश्छायाम्बुयन्त्रादिभि-
स्तत्कालप्रभवा विलग्नसहिताः कार्यास्ततश्च ग्रहाः ।"
इत्युक्तिमनुसरन् प्रथमं भावानयनप्रकारमाह—

End:

क्षेपैक्यार्धकृतिद्वयान्तरपदं गत्यन्तरांशाहतं
स्थित्यर्धं कृतलम्बने धनमृणं पर्वण्यतो लम्बनम् ।

तिथ्यर्थञ्च विधाय केवलतिथौ कृत्वावशिष्टोऽस्फुटे
मोक्षस्पर्शतिथौ तथान्तरदलाक्षेपाद् विमर्दार्धजे ॥

न ग्राह्ये नतिलम्बने दिवसकृद्बिम्बोऽपि सोमग्रहे
वाच्यौ नाष्टमपोडशौ नतिदिशि ग्रासो विधोरन्यथा ।
भुक्तयं शान्तरमिष्टलम्बयुतमुर्वष्टभेदाहतं(?)
तत् क्षिप्त्योः कृतियोगमूलरहितं योगार्धमिष्टग्रहः ॥

Colophon :

Author :

Remarks—This is a commentary on Jātaka-paddhati. All details regarding astrology are set forth herein.

॥ शेषसमुच्चयविमर्शिनी ॥

No. 1053. ŚEṢASAMUCCAYAVIMARŚINĪ.

C. O. L. No. 1441.

Substance—Palm leaf. Size—14½″ × 2″. Leaves—55. 10 lines per page and 53 letters per line. Script—Malayāḷam. No. of Granthas—1800. Complete.

Owner—Śri Padmanābhar Subramanyar, Manakkal, Kuvakkara Maṭhom.

Subject etc.—Same as No. 1051 B.

Author :

Remarks—The leaves are much damaged. The script is legible.

॥ शेषसमुच्चयविमर्शिनी ॥

No. 1054. ŚEṢASAMUCCAYAVIMARŚINĪ.

C. O. L. No. 1297.

Substance—Palm leaf. Size—13″ × 1¾″. Leaves—11. 15 lines per page and 66—70 letters per line. Script—Malayāḷam. No. of Granthas—700. Incomplete.

Owner—Muñcira Maṭhom.

Subject—Beginning : Same as No. 1051 B.

End :

वीरार्चे इति प्रकृतिपुरुषयोर्विभागं विद्वान् निजशक्तिमूलसहिते निजया शक्त्या निजेन मूलेन च पूजिते पीठार्चे अम्बराद्युज्ज्वले वस्त्रमाल्यादिभिरलङ्कृते कृत्वा तद्विवरे नाळविवरे सहेमसिक्ताभिः पूर्णे सत्यष्टबन्धं शुद्धार्चितं शोधितं नवशक्तिभिरार्चितञ्च सम्पातार्जितं संपातेन संस्पृष्टञ्च कृत्वा कलशनीराजनो भूत्वा मन्त्री अष्टबन्धस्थापनमन्त्रज्ञोऽमुनाष्टबन्धेन बद्ध्वा ध्रुवजवोमा(?)... ....

Colophon :

Author :

Remarks—A few leaves at the close of the Ms. are left blank.

॥ शेषसमुच्चयविमर्शिनी ॥

No. 1055. ŚEṢASAMUCCAYAVIMARŚINĪ.

C. O. L. No. 648.

Substance—Paper. Size—11″ × 8½″. Pages—106. 21 lines per page and 24 letters per line. Script—Devanāgarī. No. of Granthas—1700.

Owner—C. O.

Subject etc.—Same as No. 1053.

Author :

Remarks :

॥ शैवपरिभाषामञ्जरी ॥

No. 1056. ŚAIVAPARIBHĀṢĀMAÑJARĪ.

C. O. L. No. 221.

Substance—Paper. Size—13″ × 9″. Pages — 125. 18 lines per page and 10 letters per line. Script—Devanāgarī. No. of Granthas — 1116. Complete.

Owner—C. O.

Subject—Glorification of Śiva.

Beginning :

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

वन्दे कल्पकविघ्नेशं श्रितपश्चिमगोचरम् ।
फलोपहारसन्तुष्टमिष्टानां तुष्टिकारणम् ॥

श्रीमत्त्रिलुचनाधीशं शातकुम्भसभान्तरे ।
भजामि भूमिभृत्कन्यालालितानन्दनर्तनम् ॥

व्याघ्रपादं तथा शेषं स्वर्णवर्माणमेव च ।
श्रीमद्व्याघ्रपुराधीशं भक्तानेतान् भजाम्यहम् ॥

श्रीमद्व्याघ्रपुरे वासं पूजितं शिवयोगिभिः ।
आगमग्रन्थरत्नौघैरापूर्णमठमन्दिरम् ॥

वेदज्ञानगुरुश्चेति भुवि विख्यातमाख्यया ।
सर्वागमरहस्यज्ञं स्मरामि शिवयोगिनम् ॥

लक्षिते शकभूपाब्दे तदा भाग्येति सङ्ख्यया ।
षष्ट्यन्तिमे हायने च तत्तिथौ तदतौ सुधीः ॥

वेदज्ञानाभिधानोऽसौ शैवशास्त्राब्धिपारगः ।
कालहस्तीश्वरेणात्र प्रतिष्ठां प्रापितः परम् ॥

तन्ना... ... शास्त्राब्धिपारगः ।
... ...मधारिणा तस्य शिष्येण गुणशालिना ॥

एकद्वित्रिचतुःपञ्चषट्सप्ताष्टनवादिभिः ।
सङ्ख्याभिः कथ्यते भाषामञ्जरी मञ्जुलोक्तिना ॥

अनुगृ(ह्णी)न्तु तामेतां सन्तः संश्रितवत्सलाः ।
क्वचिदुद्देशतः प्रोक्तं क्वचिल्लक्षणया सह ॥

यन्नदृष्टं शिवज्ञाने तदन्यत्र न विद्यते ।

इत्युपोद्घातः ।

आदिमध्यान्तनिर्मुक्तस्वभावविमलप्रभुः ।

सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ॥

End :

प्रथमं तत्त्वरूपाणि द्वितीयं तत्त्वदर्शनम् ।

तृतीयं तत्त्वशुद्ध्यर्थं चतुर्थं त्वात्मरूपकम् ॥

पञ्चमं त्वात्मसन्दर्शं षष्ठमात्मविशोधनम् ।

सप्तमं शिवरूपाणि अष्टमं शिवदर्शनम् ॥

नवमं शिवयोगं च दशमं शिवभोगकम् ।

इति शैवपरिभाषामञ्जर्यां दशमवर्गः ।

Colophon :

इति पुण्डरीक(पुर)वासिनिगमज्ञानशिवयोगिशिष्यनिगमज्ञानदेवविरचितायां पर्यायमञ्जर्याख्यनिखण्टुः(?) समाप्तः ।

Author — Nigamajñānadeva.

Remarks—It is clear from a verse seen herein that the author was born on 1486 Śaka era and that he belonged to a place near Vaikom.

॥ शैवभूषणम् ॥

No. 1057. SAIVABHŪṢAṆAM.

C. O. L. No. 274.

Substance—Paper. Size—13½" × 8½". Pages—54.

15 lines per page and 16—17 letters per line. Script—Devanāgarī. No. of Granthas — 400. Incomplete.

Owner—C. O.

Subject—The rites of worship based on Śaiva Scripture.

Beginning :

श्रीः ।

शैवभूषणम् ।

नत्वा शङ्करमम्बिकां गणपतिं षाण्मातुरं नान्दिकं
तत्पश्चात्समवान्ववा... ....वहं मद्बोधकं देशिकम् ।
नानावर्णविचित्रशब्दरचनाहेम्नां तुलाभिर्मया
शैवानां क्रियते शिवागमवचोरत्नाञ्चितं भूषणम् ॥

अनेन श्लोकेन समस्तमङ्गलावाप्तिकारणस्वेष्टदेवतानमस्कारपूर्वकं शास्त्रनामधेयमुक्तमिति ज्ञेयम् । अथ सप्तविधशैवनामोच्यते ।

शैवास्सप्तविधाः किल प्रथमतो नन्दी शिवस्तद्द्विज-
श्चादिर्विप्रजनो महान् क्षितिपतिर्विट् चानुशैवो द्विधा ।
शूद्रोऽवान्तरशैव एव तदधरः स्याच्छङ्करः प्रावरः
पश्चादन्यजनोऽन्यशैव इति यत् शैवागमे दर्शितम् ॥

End :

अथ रक्षाबन्धनविधिरुच्यते ।

रक्षाबन्ध इहोच्यते गुरुरुदग्वक्त्रश्च पात्रेऽक्षता-
स्ताम्बूलं क्रमुकं सदा फलफलं(?) रक्षागुणं न्यस्य च ।

हैमे पात्ररसञ्च...रसयुक्पीतं च कार्पासजं
रक्षाङ्गुष्ठविवर्जिवस्त्रमनुनामृज्यत्रया(?) बन्धयेत् ॥

Colophon :

Author :

Remarks :

॥ शैवागमः ॥

No. 1058. ŚAIVĀGAMA.

C. O. L. No. 241.

Substance—Paper. Size—13½" × 8½". Pages—59. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—700.

Owner—C. O.

Subject—The worship of Śiva.

Beginning :

श्रीः ।

नित्यपूजापद्धतिः ।

वास्तुपूजाविधिः । तद् यथा—

उत्सवेऽपि—अथ विपाण्यादि पूर्वस्मिन्प्रदक्षिणोत्तरपाश्चिमेऽपि च(?) वास्तुयजन आवाहनपर्यग्निकरणानि कुर्यात् । ततो गुरुः सायाह्न-समये स्नानादिकं निर्वर्त्य महोत्सवविधिः? । चतुर्दिक्षु पूजास्थान-मासाद्य कृतसकलीकरणः प्रणवार्घ्यं संसाध्य विघ्नेश्वरपूजां विधाय

सङ्कल्प्य पुण्याहं वाचयित्वा तदम्भसा उत्सवस्य स्थानं सम्प्रोक्ष्य पञ्चगव्यं संशोध्य स्थण्डिलोपरि पद्मं विलिख्य ससूत्रान् सवस्त्रान् सकूर्चानन् सशुद्धोदकपरिपूरितान् कुम्भान् संस्थाप्य... ...

End :

वह्निस्थं देवं कुम्भे संयोज्य वह्निं विसृज्य प्रासादाग्रे वृषभाग्रे वृषभपृष्ठे गोपुराग्रे महापीठाग्रे वा स्थैर्यानुसारेणावटं खात्वा सङ्कल्प्य पुण्याहं वाचयित्वा तद्गर्तमध्ये रत्नादिपञ्चकं न्यस्य तद्हेमकूर्मं वृषभं वाधोमुखं स्वमन्त्रेण संस्थाप्य पट्टवस्त्रमासनं दत्त्वा मूर्तिभूतं दण्डं देवालयाभिमुखं संस्थाप्य तद्गर्तं सैकतेनापूर्य निद्राकुम्भाद् बीजमादाय दण्डे संयोज्य तदम्भसा कूर्चेन दण्डाग्रं सम्प्रोक्ष्य तत्तोयेन दण्डमूलमभिषिच्याष्टकलशोदकैस्तत्तत्स्थानेऽभिषेचयेत् । तन्मूलमुपवेदिकासहितं वेदिकारं वा कुर्यात् ।

Colophon :

इति ध्वजदण्डप्रतिष्ठाविधिः समाप्तः ।

Author :

Remarks.—The Ms. delineates the rites of worship and those relating to festivals in temples.

॥ शैवागमनिबन्धनम् ॥

No. 1059. ŚAIVĀGAMANIBANDHANAM.

C. O. L. No. 691.

Substance—Palm leaf. Size—18″ × 1¾″. Leaves—129. 8 lines per page and 78 letters per line. Script—Malayāḷam. No. of Granthas—4700.

Owner—Padmanābhan Nārāyaṇan Bhaṭṭatiri Avl., Thiruvalla.

Subject—The purificatory and ablutionary rites.

Beginning :

गणपतये नमः ।

नमस्कृत्य शिवं देवं देहिनां हितसाधनम् ।
शैवागमेषु यत्प्रोक्तं तन्त्रसारं वदाम्यहम् ॥

प्रयोगं मन्त्रसिद्धिं च मुद्रादीक्षाभिषेचनम् ।
मण्डलानि च शैवानि प्रतिष्ठा जीर्णसंस्कृतिः ॥

स्नपनानि च सर्वाणि शैवतन्त्रोक्तिपूर्वकम् ।
क्रियान्तरैस्तदंशैश्च सहैतानि समासतः ॥

साधकानां हितार्थाय तन्त्राण्यालोच्य सर्वतः ।
प्रवदामि ततः प्राप्तं स्नानमेवादितः क्रमात् ॥

End :

बिम्बशुद्ध्यधिवासौ च विधिदृष्टेन वर्त्मना ।
स्थापनं मुखलिङ्गस्य प्रतिष्ठाश्चापि पार्षदाम् ॥

प्रायश्चित्तविशेषांश्च उत्सवस्य विधिं क्रमात् ।
तीर्थस्नानसमायुक्तस्नपनानां विधिं तथा ॥

स्नानं सहस्रकुम्भैश्च शैवागमनिबन्धने ।
मुरारिः प्रोक्तवानेवं पटलैः सप्तविंशकैः ॥

Colophon:

अस्पष्टाधिकहीनव्यत्यस्ताक्षरमपाटवाच्छि(खि)तम् ।
निखिलशिवागमसारनिबन्धनं नीलकण्ठेन ॥

शुभमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं सर्वत्र सुखी भवतु लोकः ॥

ओं नमश्शिवाय । श्रीपार्वत्यै नमः । ओं विष्णवे नमः ।

Author—Murāridatta.

Remarks—The script is legible. A story from the 10th skandha of Bhāgavata is enshrined here after the close of the work.

॥ शैवागमनिबन्धनम् ॥

No. 1060. ŚAIVĀGAMANIBANDHANAM.

C. O. L. No. 2457.

Substance—Palm leaf. Size—19″ × 1¾″. Leaves—150. 7 lines per page and 70 letters per line. Script—Malayāḷam. No. of Granthas—4700.

Owner—C. O.

Subject—The origin of Śiva according to the school of Kaula.

Beginning—Same as No. 1058.

End:

व्योमव्यापिमनुस्मृत्य पूजयेच्च हृदा क्रमात् ।
गवादिवसुपाभिः? निवेद्यैश्च विशेषतः ॥

पुण्याहजयशब्दैश्च सर्वमङ्गलसंयुतैः ।
... ...णान्नादभूयिष्ठबलिदानैश्च पुष्कलैः ॥

कर्तव्यं स्नपनं भक्त्या शिवस्यैवं फलार्थिभिः ।

Colophon :

इति मुरारिदत्तकृते शैवागमनिबन्धने सहस्रकलशः सप्तविंशः । नमश्शिवाय ।

Author—Murāridatta.

Remarks—The Ms. contains 27 paṭalas on Pratiṣṭha and Āvāhana.

॥ शैवानुष्ठानकलापसंग्रहः ॥

No. 1061. ŚAIVĀNUṢṬHĀNAKALĀPA-SAṄGRAHA.

C. O. L. No. 714.

Substance—Palm leaf. Size—10¾″ × 1¾″. Leaves—421. 9 lines per page and 41—46 letters per line. Script—Malayāḷam. No. of Granthas—10500.

Owner—C. O.

Subject—Tantra.

Beginning :

श्रीमहागणपतये नमः ।

नमश्शिवाय हिमवज्जामात्रे हिमरोचिषे ।
अष्टमूर्त्यात्मने चन्द्रशेखराय कपालिने ॥

वैष्णवोदितमार्गेण प्रायशो निखिलाः क्रियाः ।
अत्र भेदोऽयमस्माभिः समासादभिधीयते ॥

अथात्र शैवानुष्ठानसंग्रहः प्रोच्यते—नित्यं शैवालयेषु सवनत्रये सम्यक् सम्पूजिते सत्यपि सहसा दैवदोषात् त्रिविधान्युत्पातादीनि? सञ्जाते सति प्रमादाद्देवबिम्बं न स्पृशेत् ॥

End :

देवं यथाविधि सम्पूज्य अन्नदानैः सर्वान् सन्तोष्य नवमेऽहनि रात्रौ दिशाहोमान् कृत्वा यथाविधि श्रीभूतबलिं यथावद्विकीर्य देवान् नत्वा क्षमापयेत् । तदनन्तरम् उत्सवं कुर्यात् इति । गुरुमूर्त्विग्भ्यः पट्टवस्त्राभरणस्वर्णादीन् दत्त्वा आशीर्वादान् प्रयुञ्ज्यात् । बीजाङ्कुरदिवसादारभ्य यथाबलं सर्वजन्यमन्नाद्यैस्तोषयेत् । तदा देवः सन्निधिं वर्धयति ।

Colophon :

इति शैवसङ्केतप्रकारः । अस्मत्संप्रदायोपदेशत्वात् अतिगोपनीयोऽयं क्रियाक्रमः । गर्त्तवनशङ्करेण स्वगुरूक्तवत् सर्वं लिखितम् । अतिगोपनीयोऽयं ग्रन्थः ॥

Author :

Remarks—The Ms. embodies Rudra Mantra, Rudrasūkta, Śrī Sūkta etc. Certain details regarding Śrāddha occupy the last four leaves.

॥ श्रीकृष्णतन्त्रम् ॥

No. 1062. ŚRĪKṚṢṆAṬANTRAM.

C. O. L. No. 731.

Substance—Paper. Size—11″ × 9″. Pages—5920.
20 lines per page and 13 letters per line.
Script—Devanāgari. No. of Granthas — 592.

Owner—C. O.

Subject—Description of Tantrakriyā.

Beginning :

अथ कपालहोमप्रयोगो लिख्यते । प्राङ्गणभूमौ गोचर्ममात्रं स्थण्डिलं प्रविलिप्य तत्र षट्कोणपरिवृताष्टदलं शाततण्डुलरजसा परिकल्पयेत् । कर्णिकायां षट्कोणं विलिखेत् । तन्मध्यं पीतेन रजसापूर्य तत्कोणषट्कमरुणेन रजसा पूरयेत् । तत्कोणबाह्यान्तराळं श्यामेन रजसापूर्य दलाष्टकमरुणेन रजसापूर्य दलाग्रान्तराळं कृष्णेन रजसा पूरयित्वा तद्बाह्यवृत्तद्वयान्तराळं पीतेन सम्पूर्य तद्वृत्तबाह्यस्थमवकाशं कृष्णेन रजसापूर्य तद्बाह्यकोणषट्कमरुणेन रजसापूर्य कोणाग्राणि शूलषट्केन भूषयेत् ।

End :

अथोत्सवविधिं वक्ष्ये वार्ष्णेयस्य समासतः ।
तुरीयदिवसस्नानादानन्तर्यं समाचरेत् ॥

प्रत्यब्दं कारयेत् पश्चाद्यथाशक्ति विधानतः ।
तीर्थयात्रां हृदिकृत्वा नक्षत्रे श्रवणादिके ॥

सप्तमान्नवमाद्यापि प्रागेवाहनि शोभने ।
ध्वजस्थापनपूर्वं वा पटहादिकमेव वा ॥

बीजांकुरादिकं वापि यथारुचि समारभेत् ।

Colophon :

इति गोशालाकल्पे श्रीकृष्णतन्त्रे चतुर्थः पटलः ।

Author :

Remarks—The work demands a more comprehensive title, dealing as it does with varied subjects such as Jyeṣṭātantra, Nāgabalikalpa, Tṛṇagarbhavidhi, Śaktidaṇḍabali, Sarpabali, Kuberakalpam and Śrīkṛṣṇa, tantram. The doubt with regard to the appropriateness of the title of the work is strengthened by the following colophon seen at the end of Śaktidaṇḍabaliprakaraṇa.

"कुबेररचिता चेयं बालानां हितकारिणी ।
दीपिकेति समाख्याता शोध्या सद्भिरमत्सरैः ॥"

॥ षड्विद्यागमसांख्यायनतन्त्रम् ॥

No. 1063. ṢAḌVIDYĀGAMASAṄKHYĀYANA-TANTRAM.

C. O. L. No. 2017.

Substance—Palm leaf. Size—14" × 2". Leaves—50. 7 lines per page and 46 letters per line. Script—Grantha. No. of Granthas—1000.

Owner—Yajñeśvaradikṣitar Śakti Śāstrigal.

Subject—Exposition of Tantras.

Beginning—Same as No. 1140 DCSMMPL.

End :

दशवारं ध्यानपूर्वं तत्क्षीरं प्राशयेन्नरः ।
कैवेल्यं स्थापनश्चैव दारुणश्चैव दारुजम् ॥

पुत्तल्यापि प्रयोगश्च नाशमाप्नोति निश्चितम् ।
ताम्रस्थश्च जलं शुद्धं मन्त्रयेदर्कसंख्यया ॥

तज्जलप्राशनादेव बुद्धिभ्रंशोऽपि नश्यति ।
उष्णोदकं ताम्रपात्रे त्रिसप्तमभिमन्त्रयेत् ॥
नाशयेत् सर्वरोगांश्च नानाशूलादिभिस्तथा ।
एतत्सर्वञ्चोपसंहारं हरविद्या नद्या सिद्धं शान्तिमाप्नोति रोगम् ।
द्रव्याद्रव्यासेवया विद्यया वा इष्टपूर्तिं द्रव्यया वाथ पुत्र (?) ।

Colophon :

इति श्रीषड्विद्यागमसांख्यायनतन्त्रे त्रयस्त्रिंशः पटलः ।
हरिः ओम् । शुभमस्तु ।

Author :

Remarks—The Ms. contains 33 Paṭalas. One of the closing leaves embodies the following mantras.

श्रीं ऐं ह्रीं क्लीं श्रीं सौं ग्लौं ह्रीं वग्गाह स्फुरस्फुर सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय महाभ्रमकरीं बुद्धिं नाशय उन्मादि मनोपहारी ह्रीं ग्लौं सौं श्रीं क्लीं ह्रीं ऐं श्रीं स्वाहा ।

॥ षोडशनित्यातन्त्रव्याख्या ॥

No. 1064. ṢOḌAŚANITYĀTANTRAVYĀKHYĀ.

C. O. L. No. 446.

Substance—Palm leaf. Size—18½" × 2". Leaves—287. 8—10 lines per page and 64 letters per line. Script—Malayāḷam. No. of Granthas—10,000. Incomplete.

Owner—Devan Nārāyaṇan Nambūri Avl.

Subject—Religious rites.

Beginning :

...स्य च देवतात्मत्वेन तत्स्तोत्रजपसमयं च द्वादशभिर्ललिताया मातृकारूपत्वस्तवनम् । तत एकेन स्तवनसिद्धिमुपदिशति । प्रकरणान्येकविंशतिः । यन्त्राणि पञ्च । श्लोकाश्शतमिति शुभम् ।

इति द्वितीयपटलस्य प्रविभागः । अनन्तरं तृतीयपटले षोडशानां नित्यानां षोडशविद्यास्तासां साधारणाश्च विद्या उपदिशति शतेन श्लोकैः ।

End :

यस्तन्त्रमित्यादिना श्लोकेन यथाविधि प्राप्ततन्त्रार्थवतां फलमुपदिशति । तत्र विधिवन्नित्यनैमित्तिकादिप्रोक्तक्रमात् सः भजनपरः मदंशकः चित्स्वरूप ईश्वर इति यावत् ।

Colophon :

इति षोडशनित्यातन्त्रेषु कादिमताख्यस्य परिपूर्णस्य तन्त्रस्य प्रपञ्चसारसिंहराजप्रकाशाभिधानेन सुभगानन्दनाथेन विरचितायां

मनोरमाख्यायां व्याख्यायां देवतादेशिकाशिष्यप्रपञ्चादीनां परमार्थस्वरूपप्रकाशनपरं षट्त्रिंशं पटलं परिपूर्णं परामृष्टम् ।

षट्त्रिंशे पटले यन्त्रे द्वेऽतिदिष्टे तु तत्र च ।
अध्यर्धसप्तषष्टिश्च व्याख्याग्रन्थाः शतत्रयम् ॥

मन्त्रे प्रकरणान्यत्र श्रीमत्कादिमताह्वये ।
शतानां नवकं ह्येकत्रिंशता च समन्वितम् ॥

भुक्तिभूमानमाधुर्यभाग्यगन्धेद्वशब्दगा ।
सा सत्सुरश्रीरित्येकविंशत्यक्षरसङ्ख्यया ॥

यन्त्राणि स्युः कादिमते तन्त्रे प्रोक्तानि तत्र तु ।
कोष्ठयन्त्राण्यनन्तानि व्यादिवर्गेत्थितानि च ॥

सम्भूय श्रीकादिमते व्याख्यानं ग्रन्थसङ्ख्यया १९९५१ ।

श्रीमत्कादिमते तन्त्रे व्याख्यानं ग्रन्थसङ्ख्यया ।
सहस्राणां तु दशकमूनं पञ्चाशतेरितम् ॥

काश्मीरराजस्य गुरुः श्रीकण्ठेशो द्विजेश्वरः ।
दक्षिणापथपुण्यौघपरिणामाभवो निधिः ॥

कदाचिदागतो द्रष्टुं रामेशं स्वलीलया ।
तेनैवानुगृहीतोऽभून्मध्येमार्गं नृसिंहराट् ॥

तन्त्राण्यधीतवांस्तस्मान्नित्यानां तेषु निर्मिता ।
व्याख्या मनोरमाभिख्या तेन कादिमतस्य तु ॥

सुभगानन्दनाथेन द्वाविंशपटलावधि ।
तदाज्ञयावशिष्टानां पटलानां विनिर्ममे ॥

चतुर्दशानां तच्छिष्यः प्रकाशानन्ददेशिकः ।
तां सुन्दरवरक्ष्मभृद्व्याख्यां सत्सम्प्रदायतः ॥

इति शुभम् ।

इति मनोरमा परिपूर्णा ।

Author—Subhagānanda Nātha and Prakāśānandadeśika.

Remarks—The colophon bears out that this Ms. is an exposition of Kādi mata included in Ṣ ḍaśanityātantra. The first 22 paṭalas are commented on by Subhagānanda and the remaining 14 by his disciple Prakāśānandadeśika.

॥ सनत्कुमारतन्त्रोक्तगोपालकल्पः ॥

No. 1065 A. SANATKUMĀRATANTROKTA-GOPĀLAKALPA.

C. O. L. No. 2477 A.

Substance—Palm leaf. Size—$13\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—5. 8—10 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—100.

Owner—Eḍappaḷḷy Valia Rāja Avl.

Subject—The ritualistic hymns for invoking Śrī Kṛṣṇa.

Beginning :

गणपतये नमः । ह्रीं क्लीं श्रीं पुरुषोत्तमाय नमः ।

श्रीवासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धश्रीवत्सविष्वक्सेनजनार्दननारदा-त्रिवसिष्ठशक्तिमित्रपराशराजेयविमलभद्रहासेन इति सिद्धौघः । श्रीनन्दनामलवामदेवामृतप्रभाकरवामदेवसुराधिपगणेश्वरहरिकेशानन्दाकरलळिताननविश्वरूप इति दिव्यौघः ।

सनत्कुमारं योगीन्द्रं सिद्धाश्रमनिवासिनम् ।
ब्रह्मनिष्ठं मुनिं शान्तं प्रसन्नादित्यवर्चसम् ॥

विनयेनोपसंगम्य शिरसा प्रणिपत्य च ।
नारदः परिपप्रच्छ देवर्षिः सर्वकालवित् ॥

End :

नीलोत्पलदलश्यामं पीतवाससमच्युतम् ।
शुद्धस्फटिकसङ्काशमथवा पुरुषोत्तमम् ॥

ध्यायन्नित्यं जपन् मन्त्रं मोक्षार्थी त्रिसहस्रकम् ।
संसारसागरं तीर्त्वा याति विष्णोः परं पदम् ॥

बहुना किमिहोक्तेन धर्मकामार्थमोक्षदम् ।
मन्त्रमेतत् समाख्यातं किं भूयः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीसनत्कुमारीये श्रीगोपालकल्पः समाप्तः ।

Author :

Remarks—This Ms. will be useful to necromancers.

॥ सौन्दर्यलहरीव्याख्या (सुधाविद्योतिनी) ॥

No. 1065 B. SAUNDARYALAHARĪ
with the commentary Sudhāvidyotinī.

C. O. L. No. 2477 B.

Substance—Palm leaf. Size—12¼" × 1¾". Leaves—58. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1150.

Owner—Same as No. 1065 A.

Subject—Panegyric of the Goddess.

Beginning:

गणपतये नमः । ऐं ह्रीं श्रीं परप्रकाशाय नमः । परमशिवानन्दाय नमः । परमेश्वरानन्दाय नमः । श्रीपराशराय नमः । श्री वेदव्यासाय नमः । श्रीकृष्णाय नमः । करुणानन्दाय नमः । द्रमिडानन्दाय नमः । सकळानन्दाय नमः । एते स्तोत्रस्य गुरवः । सकलानन्द ऋषिः । छन्दस्तु स्पष्टम् । श्रीपरमेश्वरी देवता । तत्र प्रथमं पञ्चश्लोकीं जपेत् । ततस्त्रिकोणरूपं पद्मानि चार्थस्मरणपूर्वकम् ।

... ...

तस्याः पुत्रोऽहमरिजित् स्तुतिव्याख्यां करोमि ताम् ।
सुधाविद्योतिनीं नाम्ना पित्रा सम्यक् प्रबोधितः ॥

तरणायाब्धिराजानां तृणकूटमिवाशया ।

... ...

यथाह—शिवः शक्त्या युक्तो... .... ॥

End :

उपासनाप्रकारस्तु—पौष्पं पुष्पोद्भूतिस्थानं तद्धनुः। मधुकरमयी अधरमयी मौर्वी । पञ्च पञ्चमङ्ख्याकाङ्गुलयोनिविहिताः । वसन्तः। शत्रन्तमेतत् । भगवत्यां वसन्तः शब्दस्पर्शरूपरसगन्धाः। सामन्तः सहायः। मलयमरुत् । मनसि लीयन्ते ये तान् सर्वान् कटाक्षीकृत्य। जात्येकवचनमालम्बनङ्गीकृत्य मलयमरुदित्येकवचनेनोक्तम् । आयोधनरथः आयोधनसमर्थो रथः। अनेनोपासनप्रकारो विद्यागायत्री श्रुतिमुखसप्तश्लोकवपुर्पूर्वहृदयानि च कारितानि ।

Colophon :

Author—Abhijit.

Remarks—The ascription of the text to Pravarasena, son of Dravidarāja is evident from the introductory portion quoted below:—

अथ पूर्वजन्मसमयोपासनानाह्लादितमत्या भगवत्याः स्तन्यामृतपानसमुल्लसितचित्तवृत्तिः प्रवरसेनाभिधः स्तोत्रराजरचनां चकार।

The history of Pravarasena in detail is also narrated in the introduction. The commentary is known by the name of Sudhāvidyotini. It explains clearly the occultism of the *Mantras* in the text. The Ms. comprises only thirty-three verses with their commentary. The verses 2 and 8 are not commented upon here,

The whole work is strewn with quotations from reputed authors. The following verse:—

... ... स्तुतिव्याख्यां करोमि ताम्। तस्याः

पुत्रोऽहमरिच्छित् ... ...

... ...

सुधविद्योतिनीं नाम्ना पित्रा सम्यक् प्रबोधितः।

shows that one Aricchit is the commentator.

According to Lakṣmīdhara the work is written by Śaṅkarācārya, but the author of this commentary ascribes it to Pravarasena. Scholars may take notice of this.

॥ महार्थमञ्जरी ॥

No. 1065 C. MAHĀRTHAMAÑJARĪ.

C. O. L. No. 2477 C.

Substance—Palm leaf. Size—$13\frac{1}{4}'' \times 1\frac{3}{4}''$. Leaves—15. 8—9 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas — 300. Incomplete.

Owner—Same as No. 1065 A.

Subject—Vedānta.

Author—Maheśvarānanda.

Remarks—The work with the commentary Parimala is published as No: 66 TSS. Only 52 verses are commented upon herein.

॥ गोपालकानुष्ठानम् ॥

No. 1065 D. GOPĀLAKĀNUṢṬHĀNAM.

C. O. L. No. 2477 D.

Substance—Palm leaf. Size—13½" × 1½". Leaves—13. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—250.

Owner—Same as No. 1065 A.

Subject—Rules connected with the chanting of hymns, associated with Kṛṣṇa.

Beginning :

गणपतये नमः ।

स्वस्ति । अथ गोपालकानुष्ठानं भाषया वक्ष्यते ।

അനന്തരം ഗോപാലകമന്ത്രാനുഷ്ഠാനം ചൊല്ലുപ്പെടിൻറതു. ബ്രാഹ്മമുഹൂർത്തത്തിങ്കൽ ശംഖധ്വനിയാൽ അപഹരിക്കപ്പെട്ടിരിക്കിൻറ നിദ്രയോടുകൂടിയിരിക്കിൻറ പുരുഷൻ തല്പതലത്തിങ്കൽ നിൻറു് ഉത്ഥാനത്തെ ചെയ്തിട്ടു് 'ഓം അച്ചിന്ത്യശ്രീഗുരവേ നമഃ' ഇമ്മന്ത്രത്തെക്കൊണ്ടു മൂന്നുവിങ്കൽ ഗുരുവിനെ വന്ദിച്ചു് സങ്കല്പിപ്പതും ചെയ്തിട്ടു്,

ओं जलं कल्पयामि। ओं गन्धं कल्पयामि। ओं पुष्पं कल्पयामि। ओं धूपं कल्पयामि। ओं दीपं कल्पयामि। ओं निवेद्यं कल्पयामि।

ഈ മന്ത്രം ജപിച്ചു് അവയവമുദ്രകളെക്കൊണ്ടു് ഗുരുവിനെ പൂജിച്ചതും ചെയ്തിട്ടു്,

"कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥"

ഇമ്മന്ത്രത്തെക്കൊണ്ടു് ഗുരുവിന്റെ പാദത്തിങ്കലാമ്മാറു് നമസ്കരിച്ചുവാറു് ധ്യാനിച്ചു്,

End:

ഉപദേശത്തിന്നു തക്കവണ്ണം ധ്യാനംചെയ്തിട്ടു് യഥാശക്തി മൂലമന്ത്രത്തെ ജപിക്ക. ശ്രീം ഹ്രീം ക്ലീം ഇമ്മന്ത്രത്തെ അതു ഉരു ജപിക്ക. ക്ലീം എങ്കിറതിനെ അതു ഉരു ജപിക്ക. ഈ എങ്കിറതിനെ അതു ഉരു ജപിക്ക.

गुह्यातिगुह्यगोप्तस्त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देव! त्वत्प्रसादाद् धृतिः स्थितिः॥

ओं तत् सत् परब्रह्मणे श्रीं पुरुषोत्तमाय नमः।

ഇമ്മന്ത്രത്തെക്കൊണ്ടു ജപസമർപ്പണത്തെ ചെയ്ക. പിന്നെ രേചകപൂരകകുംഭമാകിന്റ പ്രാണായാമത്തെച്ചെയ്തിട്ടു് ലയാംഗത്തെയും ചെയ്ക. പിന്നെ താൻ പരമേശ്വരൻ എന്റുള്ളൊരു ഭാവത്തെച്ചെയ്തു് കുറെനകാലം അങ്ങനെ ഇരുന്നു പിന്നെ ആ ഭാവനയോടുകൂടെ തന്റെ കർമ്മഫലത്തെ അനുഭവിക്ക.

Colophon :

शिवमस्तु । नारायणाय नमः । गोपीजनाय विद्महे गोपी-जनवल्लभाय धीमहि तन्नः कृष्णः प्रचोदयात् ।

Author :

Remarks—10 leaves towards the close contain certain hymns and five the worship of Kali, in Malayāḷam.

॥ सनत्कुमारसंहिता ॥

No. 1056. SANATKUMĀRASAMHITĀ.

C. O. L. No. 1845.

Substance—Palm leaf. Size—11½″ × 1″. Leaves—38. 5—6 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—600.

Owner—C. O.

Subject—Hymns relating to Śrī Kṛṣṇa.

Beginning :

... .मदेवपदं वदेत् ।
आया ... विद्महे पुष्पबाणायेति पदं तथा ॥

धीमहीति पदं चोक्त्वा तन्नोऽनङ्गः प्रचोदयात् ।
एषा मन्मथ (गायत्री) प्रोक्ता मन्मथदीपिनी ॥

उक्त्वा नमःपदं पूर्वं ततः कामपदं वदेत् ।
देवायेति पदं सर्वजनेति च पदं तथा ॥

प्रियायेति पदञ्चोक्त्वा वदेत् सर्वजनं पुनः ।
ब्रूयात् सम्मोहनायेति ज्वलशब्दं च वीप्सयेत् ॥

प्रज्वलेति पदं सर्वजन(स्य) हृदयं तथा ।
उक्त्वा मम वशं पश्चात् कुरुशब्दं च वीप्सयेत् ॥

वह्निजायान्त इत्युक्तो मालाख्यो मान्मथो मनुः ।

End :

उक्ता अष्टादशार्णेयाः क्रिया मन्त्रान्तरेष्वपि ।
अमुनैव विधेयास्ता मनुना मनुवित्तमैः ॥

(नार)...दायोपदिश्यैवं गोपालकमहामनुम् ।
सनत्कुमारो योगीन्द्रो ययौ सिद्धाश्रमाद् दिवम् ॥

Colophon :

इति सनत्कुमारीये पञ्चमः पटलः ।
श्रीगुरुभ्यो नमः ।

Author :

Remarks—The first two leaves are missing. The work is available in print.

॥ सनत्कुमारीयम् ॥

No. 1067. SANATKUMĀRĪYAM.

C. O. L. No. 2416.

Substance—Palm leaf. Size—12″ × 1½″. Leaves—34.

8—10 lines per page and 44—50 letters per line.
Script—Malayāḷam. No. of Granthas—1000

Owner—Śrīpadmanābhar Subrahmoṇyar.

Subject—Explanation of the hymns on Madana Gopāla.

Beginning :

हरिः । श्रीगणपतये नमः । अविघ्नमस्तु ।

सनत्कुमारं योगीन्द्रं सिद्धाश्रमनिवासिनम् ।
ब्रह्मनिष्ठं मुनिं शान्तं प्रसन्नादित्यवर्चसम् ॥

विनयेनोपसङ्गम्य शिरसा प्रणिपत्य च ।
नारदः परिपप्रच्छ देवर्षिः सर्वकामवित् ॥

श्रीनारद उवाच—

भगवन्! योगिनां श्रेष्ठ! भवसागरतारक! ।
श्रुतानि सर्वमन्त्राणि मया त्वत्तो विशेषतः ॥

आपरोक्ष्यं च मे जातं चरस्य ब्रह्मणस्तथा ।
इदानीं श्रोतुमिच्छामि सर्वमन्त्रोत्तमोत्तमम् ॥

असौभाग्येन सकलं पीड्यते सचराचरम् ।
उपद्रुतं च दारिद्र्यकाद्रवेयेण मूर्छता ॥

असौभाग्यं च दारिद्र्यं येन नाशमुपेष्यति ।
प्रसीद भगवन्! मन्त्रमनायासेन सिद्धिदम् ॥

श्रीसनत्कुमार उवाच—

End :

तत्पादमूले मनुना गङ्गायास्तत्पदाम्बुजात् ।
निस्सरन्तीमुपादाय शङ्खतोयमयीं ततः ॥

मूलमन्त्रेण शिरसि तज्जलैः प्रोक्षयेत् पिबेत् ।
मूलेनैक्यं समासाद्य देवेन स्वयमीश्वरः ॥

Colophon :

इति सनत्कुमारीये पञ्चमः पटलः ।

सनत्कुमारीयं समाप्तम् ।

Author :

Remarks—The Ms. is in the form of a dialogue. The secret and sacrosanct hymns are being imparted to Nārada by Sanatkumāra.

॥ सपर्यासप्तकव्याख्या ॥

No. 1068 A. SAPARYĀSAPTAKAVYĀKHYĀ.

C. O. L. No. 914 A.

Substance—Palm leaf. Size—8″ × 1″. Leaves—19. 5 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas — 200. Incomplete.

Owner—Muñjira Maṭhom, Viḷavancode.

Subject—Religious rites adopted in propitiating the Devas.

Beginning :

वैराजं लैङ्गिकं चैशं बहिरन्तश्च गर्वणः ।
ऊर्ध्वाधश्चैश्चि... .... स्वमनुपुप्ति ... ॥

...न्त्रानुस्वारनादेषु त्रयमन्वेषयेद् बुधः ।

... ... नमः उपद्वारप्रकाशिकां कर्तुकामस्तदविघ्नपरिसमाप्त्यादिप्रयोजन ... ...ष्टाचारसिद्धामिष्टदेवताप्रणतिं कुर्वन्नर्थादेवतासपर्यास्वरू... ... ह विश्वासेत्यादिना । नरकस्य संसारस्य वैरी नरकवैरी तस्या इत्यर्थः ।

End :

... . दण्डमव्यक्तसम्भवम् ।

अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥ इति ॥

तन्तु...हिरण्यगर्भाभिधानीयमभिधास्यामः । यस्य हि दिग्गोलका ... देवता श्रोत्रं वाग्वभिमानिनी देवता त्वग् आदित्यमण्डलाभिमानिनी देवताख्यया दिशः ।
को नामाज्ञानसर्वस्वं परेभ्योऽपि निवेदयेत् ।

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीभगवत्पादपूज्यशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यरामानन्दभगवतः कृतौ सपर्यासप्तकव्याख्या समाप्ता ॥

Author—Rāmānanda, disciple of Sarasvatibhagavatpāda.

Remarks—The title of the Ms. as evinced by the introductory portion is Upahāraprakāśika and by the colophon Saparyāsaptakavyākhya.

॥ सपर्यासप्तकसम्बन्धोक्तिः ॥

No. 1068 B. SAPARYĀSAPTAKA-SAMBANDHOKTI.

C. O. L. No. 914 B.

Substance—Palm leaf. Size—8″ × 1″. Leaves—37. 5 lines per page and 32 letters per line. Script—Malayāḷam. No. of Granthas—3700. Incomplete.

Owner—Same as No. 1068 A.

Subject—Religious rites in propitiating the Devas.

Beginning—Same as No. 926 B.

End :

... ...देवं जनार्दनम् ।
मनसा कर्मणा वाचा ब्रह्म ... ... ॥

तं भक्तं भोग...कल...मनुपागतम् ।
चेतः केवलमस्यासीद्दोलायामिव योजितम् ॥

प्राह्लादी....तिं कृष्णो देवः क्षीरोदकोटरात् ।
विवेद सर्वगतया धिया ..... कान्तया ॥

अथ पात... ... ... ।

Colophon :

Author :

Remarks—The work was composed at the bidding of the author's preceptor.

॥ सपर्यासप्तकसम्बन्धोक्तिः ॥

No. 1069. SAPARYĀSAPTAKA-SAMBANDHOKTI.

C. O. L. No. 2246.

Substance—Palm leaf. Size—6″ × 1½″. Leaves—34. 8 lines per page and 20 letters per line. Script—Malayāḷam. No. of Granthas—340.

Owner—Maṇiyan Kṛṣṇan Bhaṭṭatiri Avl., Budhannūr, Cheṅgannūr.

Subject etc.—Same as No. 926 B.

Author :

Remarks—The subject-matter pertaining to Dravyadevata is copied in this Ms. twice. The first five leaves contain the text and the remaining a detailed explanation of Sambandhokti.

॥ सात्वतसंहिता ॥

No. 1070 A. SĀTTVATASAMHITĀ.

C. O. L. No. 727 A.

Substance—Palm leaf. Size—14½″ × 1½″. Leaves—

126. 10 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—4000.

Owner—C. O.

Subject—The origin of Pāñcarātra.

Beginning:

श्रीगणपतये नमः ।

विष्णोराराधनपरा मुनयो मलयाचले ।
संस्थितास्सिद्धगन्धर्वविद्याधरनिषेविते ॥

कालेन केनचित् ... ...नलालसः ।
तत्रावतीर्णो देवर्षिर्नारदो भगवन्मयः ॥

ज्ञात्वा तस्यामलां भक्तिं देवः परशुलाञ्छनः ।
प्रत्यक्षमभवच्छश्वत् सः ... ...चेतसा ॥

ततः प्रहृष्टवदनः प्रोद्भूतपुलको मुनिः ।
पूजयामास तं देवमष्टाङ्गपतनादिना ॥

अथापि भगवा... ...मधुराक्षरया गिरा ।
तवास्तु भक्तिरचला जन्मबीजक्षयंकरी ॥

एषा तु सात्त्विकी शुद्धा नित्यमव्यभिचारिणी ।
ति...यो येऽत्र प्रार्थयाना हरेः पदम् ॥

तान् सात्त्वते क्रियामार्गे मद्भक्त्याद्याहि योजय ।
एवमुक्त्वा तु तं ...पीणां हितकाम्यया ॥

जगामादर्शनं देवस्तदुद्देशात् तटिद्यथा ।
स तु हृष्टमना वाक्यं शिरसा चाभिनन्द्य तम् ॥

निर्जगा....यित्वाथ पुष्पैः स्थानपरं तु तम् ।
अपश्यदाश्रमञ्चान्यन्नानाद्विजनिषेवितम् ॥

End :

इदं भक्त्या शयानां च वक्तव्यं भावितात्मनाम् ।
भक्तानामप्रमत्तानां पुण्डरीकाक्षसेविनाम् ॥

धर्मापवर्गसत्कीर्तिसाधुसङ्गाभिलाषिणाम् ।
गोपनीयममुक्तानां वाक्प्रतापरात्मनाम् ॥

अन्यायेनोपसक्तानां नास्तिकानां विशेषतः ।
यो गोपायत्ययोग्यानां योग्यानां सम्प्रयच्छति ।
इममर्थं स मान्यो मे स्वस्ति वोऽस्तु व्रजाम्यहम् ।

Colophon :

इति पाञ्चरात्रे सात्त्वतसंहितायां विंशतिः परिच्छेदः ।
श्रीसात्त्वतं समाप्तम् ।

Author :

Remarks—The work has been acknowledged as authoritative by the Vaiṣṇavites.

॥ पद्धतिविवरणम् ॥

No. 1070 B. PADDHATIVIVARAṆAM.

C. O. L. No. 727 B.

Substance—Palm leaf. Size—14½" × 1½". Leaves—45

81. 10 lines per page and 52 letters per line. Script—Malayālam. No. of Granthas—2600.

Owner—Same as No. 1073 A.

Subject—Beginning : Same as No. 981.

End :

उत्थाप्योत्तिष्ठमन्त्रेण नीत्वा ब्रह्मरथेन तत् ।
सूक्तेन पौरुषेणैव मण्डपं तु प्रवेशयेत् ॥

द्वारबन्धं विना पूर्वद्वारेणैव प्रयत्नतः ।
शङ्खदुन्दुभिगीताद्यैर्जयशब्दैश्च नादयेत् ॥

सत्रिषट्कोणशय्यास्थं विश्वं× सकलीकृतम् ।
मूलेन शाययेद् देवं कृत्वामोदि परं पदम् ॥

Colophon :

इति मुरारियतिविवरणे स्वशुद्धिपटलो द्वादशः । विवरणं समाप्तम् ।

नमः शिवाय ।

Author—Murāri yati.

Remarks—This is an obscure commentary on the scriptural work styled Paddhati. This author is not identical that of Anargha-Rāghava.

॥ स्कन्दसद्भावः ॥

No. 1071. SKANDASADBHĀVA.

C. O. L. No. 819.

Substance—Paper. Size—11″ × 8¾″. Pages—131. 20 lines per page and 16 letters per line. Script—Devanāgarī. No. of Granthas—1200. Complete.

Owner—C. O.

Subject—The origin, worship, etc. of Lord Subrahmaṇya.

Beginning:

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
सुखासीनं महादेवं नन्दीशं पर्यपृच्छत ।

भगवन्! श्रोतुमिच्छामि स्कन्दसद्भावमुत्तमम् ॥

पुरातनं महापुण्यं शास्त्रं लोकेषु दुर्लभम् ।
दनुःलोकहितार्थं मे तन्त्रमेतदशेषतः ॥

श्लोकैर्द्वादशसाहस्रैर्मुनिना कथितं पुरा ।
संक्षेपात्तत्व वक्ष्यामि स्कन्दसद्भावमुत्तमम् ॥

अध्यायाष्टादशोपेतं स्कन्दस्योद्भवसंयुतम् ।
प्रक्रियाभिश्च सहितं ... तं सर्वार्थसाधकम् ।
सङ्ग्रहः प्रथमोऽध्यायो द्वितीयः सम्भवः स्मृतः ॥

तन्त्रोद्धारस्तृतीयस्तु चतुर्थोऽर्चनसंज्ञितः ।
पञ्चमस्त्वग्निकार्यार्थः षष्ठो दीक्षाविधिः स्मृतः ॥

सप्तमः सर्वमाचारः प्रासादविधिरष्टमः ।
नवमस्त्वधिवासाख्यस्तापनाख्यस्ततः परम् ॥

तत्परः प्रतिमाध्यायो द्वादशः स्नपनाह्वयः ।
त्रयोदशश्चोत्सवाख्यो बलिकर्म ततः परम् ॥

प्रायश्चित्तं पञ्चदशं यात्राख्यः षोडशः स्मृतः ।
प्रवेशाख्यः सप्तदशः समुदायस्ततः परः ॥

इत्येवं सङ्ग्रहः प्रोक्तस्तन्त्रस्यास्य तवाधुना ॥

End :

कृतज्ञाय विनीताय शुचये ब्रह्मचारिणे ।
वक्तव्यं सर्वथाचार्यैरित्येवं मम शासनम् ॥

गुप्तं हि स्थापयेत् सर्वमगुप्तं नाशयेन्नरम् ।
तस्मात् सर्वप्रयत्नेन गोप्यमेतत् सदा बुधैः ॥

यः पृच्छेच्छृणुयान्नित्यं श्रावयेद्वा समाहितः ॥
सर्वपापविनिर्मुक्तो मम लोके महीयते ॥

Colophon :

इति स्कन्दसद्भावे समुदायपटलोऽष्टादशः ।
स्कन्दसद्भावः समाप्तः ।

Author :

Remarks :

॥ स्कन्दसद्भावः ॥

No. 1072 A. SKANDASADBHĀVA.

C. O. L. No. 1155 A.

Substance—Palm leaf. Size—11½″ × 1¾″. Leaves—67. 8 lines per page and 40 letters per line. Script—Malayāḷam. No. of Granthas—1300.

Owner — Nārāyaṇan Nambūri Avl., Talayolapparambu.

Subject—Same as No. 1071.

Beginning :

सा.....तं देशं सानुगः प्रभुः ।

कृष्णतेजोमयं रूपं सहस्रादित्यसन्निभम् ।
अप्रमेयमनिर्देश्यं ज्वलन्तमिव पावकम् ॥

तेजोमयं शिशुं वज्री सहसा कृपया विना ।
वज्रेण प्राहरद् गृध्नुरासीच्छीघ्रं शिशुद्वयम् ॥

भूयः प्रहारयाञ्चक्रे ततः क्रुद्धः शचीपतिः ।
तत आसन्महाभाग! शिशुरूपचतुष्टयम् ॥

End—Colophon—Same as No. 1074.

Author :

Remarks—The first folio is missing. The manuscript is much worn out. A few leaves have been interpolated at the end and they deal with Viṣṇusahasranāmārcana.

॥ प्रपञ्चसारव्याख्या (तत्त्वप्रदीपिका) ॥

No. 1072 B. PRAPAÑCASĀRAVYĀKHYĀ.

C. O. L. No. 1125 B.

Substance—Palm leaf. Size—11½" × 1¾". Leaves—70. 7—11 lines per page and 36 letters per line. Script—Malayāḷam. No. of Granthas—1400. Incomplete.

Owner—Same as No. 1072 A.

Subject—Elucidative exposition of Prapañcasāra.

Beginning—Same as No. 882.

End :

प्रासादमथवा तारं जपन् पञ्चाथवा दश ।
विकास्य पद्मं षष्ठेन जपेनैकादशेन वा ॥

ध्यात्वा विकसितं पद्मं हृदि रूढं समर्चयेत् ।
स्वनाम्ना प्रणवाद्येन नमोन्तेनार्चनं (हृदि) (पुनः?) ॥

बहिर्मण्डलकं ... ...
... ...

Colophon :

इति तत्त्वप्रदीपिकायां पञ्चमः पटलः ॥
स्वामिना नागपूर्वेण कृता तत्त्वप्रदीपिका ।
इयमानन्दजननी विदुषां सन्ततं भवेत् ॥

Author—Nāgasvāmin.

Remarks—The Ms. extends up to a portion of the 6th paṭala. It is considerably old.

॥ स्कन्दानुष्ठानसङ्ग्रहः ॥

No. 1073. SKANDĀNUṢṬHĀNASAṄGRAHA.

C. O. L. No. 720.

Substance—Paper. Size—11″ × 8½″. Pages—382. 20 lines per page and 20 letters per line. Script—Devanāgarī. No. of Granthas—4775. Incomplete.

Owner—C. O.

Subject—Details for worshipping Skanda.

Beginning :

श्रीः ।

श्रीकुमारो जयत्येष श्रीकण्ठप्रियनन्दनः ।
कमिता देवसेनायाः सविता सर्वसम्पदाम् ॥

कौमारमथ वक्ष्यामि कलशप्रक्रियाविधिम् ।
बीजाङ्कुरादि सकलं तीर्थस्नानावसानिकम् ॥

गुरोर्वक्त्रेन्दुगलितां क्रियापीयूषसन्ततिम् ।
सम्प्रदायानुसारेण वक्ष्ये पुत्राहिताय नः ॥

अथ निजदोशिकमुखकमलान्निर्गलितवचनामृतरूपं स्कन्दानुष्ठानसंग्रहं सोपदेशं सत्सम्प्रदायानुसारेण क्रियाक्रमः प्रोच्यते? । अथ सकलदोषपरिवर्जितस्कन्दालये आपत्सूचकान्युत्पातादीनि यदि सञ्जाते सति(?)तत्क्षणादेव देवसान्निध्यं शनैःशनैः क्षयं याति । तस्माद् देवसान्निधिस्तद्देशं सराष्ट्रं जनपदांश्च क्षयमायाति(?) । तदा सद्य एव निष्कृतिः कर्तव्या ।

End :

परितःस्थान् पोडश घटान् दिग्विदिक्ष्वन्तरालगान् ।
शुद्धोदैः पूरयेत् सम्यक् प्रयजेच्च यथाविधि ॥

वायव्यमध्यस्थपरं? सम्यग्दिग्विदिक्षु रसेन वै ।
सम्पूर्य तस्य पर्यन्तसंस्थितानष्टसङ्ख्यकान् ॥

ओषधीभिश्च विन्यस्य पूरयेच्छुद्धवारिभिः ।
सुवर्चलां वचां ब्राह्मीं शङ्खपुष्पीं शतावरीम् ॥

महेदवां विष्णुपर्णीं लक्ष्मीं च परितो न्यसेत् ।
तद्बहिः पोडश घटान् पूरयेत् पूर्व. . . . . .

Colophon :

Author :

Remarks—An old Malayāḷam commentary is interspersed in this Ms. The rites of worshipping Skanda is well explained herein. Hymns and religious practices are also adduced in support of the views expressed. The opening leaf points

out certain sacrifical rites to ward off the evils consequent upon the construction of a building. The statement

अत्राक्षान्तिपितामहेन क्रियासंग्रहे चोक्तम् ।

may prove that the author was the grandson of the composer of Kriyāsaṅgraha.

॥ स्पन्दनिर्णयः ॥

No. 1074 A. SPANDANIRṆAYA.

C. O. L. No. 2108 A.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—30. 9 lines per page and 44—48 letters per line. Script—Malayāḷam. No. of Granthas—800.

Owner—C. O.

Subject—Description of Śiva's power to create the Universe.

Beginning :

श्रीगणपतये नमः ।

सर्वस्वात्मस्वरूपं मुकुरनगरवत् स्वस्वरूप. . . .नन्त्र-
. . . . .कलयति धरणीतश्शिवान्तं सदा या ।
द्व. . . . .शब्दतः श्यामपूर्णा
हन्तानन्दस्फुरत्ता जयति जगति सा शाङ्करी स्पन्दशक्तिः ॥

स्पदामृते चर्चितेऽपि स्पन्दसन्दोहतो मनाक् ।
पूर्णस्तच्चर्वणाभोगोद्योग एव मयाश्रितः ॥

सम्यक् सूत्रसमुच्चयं परिगतिं तत्त्वे परस्मिन् परां
तीक्ष्णां युक्तिकथामुपायघटनास्पन्दार्थसद्वचाकृतिम् ।
ज्ञातुं वाञ्छथ चेच्छिवोपनिषदः श्रीस्पन्दशास्त्रस्य स-
द्वृत्तावत्र धियं निधत्त सुधियः स्पन्दश्रियं प्राप्नुत ॥

इह विश्वानुजिघृक्षापरपरमशिवावेशोन्मीलितमहिमा स्वप्नोपदेशः श्रीमान् वसुगुप्ताचार्यः महादेवपर्वताद् भगवदिच्छयैव महाशिलोल्लिखितानि अतिरहस्यानि शिवसूत्राण्यासाद्य प्रसन्नगम्भीरैः एकपञ्चाशता श्लोकैः आगमानुभवोपपत्त्येकीकारं प्रदर्शयन् संगृहीतवान् । तत्र पञ्चविंशत्या स्वरूपस्पन्दः सप्तभिः सहजविद्योदयस्पन्दः एकोनविंशत्या विभूतिस्पन्दः इति त्रिनिःष्यन्दं स्पन्दशास्त्रम् । तत्र.....।

End :

एतच्छास्त्रोक्तमेतद्ज्ञानमेव च पुरुषार्थहेतुत्वाद्धनमलभ्यमपि दुष्प्रापमपि लब्ध्वा शङ्करः स्वप्नोपदेशसारं शिलातलादवाप्य । प्रकाशविमर्शात्मकं हृदयमेव विश्वान्तःप्रवेशावकाशप्रदत्वात् गुहा । तस्यामन्तेन निश्चयेन कृता निहितिः स्थापना येन अर्थात् तस्यैव ज्ञानधनस्य स्वामिनः शिवसुगुप्ताभिधानस्य गुरोः यथैव तच्छिवाय जातं तद्वदधिकारनियमसङ्कोचाभावात् सर्वलोकस्यापि हृद्गुहान्तःकृतनिहितैर्यत्नादसामयिकानां गोपायितुः दृढप्रतिपत्त्या च स्वात्मीकुर्वतः । सदाशिवाय भवति नित्यशङ्करात्मस्वस्वभावसमावेशलाभाय सम्पद्यत इति शिवम् ।

Colophon :

यद्यप्यस्मिन् विवृतगणना विद्यते नैव शास्त्रे
लोकश्चायं यदपि मतिमान् भूयसोत्तानदृष्टिः ।

जानन्त्येते तदपि कुशलास्ते मदुक्तेर्विशेषं
केचित् सारग्रहणनिपुणाश्चेतना राजहंसाः ॥

अनन्तापरटीकाकृन्मध्ये स्थितिमभृग्यता।
विवृतं स्पन्दशास्त्रं नो गुरुणा नो मयास्य तु ॥

विशेषबोधसन्देहे दर्शितः पूर्वमद्य तु।
रुद्रशक्तिसमावेशशालिनः शिवरूपिणः ॥

शूरनाम्नः स्वशिष्यस्य प्रार्थनाकरणेन तत्।
निर्णीतं क्षेमराजेन स्फारा निजगुरोर्गुरोः ॥

येषां नो धिषणोपदेश....दास्सदेशिकैर्दर्शिताः
श्रीमच्छाम्भवशासनोपनिषदा येषां न भग्नो भ्रमः
येऽनास्वादितपूर्विणो मृदुधियः श्रीप्रत्यभिज्ञामृतं
ते नात्राधिकृताः परैः पुनरिदं पूर्णाशयैश्चर्वितम् ॥

शिवादिक्षित्यन्तो विततविततो योऽध्वविभवः
स्फुरन्नानासर्गस्थितिलयदशाचित्रिततनुः।
इदं यद्विन्यस्यह्रा(?)द्रसकणिकासौ विजयते
परः संवित्स्पन्दो लसदसमसौख्यायतनभूः ॥

इति समाप्तः स्पन्दनिर्णयः।

इति श्रीप्रत्यभिज्ञाकारप्रशिष्यमहामहेश्वराचार्यश्रीमदभिनव गुप्तपाददत्तोपदेशस्य क्षेमराज्यस्येति शिवम्।

हराय शङ्कराय भवभेदिने नमः। गुरवे नमः। शिवमस्तु।

संसारजीर्णतरुमूलकलापकल्प-
संकल्पसान्तरतया परमार्थवह्नौ ।
स्युर्विष्फुलिङ्गकणिका अपि चैतदन्ते
देदीप्यते विमलबोधहुताशराशिः ॥

ह्यकारो द्वादशान्ते हकारस्तादिदं विदुः ।
अहमात्मकमद्वैतं यः प्रकाशात्मविश्रमः ॥

Author—Kṣema Rāja.

Remarks—The Ms. is designated also as Pratyabhijñā Śāstra. The author of the original commentary as evinced by the introductory portion is Vasuguptācārya who was credited with the abridgement of the sacrosanct aphorisms of Śiva inscribed on the rocks of the Mt. Kailasa, in 51 verses. The work in question is only an elucidation of the latter.

॥ लघुवृत्तिः ॥

No. 1074 B. LAGHUVṚTTI.

C. O. L. No. 2108 B.

Substance—Palm leaf. Size—13″ × 1½″ Leaves—11. 9 lines per page and 50 letters per line. Script—Malayāḷam. No. of Granthas—300.

Owner—Same as No. 1074 A.

Subject—Explication of the Anuttaratrimśikā.

Beginning :

यत्र तेजांसि तेजांसि तमांसि च तमांस्यलम् ।
तेजांसि च तमांस्येतद् वन्दे ज्योतिरनुत्तमम् ॥

सदागमप्रवाहेण बहुधा व्याहृतं त्रिकम् ।
श्रीमदुत्पलदेवीयं मतसारं तु वक्ष्यते ॥

सदाभिनवगुप्तं यत् पुराणं च प्रसिद्धिमत् ।
हृदयं तत् परोल्लासैः स्वयं स्फूर्जत्यनुत्तरम् ॥

तत्र स्वात्मदेवतैव प्रबुध्यमानावस्थायामात्मानं परामर्शेनानवरतं पृच्छति तत उच्यते । श्रीदेव्युवाच—

End :

सद्भावक्षपितप्रपञ्चविषयं तत्तत्पदार्थानुगं
स्वात्मीकृत्य विसर्जनीयपरमस्वातन्त्र्यशक्त्यात्मनि ।
सद्भावे परमेश्वरस्य परमोद्योगस्वरूपे क्रिया-
ज्ञानेच्छाभिरनारतं हि जुहुमः सद्भावसम्पूर्त्तये ॥

Colophon :

समाप्तेयमनुत्तरत्रिंशिकाविमर्शिनी श्रीलघुवृत्तिः ।

Author :

Remarks—The work is a simple gloss. A more elaborate commentary is also available in print. Certain hymns are embodied in two leaves.

॥ अनुत्तरसंविदर्चनाचर्चा ॥

No. 1074 C. ANUTTARASAMVIDARCANĀCARCĀ.

C. O. L. No. 2108 C.

Substance—Palm leaf. Size—13″ × 1½″. Leaf—1. 10 lines per page and 52—56 letters per line. Script—Malayāḷam. No. of Granthas—40.

Owner—Same as No. 1074 A.

Subject—Exposition of the reality of Paramaśiva.

Beginning :

श्रीगुरुभ्यो नमः ।

अकलङ्कशशाङ्काभा त्र्यक्षा चन्द्रकलावती ।
मुद्रापुस्तकसद्ग्राहा पातु वः परमा कला ॥

विश्वोत्तीर्णविश्वमयस्वप्रकाशविमर्शात्मकस्वात्मपरमात्मप्रत्यभिज्ञानरूपानुग्रहपरतया स्वीकृतदेहाद्यहंभावस्य परापरात्मनः परमशिवस्य तादृक्स्वभावपरामर्शनं पादुकास्मृतिः । सकलविभूतिहेतुभूततदीयहृदयसन्धित्सया तदात्मकानुप्रवेशः शब्दराशिन्यासः ।

End :

पूर्णहृदयतदाशासनानां शून्यबुद्धिप्राणदेहानां च अन्योन्यभेदाभिमानसिद्धिपुरःसरं चुम्बकापूरिवाह्यमभिमुद्रया मुहूर्तमात्रम् अन्तरितबीजस्मरणेन कालग्रसनं समाधिः । धरादिशिवाध्वषट्कविषयज्ञानक्रियामयं स्वस्वातन्त्र्यं साक्षात्कार्यलाभसिद्धिः ।

Colophon :

इति श्रीमदनुत्तरसंविदर्चनाचर्चा सम्पूर्णा ।

गुरुभ्यो नमः । अस्मद्गुरुभ्यो नमः । नमः शिवाय ।

Author :

Remarks—The Ms. describes how Paramaśiva assumed several forms for the weal of the world at large.

॥ लघुवृत्तिविमर्शिनी ॥

No. 1074 D. LAGHUVṚTTIVIMARŚINĪ.

C. O. L. No. 2108 D.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—55. 9 lines per page and 52 letters per line. Script—Malayāḷam. No. of Granthas—600.

Owner—Same as No. 1074 A.

Subject—Elucidation of the Laghuvṛtti, a commentary on Anuttaratrimśika.

Beginning :

गणपतये नमः ।

इदन्तां कबलं गृह्णन् दन्तावलवराननः ।
अहन्तास्पन्दभूरन्तरन्तरायहरोऽस्तु वः ॥

परानुत्तरसंघट्टपरमार्थप्रबोधकाः ।
जयन्त्यभिनवाचार्यचरणाम्भोजरेणवः ॥

श्रीमाधुरमहाचार्यचरणाम्भोजषट्पदः ।
श्रीकृष्णदासः कुरुते लघुवृत्तिविमर्शिनीम् ॥

इह सकलरहस्यसम्प्रदायप्रवर्तनप्रथमदेशिकश्रीकण्ठनाथापरावतारश्रीमानभिनवगुप्ताचार्योऽनुग्राह्यजनानुग्रहाय वेदादिभ्यः परं शैवमित्यागमरहस्यमनुसृत्य उत्तरोत्तरसारभूतवैदिकशैवत्रामदक्षिणकौलादिनिगमेभ्यः सारतरस्य जीवन्मुक्तिविभूतिरूपपरापरकौलिकसिद्धिसाधकतमश्रीमदनुत्तरभट्टारकात्मकस्वात्मस्वरूपप्रत्यभिज्ञापकस्य श्रीपरात्रिंशिकाख्यस्य सूत्ररूपस्य त्रिकशास्त्रस्य अक्षरतो गुर्वीं ग्रन्थतो लघीयसीं वृत्तिम् अर्थगौरवसम्पत्त्या तु महाधियां ग्रन्थलाघवसुखाध्ययनाम् अध्ययनमात्रेणैव मन्दमतीनाम् अनुग्राह्यजनानामप्यनुग्राहिकां लघुवृत्तिं चिकीर्षुः तत्प्रतिज्ञेयमनुत्तरज्योतिरनुसन्धत्ते—यत्र तेजांसीति ।

End :

क्षपितस्थूलप्रपञ्चविषया सूक्ष्मरूपतया तत्तत्पृथिव्यादिपदार्थानां परमेश्वरस्यानुत्तरभट्टारकस्य विश्वान्तर्बहिष्कारात्मकपरमोद्योगस्वरूपे विसर्जनीयपरमस्वातन्त्र्यशक्त्यात्मनि पारमार्थिके स्वरूपे सद्भावस्य अनुत्तरभट्टारकेण सह सम्पूर्तये अनन्तरं हि जुहुमः ।

यन्मेयं बहिरन्तरिन्द्रियपदं तन्मेव मानाद्बहि-
र्मानं तन्मितेः ..र्व..हि...स्या च प्रमातुर्मितिः ।
माताप्येष महाप्रमातुरवहिर्मन्यादिरुत्वात्मनेः
मह्यं चिन्मयविग्रहाय महते तस्मै प्रमात्रे नमः ॥

Colophon :

इति श्रीकृष्णदासकृतिः श्रीलघुवृत्तिविमर्शिनी सम्पूर्णा ।
व्यवहारदशारूढः प्रतथे यश्चराचरे ।
चिन्मयाय नमस्तस्मै श्रीयोगानन्दशम्भवे ।

नमश्शिवाय । श्रीरुद्राय नमः ।

Author—Kṛṣṇadāsa.

Remarks—The commentary is lucid and elaborate. Several leaves in the middle are worm-eaten.

॥ शिवविद्याप्रकाशः ॥

No. 1074 E. ŚIVAVIDYĀPRAKĀŚA.

C. O. L. No. 2108 E.

Substance—Palm leaf. Size—13″ × 1½″. Leaves—9. 10 lines per page and 60 letters per line. Script—Malayāḷam. No. of Granthas — 350. Incomplete.

Owner—Same as No. 1074 A.

Subject—The means for realising Śiva as Godhead.

Beginning :

... ...

न्तु मायाद्यानानद्वेधास्तप्तानां (?) कीर्तितः शैवैः ।

अव्यक्तप्रभृतीनां गुणैस्तु सुखदुःखमोहरूपतया ।
अन्वय इह ...गृह्यते विशेषोऽयम् ॥

शब्दादिकगुणसाम्ये तुल्यते? चान्वयोऽत्र विज्ञेयः ।
अङ्गाङ्गिभावविहितो भवति विशेषस्तु केषाञ्चित् ॥

End :

अस्मितारहितं चैतच्चैतन्यं शक्तिरुच्यते ।
तया प्रकाशितं विश्वं शक्तिध्यानमुदाहृतम् ॥

सर्वालम्बननिर्मुक्तं निष्कलज्ञानमुच्यते ।
अहमंशेन यच्छून्यं चिन्मात्रालोकमद्वयम् ॥

मुक्तिबीजं तदाख्यातं परयोगप्रवर्तकम् ।
चक्राणि नाडयः पद्मं देवताबीजमण्डलम् ॥

Colophon :

इति शिवविद्याप्रकाशे अध्वसिद्धिर्नाम द्वितीयः प्रकाशः ।

Author :

Remarks—The Ms. comprises three Prakāśas only. The opening two leaves are missing. A leaf at the close contains certain aphorisms of Cāṇakya.

॥ स्वरूपप्रवेशिका ॥

No. 1075 A. SVARŪPAPRAVEŚIKĀ.

C. O. L. No. 247 A.

Substance—Paper. Size—13½" × 8½". Pages — 8.

16 lines per page and 18 letters per line.
